
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

अथ श्रौतसूत्रं वृत्ति (आश्वलायनश्रौतसूत्रवृत्ति अध्याय
२

Accession No:- ~~6234~~ M876.

Title:- आश्वलायन श्रौतसूत्रवृत्ती

Subject:- वेदाङ्ग धर्मशास्त्र

Author:- नारायण नरसिंह गार्ग्य

~~पत्र~~ - ~~150~~ 150 (+2)

श्रौ०वृ०
१

श्रीगणेशायनमः॥ प्रज्ञानानंदमूर्त्तिः सकलदिगतिगः सर्वदासंननन्यः सर्वस्मात्स्वप्रकाशः शिखरिनिलयः प्रत्यगात्मा सदेवः। श्रौतस्मार्त्तक्रियात्मा श्रुतिमनननिदिध्यासवैराग्यलभ्यः स ब्रह्माविष्णुरीशः सकलमपिजगत्सर्वदाव्याप्यसोनः॥ गुणदोषविनिर्मुक्तं स्वप्रकाशमनाकुलं। गंभीरबोधमानंदं नमामिब्रह्मशाश्वतं। आश्वलायनसूत्रस्यभाष्यंभगवताकृतं। देवस्वामिसमाख्येनविस्तीर्णंसदनाकुलं। तत्प्रसादान्मयेदानींक्रियतेवृत्तिरीदृशी। नारायणेनगार्ग्येणनरसिंहस्यसूनुना। अथैतस्यसमाम्नायस्यवितानेयोगापत्तिंव्याख्यास्यामः॥ लोकेयानिप्रत्याम्नायंप्रयोगशास्त्रेपिसमर्थ्यंतेतान्यनुष्ठानोपयुक्ततयाऽध्ययनविध्याक्षिप्तत्वात्प्रत्याम्नायमंगत्वंप्रतिपन्नानि। तत्रांगांगिनोरनुष्ठानकृतमानंतर्यमथशब्दोद्योतयति। एतस्येतिशब्दोनिविष्टेषपुरोरुकक्कुतापवालखिल्यमहानाम्न्येतरेय

राम
१

ब्राह्मणसहितस्य शाकलस्य बाष्कलस्य चाम्नायस्य एतदाश्वलायनसूत्रं नाम प्रयोगशा
स्त्रमित्यध्येतृप्रसिद्धं संबंधविशेषं द्योतयति। समाम्नायस्येत्युच्यते। एतस्यैव सम्यग
भ्यासयुक्तस्येदं शास्त्रं नखिलानां सम्यगभ्यासरहितानामिति। वितताग्नयो यस्मिं
निति श्रौतं कर्म जातमग्निहोत्रादि वितानशब्देनोच्यते। समाम्नायस्य वितानवृत्तिविशेष
णात् श्रौतेष्वेवाखिलरहितत्वं गार्ह्येषु सखिलत्वमेवेति ज्ञायते। योगापत्तिः प्रयोगापत्तिः
प्रयोगपरिणतिः प्रयोगस्वरूपमित्यर्थः। तां वक्ष्याम इति ध्रुवं निदमेव शास्त्रप्रतिपाद्यमिति
दर्शयति तेन छंदोगप्रत्ययप्राप्तस्य तच्चोदेः स्तोत्रियत्वादिकार्यसंबंध एवात्र विहित
त्वेन गृहीतव्यो न तच्चोदेः स्वरूपमपि तत्प्रत्ययमेवेति प्रयोग एव शास्त्रस्य व्यापारेण
तच्चोदेः प्रयोज्यस्वरूपेऽपीति। एतदुक्तं भवति। अध्ययनविधित एवोक्तलक्षणं समाम्ना

श्रौ॰ वृ॰
२

यमधिगम्यानंतरं श्रौतेकर्मण्येताद्दृक्समाम्नायविहितप्रयोगज्ञानायेदमधिशास्त्रमु
धिगंतव्यमिति। श्रौतेषु कर्मस्वेताद्दृक्समाम्नायविहितानां प्रयोगापत्तिं वक्ष्यामद्दृ
त्युक्तमिदानींतेष्वाहिताग्नेरधिकार इत्याह॥ अग्न्याधेयप्रभृतीन्याहुर्वैतानिका
नि॥ अग्न्याधेयं प्रभृतिः आदिरुपक्रमो येषां तान्यग्न्याधेयप्रभृतीनि। अग्निहो
त्रादीनि कर्माण्याधानं कृत्वैव कर्तव्यानीत्यर्थः॥ तत्र हेतुमाह॥ वैतानिकानीति वित
नेषु भवानि वैतानि वितानसाध्यानीत्यर्थः॥ वितानशब्दोस्मिन्सूत्रे भावसाधनोग्नीनां
विस्तारवाची पूर्वस्मिंस्त्वधिकरणसाधनोग्निहोत्रादिकर्मवचनः॥ एतदुक्तं भवति
गार्हपत्यादिभिरग्निभिः साध्यानि श्रौतानि कर्माणि॥ अग्नयस्त्वाधानसाध्यास्तस्मा
दाधानप्रभृतित्वं सिद्धं श्रौता■नां कर्मणां॥ बहुवचनं सर्वश्रौतपरिग्रहार्थं॥ सर्वाणि

राम
२

श्रौतान्याधानादूर्ध्वमेव कर्त्तव्यानि न किंचिदपि श्रौतमाधानादर्वागिति। अनेन प्रकारे ने
णाधानस्य कर्मार्थत्वनिराकरणेनाग्न्यर्थत्वमर्थात्साधितं भवति। तद्यदि कर्मार्थं स्या
त्प्रति कर्म क्रियेत तत्र कस्यचित्पुरस्तादपि स्याद्यस्य परस्तादाधानं स्यात्तस्याग्न्या
धेयप्रभृतित्वं विहन्येत। आधानस्याग्न्यर्थत्वे चनायं दोषः। अतो बहुवचनेनाधान
स्याग्न्यर्थत्वं साधितं भवति। तस्मादनाहिताग्नेः स्मार्तवत्यापद्योन भवंति स्मृत्युक्तानीनाप
स्मार्तपर्यंचाधानं न कर्तव्यमिति साधितं भवति। न परस्तात्। आहेत्यनेन सर्वमिदं शास्त्रं श्रु
तिमूलमिति दर्शयति। तेनास्मिन्गृह्यशास्त्रे पददृष्टं मूलं तदाम्नायांतरमूलमिति साधि
तं भवति। अस्मिंस्तु शास्त्रे अनिबद्धस्य स्वाम्नायेदृष्टस्य मानस्य श्रुतितएव प्रयोगसिद्धि
र्भवति। श्रुतेः स्वातंत्र्यसंकीर्तनादिति। आधानस्य प्रथमानुष्ठेयत्वात्प्रथमं तदेव वक्तव्य

।०५०
३

मित्युतत्वाद्या॥ दर्शपूर्णमासौ तु पूर्वं व्याख्यास्यामस्तंत्रस्य तत्राम्नातत्वात्॥ दर्शपूर्णमा
सशब्दो यथासंख्येन सूर्याचंद्रमसोरत्यंतसंनिकर्षविप्रकर्षदेशस्थितिलक्षण
वचनो तयोर्योगाद्दर्शशब्दो रात्रवचनो तयोर्योगाद्देवकर्मवचनो। पश्चात्प्रयोज्यवचनोऽपि दर्शश
ब्दोऽल्पाक्षरत्वात्पूर्वं निपात्यते तु शब्दो विशेषद्योतकः॥ तंत्रमंगसंहतिः॥ विध्यंतद्गुल्य
थिः॥ स चावस्थानादिः संस्थाजपांतः॥ प्रधानस्य तंत्रणात्तंत्रमित्युच्यते॥ तत्त्वदर्शपूर्णमा
सयोरेवाम्नातं नान्यास्विष्टिषु॥ अतस्तत्सापेक्षत्वादन्यासां तावेव पूर्वं व्याख्यातव्यौ
स्यातां॥ एतदुक्तं भवति आधानस्य प्रथमं प्रयोज्यत्वात्तस्मिन्नेव प्रथमं व्याख्यातव्ये
सति तत्साध्यस्य गार्हपत्यादेः पवमानेष्टिसापेक्षत्वात्ता अपि तत्रैव वक्तव्याः स्युः उक्ता
अपि विध्यंतसापेक्षत्वात्तस्य च दर्शपूर्णमासयोरेवाम्नातत्वात्तद्व्याख्यानमंतरेण

राम
३

तज्ज्ञानाभावात्त्रयोक्तुं नैव शक्यते। अतोनेन विशेषेण तावेव पूर्वं व्याख्यास्यामः॥ नाधा
नमिति सूत्रस्यार्थः॥ इदानीं दर्शपूर्णमासयोर्व्याख्यानमारभ्यते॥ दर्शपूर्णमासयोर्हविः
ष्यासंनेषु होतामंत्रितः प्रागुदगाहवनीयादवस्थाय प्राङ्मुखो यज्ञोपवीत्याचम्य द
क्षिणावृद्धिहारं प्रपद्यते पूर्वेणोत्करमपरेण प्रणीताः॥ दर्शपूर्णमासयोरित्यधि
कारार्थं आध्याय परिसमाप्तेः। वाक्येन शेषि विशेषि विशेषा संयुक्तस्योभयार्थत्वा
यह विरासादनमामंत्रणं चोभयं संहृतमेवैष्टिकस्य प्रवेशस्य निमित्तं होत्रमित्यृ
ग्वेदस्य समाख्यात तद्वेदविहितानां पदार्थानां कर्त्ता होतेत्युच्यते। प्राङ्मुखत्वं स्थानाच
मनाभ्यां संबध्यते। मध्यात्तस्य विशेषाग्रहणात्। यज्ञोपवीततावदाचमनार्थं तयानविधे
यं स्मृतिप्राप्तत्वादन्यार्थं च न भवति संबंधाभावात्। एकवाक्यगतत्वात्कर्त्रीसंबध्यमा

नस्य च प्रयोजनाभावः स्मृतिप्राप्तत्वादेव। अतः स्मृतिप्राप्तमिहानूद्यते। स्मार्तानां स्नानाचमनयज्ञोप
वीतादीनां श्रौतकर्माविरुद्धानामस्मिन्शास्त्रे प्राप्तिप्रदर्शनार्थोऽयम्। इदमाचमनं कर्मांगं विधीयते। शो
चार्थस्य गृहप्रवेशात्प्रागेव कृतत्वात्। तदुक्तं। मनःप्रसादात्सत्यात्तथा तपसा स्नानकर्मणा आ
चांत्या चात्मनः शुद्धिं कृत्वा कर्म समारभेदिति। दक्षिणावृन्नाम यो दक्षिणं पार्श्वं मध्ये कृत्वा वर्त्त
ते स दक्षिणावृत्। विह्रियंते ऽनयोर्यस्मिंदेशे स विहारः। उत्करो नाम उत्कीर्यते वेदिपांसवो य
स्मिंदेशे स उत्करः। प्रणीता नाम आपो मंत्रसंस्कृताः आहवनीयस्योत्तरतो निहिताः। उत्कर
प्रणीतयोरंतरेण यो देशस्तेन विहारं प्रपद्यते। एतदुक्तं भवति स्नात्वाचम्य यज्ञोपवी
ती भूत्वा हविःष्वासंनेषु आमंत्रितश्च सन्होता प्रागुदगाहवनीयाद्यो देशस्तस्मिन्प्रा
ङ्मुखोवस्थोपनिःक्रम्य प्राङ्मुख एव भूत्वाचम्य दक्षिणावृद्भूत्वा पूर्वेणोत्करमपरेण

प्रणीतायोदेशास्तेनविहारंप्रपद्यतइति उत्करप्रणीताग्रहणादेवविहारप्रत्ययेसिद्धे
यद्विहारग्रहणंतत्सर्वःकर्त्तासर्वकर्मणिविहारप्रपदनंकुर्वन्दक्षिणावृत्त्वेतेनपथो
प्रपद्येवमर्थः॥ उत्तमपरेणाप्रणीते॥ यदनोषधिहविष्कंकर्मतदप्रणीतमित्युच्यते। हृ
विःश्रपणार्थत्वात्प्रणीतानां॥ तस्मिंनिध्मम्परेणप्रपद्यते। प्रणीतास्तत्रनसंतीति॥ चा
त्वालवत्सु॥ चात्वालोनामावटःपशुसोमादिष्वस्तियेषुउत्तरवेद्यर्थंमृत्खात्वाक्रियते
तद्वत्सुतेषुतमपरेणप्रपद्यते। सर्वत्रोत्करःपश्चिमावधिः॥ एतत्तीर्थमित्याचक्षते॥ एतम
ध्वानंतीर्थमित्याचक्षतेवेदविदः। आचक्षतइतिब्रुवन्वैदिकीयंसंज्ञान पारिभाषिकी
तिदर्शयति। उत्कराद्यभावेपिसदेशास्तीर्थसंज्ञकएवदेशलक्षणार्थत्वादुत्करादीनां
ग्रहणस्येति। अतोग्निहोत्रादिष्वपितेनैवपथाप्रपदनंसिद्धंभवति॥ तस्यानित्याः

चात्वालं

प्रांचश्चेष्टाः॥ षट्सूत्राणि सर्वाणि नित्यर्थं तस्येति विशेषणं कृतं। असत्यस्मिन्हेतुः प्रकृतत्वात्तस्यैवेमे विधयः स्युः। अस्मिंस्तु सति संनिकृष्टविषयत्वात्सर्वनाम्नस्तेनार्थेन विहारप्रपदनार्हो यः कर्ता विहितः तस्यैवेमे विधयो भवंतीति तस्येति विशेषणं कृतवानाचार्यः॥ नित्या इत्यनेन प्राक्चेष्टतायाः नित्यत्वं न विधातव्यं। विहितत्वादेव स्वरूपनित्यत्वयोरपि सिद्धत्वात्। अतस्तस्यैषोऽर्थः॥ स्य बाह्यानां चेष्टानामुपरमेऽपि मनोवाक्कायसंयंत्रणादयो नित्या एवेति। प्रांच इति शब्दः पूर्वदिग्वाची पुंसि बहुवचनांतः चेष्टा इति क्रियावाची स्त्रियां बहुवचनांतः तत्र प्रांच इत्यत्र पुंसः प्रोक्तेन संबंधात्कर्तुः प्राङ्मुखत्वं विधीयते चेष्टाशब्दगतबहुवचनेनास्य बहुत्वस्य सामानाधिकरण्यादेव चेष्टानां प्राक्त्वं विधीयते। तासां अमूर्तत्वात्स्वतः प्राक्त्वासंभवात्त

त्साधनेषु प्रागपवृत्ता तासां च प्राच्येवापवर्ग इति एवं विधिबलाद्भवति। एतदुक्तं भवति यो
पस्तीर्थेन विहारं प्रपन्नस्तस्य तस्य प्राङ्निष्क्रमणान्मनो वाक्कायपयंत्रणादयो नित्याः
स्युः कर्तुर्व्यग्रानृजुखत्वं चेष्टानां च प्रागपवर्गात् तत्साधनानां च प्रागपवर्ग इति। विष
मसूत्रप्रणयनेनेन व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादर्शनमित्येषा परिभा
षा संगृहीता भवति॥ अंकधारणा च॥ अंकमूरूपस्थः। तस्य करणं दक्षिणोसरिपो
पस्थेनेति वक्ष्यमाणरूपं धारणेत्युच्यते। सा चेन्नित्या भवेदुपवेशनकालादारभ्या
कर्मपरिसमाप्तेरविच्छेदेन कार्येत्यर्थः। अंकधारणस्योपवेशनांगत्वेन प्राप्तत्वा
दृष्टार्थता परिहारायैव नित्यत्वे विधानं ते तं नित्यतावचनं न पत्नीसंयाजिके अग्नेर
स्यतृणमित्येवमादिषूपवेशनेषु मंत्रनिषेधेपि वक्ष्यमाणस्योपवेशनप्रकारस्य

श्रौ० टी०
६

नित्यत्वेन प्रापणार्थमंत्रविध्यसंबंधेष्वप्यग्निहोत्रादिषु वक्ष्यमाणलक्षणस्यैवोपवे
शनस्य प्रापणार्थं च ॥ यज्ञोपवीतप्रोचे च ॥ पूर्वस्य यज्ञोपवीतग्रहणस्यस्मार्तानां प्रा
पणार्थत्वान्निवीतप्राचीनावीतयोर्मानुषपैत्र्ययोः कर्मणोः स्मार्तत्वेन प्राप्तौ सत्यां नि
यमार्थमिदमुच्यते यत्र निवीतप्राचीनावीते विधीयेते तत्रैव ते भवतो न मानुषं पैतृकं
वा कर्म दृष्ट्वेति । तयोर्विध्यभावे यज्ञोपवीतमेवेति नियम्यते । देशस्यांगप्रधानार्थत्वा
दिळादिभक्षणादेश्चांगत्वादस्य च विहारदेशे प्राप्तौ सत्यामेवं शौच ग्रहणेन निय
म्यते क्वचिदर्थमप्यशुचित्वसंपादिय त्तद्विहारं निष्क्रम्य बहिः कर्तव्यं त्वं ते विहारेष्व
शु
चिरेव नित्यं स्यादिति ॥ विहारादव्यावृत्तिश्चेत्तत्र चेत्कर्म ॥ व्यावृत्तिः पृष्ठतः कृतिः ॥
न विहारं पृष्ठतः कुर्यात्तत्र च विहारे कर्म कुर्वन्भवेत्प्रयोगमध्ये पि कर्म कुर्वतामेवायं

राम
६

नियमानो परतकर्मणामित्यर्थः। अतो विहारव्यावृत्तिनिषेधात् पश्चाद्दस्योपविश्य पश्चात्त्वस्य
धिष्ण्यस्योपविशति पश्चादुत्तरवेदेरुपविश्याध्वर्युरिष्येवमादौ मध्ये रेखायाश्च पक्र
म्य उत्तरत उपविशेत्। चशब्दस्त्रिषु सूत्रेषु नित्यत्वानुकर्षणार्थः। तत्र चेत्कर्मेति वच
नात् ब्रह्मणोप्ययं नियमो भवेत्। उत्तरसूत्रांगं चेदं पदत्रयं तेन ब्रह्मणो दक्षिणांगव्यापा
रः सिद्धो भवति॥ एकांगवचने दक्षिणं प्रतीयात्॥ एकशब्दः केवल्यवचनः एकं च तदं
गं चैकांगं सव्यदक्षिणभेदेन द्वित्वयोगि यदंगं हस्तादि तस्य द्वित्वेन विना वचने दक्षिणमेवां
गं साधनं विद्यात्। द्वित्वयोगे द्वाभ्यां कुर्यात् एकवचन बहुवचने कत्रैकत्वबहुत्वापेक्षे
एकत्वादीनामन्यत्रोपयोगात्केवलांगवचनमेव दक्षिणप्रत्ययस्य निमित्तमित्यर्थः।
हस्तेन पादेनेवेत्युदाहरणं॥ अनादेशे॥ द्वित्वयोगिनोंगस्यानादेशे क्रियामात्रविधान

मी०वृ० ७

इत्यर्थः॥ तत्रापि दक्षिणं विद्यात् प्रवर्ग्यते अभिक्रम्य अंगुलीः अंगुलीभिरित्युदाहरणानि। चक्षुरादेरनंगत्वात्तेष्वयं नियमो नास्ति। अवयवविशेषा अयाहिशक्तय अक्षुराद्यः उच्यन्ते नावयवा इति॥ कर्मचोदनायां होतारं॥ कर्तृरहिते क्रियाविधौ होतारं कर्तारं विद्यात् कर्तृसहिते स एव कर्त्ता भवेत् येन सहितं तत्कर्म स्यात् कर्तृरहितोऽपि गुणविधिः सर्वोऽपि एव कर्मचोदनायामिति विशेषणात् निर्दिष्ट होतुः प्रापकं किं तर्हि प्राप्तस्य नियामकं तेनेष्टिपशुसोमेभ्योन्यत्र न होतुरेव कर्तृत्वनियम इति॥ दद्यातीति यजमानं॥ स्वत्वव्यावृत्तिपूर्वके परस्वत्वापादने पर्य्यते ददातिविधौ यजमानं कर्त्तारं विद्यात्॥ जुहोति जपतीति प्रायश्चित्ते ब्रह्माणं॥ तृतीयाध्यायगोचरे प्रायश्चित्तप्रकरणे जुहोतिकर्त्री जपति ब्रह्माणं विद्यात् जपशब्देनासाहचर्यात् जपादिषट्कं गृह्यते तस्मिन्प्रकरणे मुख्यस्य ज ७

पस्याभावात् एवं च स्मृतिकर्मकरणत्वेन होममंत्रस्यापि ग्रहणे सिद्धे यज्जुहोतिग्रहणं तदु
पग्रहणेन होममंत्रानुग्रहार्थं तदित्येवमर्थं तेन पित्र्यायां जपादिलोपेपि होममंत्रान लु
प्यंते॥ ऋचं पादग्रहणे॥ पादशब्दोत्र मूलवाची ऋचो मूलग्रहणे ऋचं विद्यात् नांतमध्य
योर्ग्रहणे। ध्रुवो वाजा अभिद्यवः अग्निर्नेता त्वं सोम क्रतुभिरित्युदाहरणानि॥ सूक्तं
सूक्तादौ हीनेपादे॥ अत्र पादशब्दो गायत्र्यादीनां भागवाची सूक्तादौ हीनेपादे गृ
ह्यमाणे सूक्तं विद्यात्। त्वमग्ने वसून् त्वं हि क्षैतवदित्याद्युदाहरणानि॥ अधिके तृचं स
र्वत्र॥ अधिके पादे गृह्यमाणे तृचं विद्यात् सर्वत्र सूक्तादाव सूक्तादौ चेत्यर्थः॥ अग्न
आयाहि वीतये गृणानः दूळभेन्यो नमस्यस्तिर इत्याद्युदाहरणानि॥ जपानुमंत्रणा
प्यायनोपस्थानान्युपांशु॥ सर्वत्र शब्दोत्रापि संबध्यते मध्यगतस्य विशेषग्रहणा

त्वप्रयोजनवत्वाच्चत्र्व्रस्मिंश्चास्त्रे यानि जपादीनि तान्युपांशु प्रयोक्तव्यानि॥ मंत्रा
श्चकर्मकरणाः॥ चशब्देनात्रसर्वत्रेत्युपांशुद्रतिचानुकृष्यते। मंत्राः कर्मकरणाश्च
सर्वत्रोपांशुप्रयोक्तव्याः। उपांशुत्वस्येदं लक्षणं करणवद् शब्दममनः प्रयोग उपांश्वि
ति। जपादीनां वर्णां लक्षणमुच्यते। जपं उच्चारणं विद्यात्क्वचिद्यमपि तद्भवेत्। अर्थ
यितः कार्यलाभश्चेद्यद्य एवक्तव्यो भवेत्। मंत्रमुच्चार्यं नेव मंत्रार्थत्वेन संस्मरेत्। शि
ष्यं तन्मनाभूत्वा स्यादेतदनुमंत्रणं। एतदेवाभिमंत्रस्य लक्षणं वीक्षणाधिकं। अ
ङ्गिः संस्पर्शनाधिक्यात्तदेवाप्यायनं स्मृतं। उपस्थानं तदेव स्यात्खण तिस्थानसंयु
तं। बाह्यं कार्यं यदेतेषु मंत्रकाले क्रियेत तत्। कर्मणः करणास्ते स्युर्विहितार्थप्र
काशनात्। मंत्रेणक्लृप्तामंत्रांते क्रियते कर्म येषु तु। इदं कार्यमनेनेति न क्वचिद्दृश्य

४ = स्मृतस्योपेक्षाऽनर्हत्वं प्रसंग इति देवत्रातभाष्ये ॥ ४

तिविधिः ॥ लिंगादेर्वेदसमर्थत्वं येषां ते मंत्रसंज्ञकाः ॥ अनुमंत्रणग्रहणेनाभिमंत्रण
मपि गृह्यते । अनुमंत्रणाप्यायनो पस्थानां कर्मकरणत्वाविशेषेपि यत्र प्रथमग्रह
णं तत्तन्मंत्रांते कर्मारंभ इति कर्मकरणधर्मो यः स तेषु न भवतीत्येवमर्थं तेन मंत्रोच्चा
रणसमकालमेव तेषु क्रिया भवति ॥ प्रसंगादपवादो बलीयान् ॥ सामान्यविधेर्विशे
षविधिर्बलीयानित्यर्थः ॥ लोके वेदे प्रसिद्धस्य न्यायस्य वचनप्रयोजनं सर्वेपवा
दाः प्रसंगस्यैव बाधकाः ॥ नापवादाः सावकाशत्वे परस्परं बाधका इत्येवमर्थं अतः स्वा
ध्विष्टकृतीयासु आहावोत्तरयोः प्रणवयोर्येभिहत्प्रतिगरो तयोः प्रणवरूपप्रतिगरो
न बाधको भवति ॥ प्रपद्यामित्यत्तरेण पादेन वेदिश्रोण्योत्तरया पाहंऽसमां निधा
य प्रपदेन बर्हिराक्रम्य संहितौ पाणी धारयं नाका शावत्यंगुली त्वृदयसंमितावंक

४ = अंकरणाभिहितोर्थः केनचिदुपोद्घातेन पुनरुच्यमानः प्रसंग इति विष्णुधर्मोत्तरे तृतीयकांडे तंत्रशुद्धिनामक ६ अध्याये

संमितौ वा द्यावापृथिव्योः संधिमीक्षमाणः॥ तिष्ठेदितिशेषः॥ तीर्थेन विहारं प्रपद्यतइत्युक्तं। तच्चैकेन पदविक्षेपेण बहिर्विहारादंतर्विहारप्रपदनं कर्तुमशक्यं दक्षिणांगप्रत्यपश्च सिद्ध एव। इदानीं प्रपद्येत्युच्यते। त्राविदिश्रोण्यायत्त्वप्रपदनं तस्य विहितत्वसिद्ध्यर्थं। अभिहततरेणेतितरपो वचनं त्वनेकपदविक्षेपसाध्यत्वादस्य प्रपदनस्य सर्वेषु च पदविक्षेपेषु दक्षिणस्याग्रतो हरणासिध्यर्थं। वेदेरपरयोः श्रोणिरितिसंज्ञा। पूर्वयोरंसइति। पादस्यापरोभागः पार्ष्णिः पूर्वः प्रपदः॥ उत्तरयाश्रोण्या दक्षिणस्य पादस्य पार्ष्णी समां निधाय तस्यैव प्रपदेन वेद्यां स्तीर्णे बहिराक्रम्य बहिर्वेदि सव्यं निधायात्मनः सव्यदक्षिणो हस्तौ पृथक्पृथक् कुविरलांगुलीकौ कृत्वा पुनस्तथाभूतावेव तौ पाणी परस्परसंहितौ च कृत्वा तौ हृदयसंमितावंकसंमितौ वा

धारयन् द्यावापृथिव्योः संधिमीक्षमाणः नोर्ध्वमधस्तिर्यग्वेक्षमाण ऊर्ध्वः प्राङ्मु
खस्तिष्ठेत॥ एतद्धोतुः स्थानं॥ अयं स्थानशब्दो भावसाधनो नाधिकरणसाधनः॥
एतच्छब्देन श्रोणिदेशेन हस्तपादादियंत्रणेन च विशिष्टं यत्पूर्वसूत्रोक्तं तदत्र स्थान
शब्देनोच्यत इति प्रदर्श्यते। यत्र होतुः स्थानं चोद्यते तत्रैतत्स्थानं भवतीत्यर्थः॥ हो
तृग्रहणमुत्तरसूत्रस्यैवार्थं त्वाय॥ आसनं वा सर्वत्रैवंभूतः॥ अयं वाशब्दः
स्यार्थे वर्तते। स्थानं चासनं च सर्वत्र सर्वः कर्त्ता एवंभूतः कुर्यात् पूर्वोक्तहस्तपाद
दियंत्रणाविशिष्टेन श्रोणिदेशविशिष्ट इत्यर्थः॥ श्रोण्यादिषु सर्वेषु प्राप्तेषु श्रो
णिदेशवर्जनेन कर्तृशरीरविशेषणानामेव प्रापणार्थमेवंभूतवचनं॥ वचना
दन्यत्॥ उक्तस्यान्यथाभावो यावन्मात्रस्य वचनं तावन्मात्रस्यैव तत्संबंधिनोन्यस्यापि

स

२०

तितेन होमादेः क्रियमाणे दक्षिणस्य पाणेरपायेपि सव्यो हृदयान्नापैतीति सिद्धं॥
प्रेषितो जपति॥२॥ अत्रान्यार्थस्य प्रैषस्याभावात् सामिधेन्यर्थं प्रेषितो होता॥ न
मः प्रवक्त्रे नम उपद्रष्ट्रे नमोनुख्यात्रे क इदमनुवक्ष्यति स इदमनुवक्ष्यति षण्मोवरु
रंहसस्पां तु द्यौश्च पृथिवी चाहश्च रात्रिश्चापश्चौषधयश्च वाक् समश्रितय ऊंसा
धुच्छंदांसि प्रपद्येहमेवमाममुमितिस्वं नामादिशेत भूते भविष्यति जाते जनिष्य
माणे त्वा भजाम्यपाव्यं वाचो अशांतिं वहे त्यंगुल्यग्राण्यवकृष्य जातवेदो
रमयापशून्मयीति प्रतिसंदध्याद्धर्म मे द्यावापृथिवी वर्माग्निर्वर्म सूर्यो वर्म मे संतु
तिरश्चिकाः॥ तदध्यवाचः प्रथमं मसीय इमि॥ नमः प्रवक्त्र इत्यादि होत्रं जुषध्वमित्य
न्तं जपेत्॥ सामिधेन्यर्थप्रैषोत्तरकालवर्तित्वादयं जपः सामिधेन्यंगं भवति॥ अ

त्रामुमितिशब्दस्यस्थानेद्वितीययाविभक्त्यास्वमात्मनामनिर्दिशेत्। स्वग्रहणात्प्रतिनिधि
त्वेनप्रवृत्तस्यापिजपकर्तुरेवनामनिर्देष्टव्यंनहोतुरितिलभ्यते। अर्धांतिंवहेति ज
पैकदेशमुच्चारयंनंगुल्यग्राण्यवकर्षयेत्। मयीतिचोच्चारयन्प्रतिसंदध्यात्ततोना
वकर्षसंधानेजपांगतत्कुर्वतोविधानात्॥ समाप्यसामिधेनीरन्वाह॥ समाप्येत्यने
ननमःप्रवक्त्रइत्यादेर्होत्रंजुषध्वमित्यंतस्यैकजपत्वंदर्शयतितेनांतरायत्कार्यद
यमवकर्षणंसंधानंचतज्जपकर्त्तुःसंस्कारएवभवतिनेर्यतिरः। अतःपित्र्यायांजपलो
पेनकर्त्तव्यंभवति। अग्नेःसमिंधनार्थाऋचःसामिधेन्यःताअन्वाह। अनुब्रूयादि
त्यर्थः॥ हुंइतिहिंकृत्यभूर्भुवःस्वरोमितिजपति॥ हिंकारस्यनानारूपत्वादिष्टपरिग्र
हार्थःपाठः॥ एषोभिहिंकारः॥ जपसहितस्यहिंकारस्याभिहिंकारइतिसंज्ञाविधी

का

श्रौ०वृ०
२२

यते॥ भूर्भुवःस्वरित्येव जपित्वा कोत्सोहिंकरोति॥ एवेत्यवधारणान्न केवलं व्युत्क्रम
मात्रं प्रणवरहितत्वं चेति दर्शयति। आचार्यग्रहणं विकल्पार्थं॥ न च पूर्वं जपं जपति
कोत्स इति शेषः॥ पूर्वमिति नमः प्रवक्त्र इत्यादि जुषध्वमित्यंतमि[illegible]त्यर्थः॥ अथ
सामिधेन्यः प्रवोवाजा अभिद्यवो ग्न आयाहि वीतये गृणानः ईळेन्यो नमस्य स्तिरो ग्निं
दूतं वृणीमहे समिध्यमानो अध्वरे समिद्धो अग्न आहुते तिं दे॥ अथ शब्दः चामेव
सामिधेनीत्वं दर्शयति पूर्वं सामिधेनीग्रहणं सामिधेन्याद्यंगानां मध्ये भिहिंकारः
सामिधेन्यादीनामासंनतरमंगमिति दर्शयति। तेन वे श्वदेवस्य स्त्रे दिग्ध्यानोत्तरकालम
भिहिंकारः कर्तव्य इति गम्यते॥ नाएकश्रुति संततमनुब्रूयात्॥ याएता उक्ता अक्र चस्ताए
वमनुब्रूयादित्यर्थः॥ उदात्तानुदात्तस्वरितानां परः संनिकर्षे एकश्रुत्यां॥ ऐकश्रुत्यलक्ष

राम
११

णमुच्यते। उदात्तानुदात्तस्वरितानामभिव्यंजकायेप्रयत्नाः आयामविश्रंभाक्षेपास्ते
षामन्यतमस्यैकस्यैवात्यंतसंनिकर्षेणासजातीयप्रयत्नाव्यवधानेन यदुच्चा
रणंतदेकश्रुत्यमित्यर्थः॥ स्वरादिमगंतमोकारंत्रिमात्रंमकारांतंकृत्वोत्तरस्या
अर्धेर्चेवस्येतत्संततं॥ इदंसंततलक्षणंस्वराद्यगंतपदयोष्टिप्रदेशोपलक्षणा
र्थत्वाद्दगंतेयःस्वरादिः स्वरएववाकेवलस्तमोंकारंत्रिमात्रंकृत्वानेनप्रणवेनोत्तर
मर्चंसंधायतस्याअर्द्धर्चेऽवस्येत्। मकारांतंत्रिमात्रमितिव्युत्क्रमेणयोजनासमुदा
यस्यत्रिमात्रतायाइष्टत्वादतएवंभवतिओंकारोर्द्धतृतीयमात्रः मकारोर्द्धमात्रइति
त्रिमात्रत्वंप्रणवस्य। उत्तरवचनमावृत्तिनोऽनावृत्तिनश्चोभयथागृह्यते। यत्प्रणवे
नोत्तरासंधानमात्रंविधीयतेतत्संततमित्युच्यते। एतदवसानं। सामिधेनीष्वनूच्या

सस्याविप्रमोह एवोत्त २

ओष्ठ० २२

नामृचामर्धर्चेवसानस्य पूर्वसूत्रेणैव सिद्धत्वादिदमवसानविधानमाद्यायामृचि प्राप्त्यर्थं। अन्यत्र च जपादिष्वपीति॥ उत्तरादानमविप्रमोहे॥ आदानमारंभः विप्रमोहो विभ्रेषः पूर्वस्योच्चारमनुसमारभेतेत्यर्थः॥ विप्रमोहे पूर्वमेव सम्यक् पुनर्ब्रूयादित्यर्थः॥ अस्मिन्नृषभे यद् इदमेव प्रायश्चित्तं नान्यदिति सूत्रस्य प्रयोजनं॥ समाप्तौ प्रणवेनावसानं॥ अर्थप्राप्तस्य विधानं विहितस्वायमर्थो नार्थप्राप्त इत्येवमर्थं॥ चतुर्मात्रोवसाने॥ यदवसानं विहितमेव नार्थप्राप्तं तस्मिन्नवसाने चतुर्मात्रः प्रणवो न त्रिमात्रः॥ तस्यांतापत्तिः॥ तस्य प्रणवस्य योंतो मकारः तस्य वर्णांतरपत्तिर्वक्ष्यत इत्यर्थः॥ स्पर्शेषु स्ववर्गीयमुत्तमं॥ स्पर्शेषु यः स्पर्शो मकारात्परः तस्य स्ववर्गीय उत्तममापद्यते मकारः। समिध्यरोंन्नतं मर्जयंतेत्यादि निदर्शनं॥ अंतस्थासु तांतामनुनासिकां॥

२ परेषु

राम २२

ध्यर्धकारं ब्रूयात्। अध्य आगद्। प्रथमायामेनम ४६

रेफस्यानुनासिकत्वासंभवाद्यवला एवात्रांतस्था गृह्यंते। तासु याया परांतःस्थातां
तामनुनासिकां मकार आपद्यते। तत्र सानुनासिका पूर्वा उत्तरा शुद्धा एवमत्र संयो
गाः। विद्यानि प्रचोदयांय्वा जी वा जेषु इत्यादिनिदर्शनं॥ रेफोष्मस्वनुस्वारं। एतेषु
मकारोनुस्वारमापद्यते। अनुस्वारो नाम नासिकास्थानोऽस्पृष्टकरणश्च। अस्यप
ज्ञस्य सुक्रतां सिमिध्यमानोऽध्वर इत्यादि॥ वि॥ प्रथमोत्तमे अन्वाहाध्यर्द्धकारं॥
अध्यर्धकारमध्यर्धकलेत्यर्थः। प्रथमोत्तमे ऋचोत्रिरध्यर्धकारं भवति। पू
र्वामध्यर्धमुक्ताऽवसायतत्तो द्वे सचौ ब्रूयात् द्वे इति वचनं मर्धर्चे चतुष्काभिप्रा
यं। पूर्वस्मिंतु षष्ठ्यासे प्रथमायामावृत्तौ द्वावर्धर्चौ द्वितीयायामेकश्चेति त्रयो र्धर्चा
उक्ता। अस्मिंस्तु षष्ठ्यासे द्वितीयतृतीययोरावृत्त्योस्त्रयोर्धर्चा उत्तरस्याश्चैव एकोर्धर्चे

औ॰सू॰
१३

इत्येवंचत्वारोर्धर्चीवक्तव्याभवेयुः। अर्धर्चकारविधेः उत्तरपासंधानाविरोधा
द्धिति। अथशब्दोस्यसूत्रस्यान्यार्थत्वप्रतिभासनिवृत्यर्थः। द्वितीयप्रथममुत्तमस्यामर्धा
र्धर्चं। पूर्वपासंधानाविरोधादुत्तमापामेवंभवति। अथशब्दश्च पूर्ववत्॥ ताः
पंचदशाभ्यस्ताभिः॥ एकादशानामृचांद्वयोस्त्रिरभ्यासेकृतेता अभ्यस्ताभिःसहपं
चदशैवभवंतीत्यर्थः। प्राप्तएवायमर्थः। अस्यवचनस्येदंप्रयोजनंसर्वत्राभ्यस्ता
भिःसहविहितसंख्यापूरणंकर्तव्यमिति॥ एतेनशास्त्रयाज्यानिगदानुवचना

समंस्तव

निष्टवनानि॥ शंसस्यादिशब्दचोदितानिशास्त्रादीनिभवंति॥ एतेनेतिसामिधे
न्यनुवचनमुच्यते। शास्त्रादीनिचतत्रविहितानितेषांधर्मापेक्षास्तितत्रैतेनतानी
त्युक्तेएतद्धर्मकाणितानीतिगम्यते। अनेनप्रकारेणतेषांसामिधेनीधर्मातिदे

सम
१३

२।उक्तो भवति। सर्वधर्मप्राप्तौ कतिपयधर्मनिषेधार्थमाह॥ नत्वन्यत्राध्यधिकारं न
जपः प्रागभिहिंकारं नाभिहिंकाराभ्यासा व बहुषु प्रकृत्या॥ अन्यत्रेत्येतावदनुव
र्तते तस्य सामिधेनीभ्योन्यत्रेत्ययमर्थः॥ अतः पित्र्यायामभिहिंकारः सिद्धो भवति।
अभ्यासनिवृत्त्यर्थं तत्रैवताग्रहणं करिष्यति॥ तेनाभ्यासो न भवति। प्रकृत्येति शब्दोभ्या
सेन बहुष्वपि पुरीष्या सोऽग्न इत्येवमादिषु तयोरभावं दर्शयति॥ नावछेदादै॥
अवछेदो नामन्यत्र शाखादिषु मध्ये समाप्यावस्येदिति एवमादिभिः शब्दैरवसानं
विहितं समाप्यव्रणावेनैवमादिषु सोवछेदः तत्रापि तो न स्तः॥ शास्त्रेषु वहोत्रकाणा
मभिहिंकारः॥ अस्मिं छास्त्रे मुख्यवर्जिता द्वादशर्त्विजो होत्रकादृत्युच्यंते। नस
न्नवात्रयोवातेन गत्वावस्तुतोभिहिंकारनिषेधः सिद्धो भवति। सामिधेनीनामुत्तमेन

श्रौ॰सू॰
१५

प्रणावेनाग्नेमहां असि ब्राह्मण भारतेति निगदेवसाय॥२॥ यजमानस्यार्षेयान्प्रवृणी
तेयावंतस्युः॥ प्रणवेननिगदं संधायनिगदेवस्येदित्यर्थः। तत्रवसायार्षेयान्प्रवृ
णीतेयावंतो यजमानस्यतेभवंतितेच प्रवराम्नाये व्याख्याताः॥ पंचप्रथमं॥ अस्येमे
आर्षेया इत्यंतः अयं पर इत्येवमादि स्मृत्यनुसारेण प्रवराम्नायएव वरण प्रकारः
पठितः सएवइस्तनीमि यंतावरीत व्याहृत्यं वरीत व्याहृति विधानमान्यक्षेत्रजात
द्व्यामुष्यायणार्थं। पौरोहित्यान्राजविशां॥ पुरोहितस्यार्षेयैस्तानेवराजन्यवैश्य
योः प्रवृणीते। बहुवचनंत्रैवर्णिकस्त्रीजातानामनुलोमानां संग्रहार्थं॥ राजपक्षन्वा
राज्ञां॥ मानवैळेपौरूरवसेत्येवंवा पौरोहित्यान्वा॥ सर्वेषां मानवेति संशये॥ अ
ज्ञाने संशयेच त्रयाणां वर्णानां मानवेत्ययंशब्दः प्रवरो भवेत्॥ दैवेद्धोमन्विद्धसमि

परं
आर्षेया
राम
२५

ष्टुतो विधानुमदितः कविशस्तो ब्रह्मसंशितो घृताहवनः प्रणीर्यज्ञानां रथीरध्वराणामतूर्तो
होता तूर्णिर्हव्यवाळित्यवसा पास्यानं जुहूर्देवानां चमसो देवपानो राँद्वाग्नेनेमिर्देवांस्त्वं
परिभूरस्यावह देवान्यजमानायेति मन्तिपघ देवताद्वितीयया विभक्त्यादेश मादेशमावहे
त्यावाहयत्यादिं लावयन्॥ निगदे वसायेति निगद इति सप्तमी निर्देशात्पूर्वापरीभूतो नि
गदेन परिसमाप्त इति गम्यते। इतः प्रवरोपितस्ये वशेषः॥ क्वचिन्मंत्राम्नाये भारत श
ब्दानंतरमसावसाविति प्रवरप्रकृतेः पठितत्वाच्च संबुद्धि सामानाधिकरण्याच्चादेवेद्ध इ
ति निवित्पद निगदश्च तुर्दशानि वित्पदानि परिभूरसीत्येवमंतानि। आवह देवान्यज
मानायेत्यादिसु यजा यज्ञेत्यंत आवाहन निगदः॥ सामिधेन्यादयए ते मंत्रा आहवनी
याभिधायिनः॥ तत्र भारतेत्यवस्येत्थवं रतिचानि वित्पदानामेकादशेन्च। चतुर्दशेनावा

श्रौ·सू·
२५

हनमिग[illegible]दं संधायय जमानायेत्यवस्येत्। प्रतिपद्यावसायेत्यध्याहारास्तरतिपद्ये
ति वचनमस्य वाक्यस्य प्रतिपत्तिसंज्ञाकरणार्थं। तेनपित्र्यायां प्रतिपत्त्यंतरविधा
न एतन्न भवति। तत्रारिन्वादिवक्ष्यमाणाद्वितीयया विभक्त्यादिश्यादिश्यानंतर
मावहेत्यावाहयति। आवहशब्दस्यादिल्याववपन। द्वितीयाविधानं सर्वार्थं। अत्र
पाठादेव द्वितीया सिद्धेति तेन देवतामादिश्य प्रणुयाद्यजेत्यत्र द्वितीये व भवति वि
भक्त्यंतरविधाने तु तदेवति। आवह देवान्होत्राय्यावहावह जातवेदः इत्येतेषु त्रि
षुल्पुतावसानेन स्तः॥ अग्नमावहेति तु प्रथमदेवतां॥ प्रथमदेवतायामयं विशे
षः। तुशब्देन यष्टव्यदेवताः वह शब्दयोर्मध्ये नेशब्दं ब्रूयात्॥ अग्निं सोमम् इत्या
ज्यभागौ॥ यागयोरिय माख्यात संबंधाद्देवतयोरपीति॥ अग्निमग्नीषोमाविति पौर्णी

त्रे

राम
१५

मास्यां ॥ विशेषाभावात्सोमयाजिनो सोमयाजिनश्च प्रधानदेवते ॥ अग्नीषोमयोस्था
नं इंद्राग्नी अमावास्यायामसंनयतः ॥ पौर्णमास्याः प्रथमाम्नानात्सैव प्रथमं प्रयोज्या
स्थानशब्दः पौर्णमास्याधर्मीणां प्रथमसंबंधं दर्शयति । प्रास्ताव विशेषेपि प्रयोगाव
स्थायां विशेषग्रहणादिति तेनेदं बोधितं भवति । असमाम्नातानामसति चोदनालिंग
विशेषे पौर्णमासमेव तंत्रमिति । दधिपयोभ्यां यागं कुर्वन्संनयंनित्युच्यते । योनसंन
यति तस्य इंद्राग्नी द्वितीया ॥ इंद्रं महेंद्रं वा संनयतः ॥ संनयतोमावास्यायामिंद्रं महेंद्रं
वा अग्नीषोमस्थाने आवाहयेत् ॥ अंतरेण हविषी विष्णुमुपांश्वेतरेयिणः ॥ ऐतरे
यिणः शाखाविशेषास्त एवमुपांशुयागं उभयोरपि पर्वणोरंतरेण हविषी इच्छंति ॥
अग्नीषोमीयं पौर्णमास्यां वैष्णवममावास्यायामेके । नैके कंचन ॥ उभयोरपि पर्वणोः

श्रौ·सू०
१६

कंचनोपांशुयाजमेकेनेच्छंति॥ अन्येषामप्युपांशूनामावहस्ताहापाइधियाधामा
नीदंरुविमेहो ज्यायइत्युच्चैः॥ अन्येषामपीति पित्र्यादीनामंगोपांशूनां संग्रहा
र्थे। आवाहनादिषु चतुर्षु निगदेषु यान्युपांशुयाजसंबंधीनि षट्प्रदान्यावहादीनि ते
षामुच्चैरिति संज्ञामात्रं विधीयते। तंत्रस्वरात्युपांशोरुक्तानीत्यनेन सर्वेषामुच्चसंज्ञा
नां तंत्रस्वरो विधीयते॥ येन्ये तद्वचनाः परोक्षास्तानुपांशूच्चैर्वा॥ येन्य इति सर्वना
म्नः संनिहितविषयत्वात्तेष्वेव निगदेष्विति गम्यते। तद्वचना उपांशुयाजवचनाः प
रोक्षास्ते येषां पदांतरसंनिधानादेव विशेषनिष्ठता वसीयते नस्वतः। अजुषताद्
याः क्रियावचना इत्यर्थः तेषामुपांशुत्वं प्राप्तमनूद्यत उच्चैः संज्ञाविकल्पेन विधीयते॥ राम
प्रत्यक्षमुपांशु॥ यागं प्रति चोदितं देवतानामधेयं प्रत्यक्षमित्युच्यते। तस्य प्राप्तमु १६

पांशुत्वं नियमार्थं विधीयते तस्य चोपांशुत्वं भवेत्। उपांशुदेवतायाः प्राथमदेवतायाः सं
बंधियोग्निशब्द आवाहनस्विष्टकृन्निगदयोर्न तस्यापीति। अत्र किंचिदुच्यते। उपांशु
यष्टव्यमिति वचनादुपांशुत्वं यागधर्मतयावगम्यमानं तत्रासंभवाद्दानर्थक्यात् तदंग
न्यायेन तत्संबंधिनः शब्दान्परिगृह्य तिष्ठति। तत्र वहादीनामाग्न्यादीनां च होताय
क्षदित्यस्य चोपांशुत्वं निवर्त्यं तत्र स्वरोनुज्ञातः परोक्षाणाम जुषतादीनां विकल्पेन तं
त्र स्वर उक्तः प्रत्यक्षस्य विष्ण्वादेशब्दादीनां चोपांशुत्वनियमादन्यस्य सर्वस्य तंत्र स्व
रे प्राप्ते याज्यानुवाक्ययोरादिभिः प्राणसंतानविधानादुपांशुत्वमेवेति स्थितं॥ प्रति
चोदनमावाहनं॥ चोदनां॥ चोदनां प्रतिप्रति चोदनां चोदना देवता चोदना। यावत्यो देवता
चोदनास्तावंत्यावाहनानि भिन्नानीत्यर्थः। प्रत्यावाहनमु—सनिध्वासमसिध्यर्थं भेदसाध

गुरा

नं॥ सर्वा आदिश्य सकृदेकप्रदानाः॥ यत्र बहुभिर्हविर्भिरेकया याज्यया बह्वीभ्यो देव
ताभ्यो युगपद्यागाः क्रियन्ते ते एकप्रदाना यागाः॥ तत्संबन्धा देवता अप्येकप्रदाना इ
त्युच्यन्ते सर्वा इति वचनं सर्वासां पृथगादेशार्थं आदिश्य वचनं सर्वा आदिश्यन्ते आ
वह इत्यत्र प्रयोगार्थं सकृद्वचनमन्तेपि सकृद्देवतवक्तव्यो न यावद्देवतमित्येवमर्थं॥
तथोत्तरेषु निर्मिथ्यकामिव संस्तुयात्॥ एकामिवेति वचनं यथैकस्या देवतायाः पु
रस्तात्स्वाहा याज्याहोत्रे अजुषतादय एकवचनेन तथैतास्वपीति॥ समानां देवतां समानार्थां
॥ निगमेष्वेकामिव संस्तुयादित्यत्रापि संबध्यते विशेषाग्रहणात्॥ प्रयोजनवत्वात्संप्रदान
त्वाच्च समानामित्येकशब्दामित्यर्थः॥ समानार्थामित्येकप्रयोजनार्थामित्यर्थः॥ अव्य
वहितां सकृन्निगमेषु॥ अव्यवहितां अन्यया देवतया निगमेषु सकृद्ब्रूयात्॥ एकव

स्वं महिमानमावहावह॥१

चनेनैव॥ ओं व्हाखवाचिकावसुदेवां आज्यपां आवहाग्निं होत्रायावह जातवेदः सुयं

जायजेत्यावाह्य यथास्थितमूर्ध्वं जानु स्यव विश्वोदग्वेदेर्युस्तृणानि भूमौ प्रादेशं कुर्या

द्दिति मीतास्यां तरिद्दान्माछे त्यादिदमहमग्निनादेवेन रेवतयात्रिवृतास्तोमेन रथंतरे

णसामागायत्रेण छंदसाग्निष्टोमेन यज्ञेन वषट्कारेण वज्रेण योस्मान्द्वेष्टि यं द्विष्मस्तं

हन्मीति॥ आवापिका आवापोद्धारयोग्याः प्रधानदेवता इत्यर्थः ताः सुकृता वाह

नासु देवानाज्यपानावाहयेत्॥ स्विष्टकृतं चापाठेनुनासिकत्वलाभाय नकारलोपाय

चाहोत्रायावह शाकृयोः स्विष्टकृदावाहानप्रयोगाय च। किं च। पठितावाहनानां पा

ठादेवोत्तरेष्वपि निगमेषु निगमनसिद्धिर्लभ्यत इत्येवमर्थं। आज्यपाः प्रयाजानुयाज

देवताः अग्निं होत्रायावह स्वं महिमानमावहैतावत् स्विष्टकृदावाहनार्थं। आवहडा

त्ये

तवेदः इत्यादि सुयजायजइत्यंतो निगदशेषः॥ आवाह्यवनं सुयजाय जांतस्य आवाहन नि
गदत्वाया साभिध्येन्यर्थं यथास्थितस्तयोर्ध्वे ज्ञानु रूपविश्य उदग्व्यूह्य वेद्यांस्तीर्णानि तृ
णानि वेद्यां भूमौ प्रादेशं कुर्यादर् इति र्मातेति मंत्रेण॥ आ आवयिष्यंतमनुमंत्रयेत॥ आ
वयय इंदेवेषा आवयमा मनुष्येषु कीर्त्यैयशसे ब्रह्मवर्चसायेति प्रवृण्या नं देवसवितरेतं
त्वा वृपते ग्निं होत्राय सह पित्रा वैश्वानरेण द्यावा पृथिवी मो पाता मग्निर्होताहं मानुष इति
मानुष इत्यध्वर्यो श्रुत्वो दायुषा स्वायुषा स्वायुषोदो षधीनां रसेनोत्पर्जन्यस्य धाम भिर
दस्याममृतां अन्वित्युत्तिष्ठेत॥ अध्वर्युं ग्रहणमुत्तरार्थं॥ षष्ठिस्त्वाध्वर्यो नवतिश्च
पाशा अग्निर्होता रस्मंतराविचृता॥ सिनंति पाकमतिधीरएती सुखाय॥ ब्रूयादिति शे
षः॥ नायमुत्थान मंत्रः॥ पूर्वेणैव निरपेक्षत्वात॥ अतइद्ध शोमं त्रोमंत्रसंज्ञकः॥ सतस्यपं

यामन्वेमिहोतेत्यभिक्रम्यांसेध्वर्युमन्वारभेत पार्श्वस्थेन पाणिना॥ अत्राध्वर्युग्रह
णेन प्रयोजनमभिक्रमणान्वारंभयोध्वर्योरेवाध्वर्युमेव कुर्यान्न प्रतिप्रस्थातारमि
त्येतत् उक्तं वाक्ये: संधिरंसस्तस्मिंदेशेध्वर्युमन्वारभेत पार्श्वस्थेन पार्श्वे न तिष्ठतीति पा
र्श्वस्थः कनिष्ठिकाप्रदेशेनास्थितः नत्यक्नोत्तान इत्यर्थः तेनान्वारभेताध्वर्युं॥ आ
ग्नीध्रमंकदेशेन सव्येन वा॥ सव्येन पाणिना पार्श्वस्थेनांसएवां [illegible] केन कुरुणा वा॥
इंद्रमन्वारभामहे होतृ वृर्चं पुरोहितं। येनायं नुत्तमं स्वर्देवा अंगिरसो दिवमिति॥ उभ
यो: साधरणो मंत्र: अतोनावर्तते नोह्यते च॥ संमार्गतृणैरग्निरभ्यात्मं मुखं संमृजी
त संमार्गोसि संमा प्रजया पशुभिर्मृडीति॥ इध्मसंनहनानि संमार्गशब्देनोच्यंते। अ
ग्निसंमार्जनसाधनत्वात्तेषां तैस्तृणैरभ्यात्मं मुखं संमृजीतात्तृणैरिति वचनात्तृणभूते रे

श्रौ०वृ०
१९

वेतैः संमृजीत नग्नंथिभूतैः पाणिभूतेर्वेति गम्यते। अभ्यात्ममात्माभिमुखं पाणितलमवाग
पवर्गं च संमार्जनमिति॥ सकृन्मंत्रेण द्विस्तूष्णीं सर्वत्रैवं कर्मावृत्तौ॥ सकृन्मंत्रेण द्विस्तूष्णी
मित्येतत्सर्वत्र भवत्येवंप्रकारस्य कर्मण आवृत्तौ सत्यामिति। एवंप्रकारशब्देन संस्कार
कर्मत्वमुच्यते। एतदुक्तं भवति। यत्र संस्कारकर्मणास्त्रिरावृत्तिर्विधीयते। तत्र सकृन्मंत्रे
ण द्विस्तूष्णीमिति। न प्रधानकर्मणि॥ स्पृष्ट्वोदकं होतृषदनमभिमंत्रयेताहे दैधि
षव्योदतस्तिष्ठान्यस्य सदने सीद योस्मत्पाकतर इति॥ होतृषदनं अपरेणास्थित्वा प्रा
ङ्मुखो भिमंत्रयेत इदमुदको यस्य स्पर्शनं पूर्वांगं अग्नि संमार्जनतृ यैरात्मनो मुखसंमा
र्जनात्। आत्मनो यदीषं तद्धीत्यर्थत्वेनास्य दृष्टार्थत्वं भवति॥ अंगुष्ठोपकनिष्ठि
काभ्यां होतृषदनात्तृणं प्रत्यग्दक्षिणा निरस्येन्निरस्तः परावसुरितीदमहमर्वावसोः

राम
१९

सदने सीदामीत्युपविशेद्दक्षिणोत्तरिणोपस्थेन॥ दक्षिणं चतदुत्तरं च दक्षिणोत्तरं। तद्यानुपस्थो दक्षिणोत्तरी तेनोपविशेत्॥ एतेनिरसनोपवेशने सर्वासनेषु सर्वेषामहरहः प्रथमोपवेशने पि समाने॥ एते इति प्रकारमंत्रविशिष्टयोर्ग्रहणार्थौ ते च सर्वेषां सर्वासनेषु प्रथमोपवेशने भवतः॥ न द्वितीयादिप्रयोग इत्येको ऽर्थः॥ समाने प्यासने अहर्गणेष्वहरहः प्रथमोपवेशने भवतः॥ अयमपरोर्थः समाने पिस्थाने प्रयोगावृत्तौ पुनः पुनराव र्त्तते प्रव र्ग्यादिष्वयं चापरोपि शिष्टाल्लभ्यते॥ अस्य विधेर्दर्शपूर्णमासप्रकरणे पठितत्वात्तदतिदिष्टेष्वेवेष्टिपशुसोमेषु भवतो नाग्निहोत्रादिष्विति अंकधारणं भवत्येव॥ द्विरिति गौतमः॥ अस्याचार्यस्य द्विः द्वितीयेपि प्रयोगे भवतीत्यभिप्रायः॥३॥ ब्रह्मोदने प्राशिष्यमाणे ऽन्याधेये ब्रह्मा॥ द्विरित्यनुवर्तते क्रियमाणस्य कर्मणः दक्षिणतउपवि

ष्टः सन्पुनः प्राशनकाले द्वितीये निरसनोपवेशनं कुर्यात्॥ आग्न्याधेये ब्रह्मौदने द्वितीय
विधानसामर्थ्यादेवं इष्टिपशुसोमेभ्योन्यत्रापि ब्रह्मणो निरसनोपवेशनप्राप्तिरिति
गम्यते आग्न्याधेयग्रहणमग्न्याधेये ब्रह्मौदनं तत्रैनैव कर्त्तव्यमिति॥ बर्हिष्यवमा
नात्प्रत्येत्य सोमे॥ आहवनीयस्य दक्षिणत उपविष्टः सन्बर्हिष्यवमानं गत्वा ततः
प्रत्येत्य पूर्वासने पुनः कुर्यात्॥ सोमग्रहणं सर्वेषु सोमेषु प्रापणार्थं इतरथा धाना
धिकारात् तत्संबंध एव सोमेस्यान्न सर्वसोमेष्विति॥ प्रसृप्य होना॥ पश्वर्थमुपवि
ष्ट एवासने सदः प्रसर्पणं कृत्वा तत्रैव पुनः कुर्यात्॥ होतृग्रहणं अस्याधिकारनिवृत्य
र्थं॥ स्रुगाद्दापनेप्यौ॥ स्वाहाकृत्यर्थे स्रुगाद्दापने पुनः कुर्यात्॥ न पत्नीसंयाजि
के। पत्नीसंयाजार्थे उपवेशने नैव कुर्यात्॥ नान्यत्र होतुरिति कौत्सः॥ होतुरन्येषा

मित्तेन भवत इति कौत्सो मन्यते। उपविश्य देव बर्हिःस्वासस्थं त्वाध्यासदेयमिति॥
उपविश्यानंतरं ब्रूयादित्यर्थः॥ अभिहिंष होतः प्रतरां बर्हिषद्रवेति जानुशिरसा
बर्हिरुपस्पृश्यातकूर्ध्वं जपेत्॥ जानुशिरो जान्वग्रं अत ऊर्ध्वग्रहणमुपस्पृश
तो नजपस्यादिति। तेनान्यत्रैवं रूपे शब्दे ऽसत्ति कुर्वन्नेव कुर्यात् इति गम्यते। अरत्नी
संस्पृश्य मंथयेदित्यादिषु॥ भूपतये नमो भुवनपतये नमो० प्रदीप्त ध्मे स्रुचावादा
पयेंनिगदेन॥ समाप्य प्रदीप्त इत्युभयस्य स्रुगादापनावसरत्वदर्शनात् उपसमाधि
रपि प्रदीप्त एवेति गम्यते अनेनानिदेन स्रुवादापयेदध्वर्युं॥ अग्निर्होतावेत्त्वग्नेर्होत्रं
वित्तुं० होतारमवृथा इति जपेत्॥ अवसायेति वचनं निगदमध्ये उअ्वासत्ला भार्थं।
जपेदिति निगदमध्ये उपांशुत्वाभाय॥ अथ समापये द्युतवती० न्यजामयज्ञि का

निति॥अश्रेयेतिवचनमत्राप्युध्वासलाभार्थं समाप्तिवचनमत्तिर्हीतेत्यादिर्येऽग्नियानित्यंतस्यएकनिगदत्वसूचनार्थं। समाप्ते स्मिंनिगदेऽध्वर्युरा श्रावयति॥अध्वर्युकर्मविधानं प्रत्याश्रावणस्येदं निमित्तमितिज्ञापनार्थं समाप्तिवचनमाश्रावणेकृतेसमाप्तेवनिगदेप्रत्याश्रावणंकुर्यात् इत्येवमर्थं॥प्रत्याश्रावयेदाग्नीध्र॰मस्तुश्रौषळित्यो कारंप्लावयन्॥श्रांघायनग्रहणंविकल्पार्थं। अतः प्राङ्मुखत्वमपिलभ्यते। प्लावयन्प्रुतकुर्वन्नित्यर्थः॥४॥प्रयाजेष्वरंति॥वक्ष्यमाणलक्षणी याणाःप्रयाजा इत्युच्यंते तेष्वरंतियजंतीत्यर्थः॥पंचैतेभवंति॥पंचवचनंनराशंसःतनूनपाद्वाद्ध्यामुष्यायणस्यापिपंचैवभवंतिनषळित्येवमर्थं। एतद्इतिवचनं अतःपठिताएवेते तनूनपान्नराशंसयोरन्यतरेणसहपंचभवंति॥नापठितेनसहेत्येवमर्थं॥एकैकंप्रेषितायजति॥नस

ज्या

पि

राम
२९

जवर्ज॥ सर्वत्र सर्वा सामनुया

कृत्वेषितः सर्वा न्यजति॥ आगूर्या ज्यादिरनुयाँ जाह्यि वर्जितानां याज्यानामाद्यावागूर्भवति।
कोयमागुरित्याह॥ ये३ यजामह इत्यागूः। वषट्कारोंत्यः सर्वत्र॥ अनुयाजानामपीति सर्वत्र
वचनं॥ उच्चैस्तरां बलीयान्याज्यापाः॥ अत्रोच्चैस्तरत्वमेकयमातिशयः। बलीयस्त्वं व्यक्त
तरोच्चारणमेतदुभयं याज्यायाएव॥ तयोराद्यंत्लावयेत्॥ तयोराग्गूर्वषट्कारयोराद्यो
ह्लुतिः कार्या॥ याज्यांतं च॥ प्लावयेदिति शेषः॥ विविच्य संध्यक्षराणामकारं न चेद्द्वैवचनो
व्यंजनांतो वा॥ न चेत्प्रगृह्य इति पठितव्येन चेद्द्वैवचन इति प्रमादपाठः॥ सगंते याज्याः
प्रगृह्याणि संध्यक्षराणि तानि विविच्याकारमेव प्लावयेदिति एकारैकारयोः अ३इ इ
ति। ओकारौकारयोः आ३उ उ इत्येवं विविच्य प्लुतिः कार्या। उपेष्वस्य मंत्रो विश्वचर्षणा३
इ बौषट्‌ इत्यादिर्दृष्टांतः। इं दुं समहृत्वानीतये समस्मा इ वौ इ इति निदर्शनं। एकारस्य प्रगृह्य

स्यस्वरूपेणैव प्लुतिः कार्या॥ अधिश्रियंशुक्रयिशंदध्यानेवीं॰ कविःक। विमियक्ष्म सिव
यज्याउवीं॰ष्ठै. व ओकारस्यापिसह स्वरूपं विभृष्यः सहद्वाउ आ॰। वोकारस्य
प्रगृह्य संज्ञाया अनित्यत्वां नित्यानित्यसंयोग विरोधात्तस्य सर्वदा यिवि विच्चैव प्ला
वनं कर्त्तव्यं। व्यंजनांतानां संध्यक्षराणां सर्वदा स्वरूपेणैव प्लुतिः कार्या। न विवेकः कर्त्त
व्यः। विसर्जनीयोनत्यक्षरोपधोरिभ्यते॥ अनत्यक्षरोपधः अनवर्णोपधइत्यर्थः
सवषट्कारेण संधीयमानोरिष्यते। पिबासोम मभियमित्यादि निदर्शनं॥ इतरस्त्वरे
फी॥ इतरस्त्व अवर्णोपधः स च रेफसंज्ञी चेत्‌ रिभ्यते। महो पोव जीमितरोयथोक्त मित्य
त्र रेफिसंज्ञाधिगंतव्या। उतत्यंचमसंनवमित्यादि निदर्शनं॥ लुप्यते ऽरेफी॥ अ
वर्णोपधो यो विसर्जनीयः रेफसंज्ञश्चन भवति स लुप्यत एव वषट्कारसंधौ। अवी

डे॰ हि सोमकाममित्यादि निदर्शनं॥ प्रथमः स्वंतृतीयं॥ वर्गाणां यो यः प्रथमः स मः स्वं तृती
यमापद्यते। चिद्वीग्वैाउदाहृतिः॥ नित्यं मकारे॥ अंतस्था सुतां तामित्यनेनोक्तमित्यर्थः॥
ये३ यजामहे समिधः समिधो अग्न आज्यस्य व्यंतु३ वौ३ षळिति वषट्कारः॥ वौषट् प्र
श्नो वषट्कार इत्यर्थः॥ इति प्रथमः॥ अयं प्रथमः प्रयाज इत्यर्थः॥ वागोजः सह ॐ जोम
यि प्राणापाना विति वषट्कारमुक्त्वोक्तानुमंत्रयते॥ सर्वस्यायं विधिः स्यादित्येवमर्थी वी
प्सा॥ दिवाकीर्त्यो वषट्कारः॥ वृथा रात्रौ न प्रयोक्तव्य इत्यर्थः॥ किं च वषट्कारसंबंधि
यत्कर्म तद्धिर्ध्यतराविसृष्टे सति दिवैव कर्त्तव्यमिति॥ तथानुमंत्रणं॥ दिवाकीर्त्यमि
त्यर्थः। तच्चोक्तार्थमेव॥ एतद्याज्यानिदर्शनं॥ यदि दृंद्या ज्याया पुरस्तादागूः तस्या
स्वादौ याज्यांते च प्लुतिः स्यात् उपरिष्टाच्चवषट्कारस्तस्य चादौ प्लुतिस्ततोनुमंत्रणमि

औ०क्रौ०
२३

त्येतयाज्यास्वरूपनिदर्शनं अनुमंत्रणस्ययाज्यांतभीववचनंतदंतंवाग्यमनार्थं॥
तनूनपादग्नआज्यस्यवेत्विति द्वितीयोन्यत्रवसिष्ठशुनकात्रिवध्र्यश्वराजन्येभ्यः॥
वासिष्ठादिभ्योन्येषामयं द्वितीयः॥ नराशंसो अग्नआज्यस्यवेत्विति तेषां॥ वसिष्ठादी
नामयं द्वितीयः॥ इळोअग्नआज्यस्यव्यंत्विति तृतीयः॥ सर्वेषामिति शेषः॥ बर्हिर
ग्नआज्यस्यवेत्विति चतुर्थः॥ आगूर्यपंचमे॰ अग्नआज्यस्यव्यंत्विति॥ पंचमएवं क
त्वा तेनैवयजेदिति शेषः॥ आगुरोविधानं क्रमार्थं प्रतिदेवतंस्वाहाशब्दाभ्यासार्थं
वीप्सावचनं यथावाहितग्रहणं प्रमादादवाहितायाअस्थानिन्याअपिग्रहणा
र्थं अनावाहिताइत्येतत्र्याः स्थानिन्योपि देवताप्रमादादनावाहितास्युस्तासामप्य
त्र यथाचोदितेक्रमे निगमनार्थं प्रयाजायनुयाजातेत्यादिषु यथाचोदितंतदीया

राम
२३

नांदेवतानांनिगमनार्थंच इदृमेवप्रकारद्वयमनावाहितग्रहणात् गृह्यतेनान्यथावाहितग्रहणेन पठितावाहनानगृह्यंते। तासांपाठादेवनिगमनंनान्यथेत्यर्थः। स्वाहादेवाद्रुतियथासूत्रंमंत्रेरोषः॥ आतोमंद्रेणा॥ द्रुतः पूर्वंयत्तन्मंत्रेणप्रयोक्तव्यमिति। अत्रपूर्वविधेरभावादन्यत्रेतत्पूर्वमग्निमथनादिषुद्भवतितत्पिमंद्रेणप्रयोक्तव्यमितिगम्यते। त्रीणिवाचस्थानानिमंद्रमध्यमोत्तमसंज्ञकानि। तेषुचसप्तसप्तयमाभवंति। यमानामावस्थाःतत्रसप्तमयमेनवषट्कारःप्रयोक्तव्यः। ततएकावरोहेणायाज्या। एवंसर्वत्रएकैकयमारोहेणवषट्कारःप्रयोक्तव्यः॥ ध्वंचरांयुवाकात्॥ मंद्रेणप्रयोक्तव्यं॥ मध्यमेनहवींष्यास्विष्टकृतः॥ सर्वत्राकारोभिविधावेवात्रत्वभिविधौमर्यादायांवाभवत्याध्वर्युवशात् अत्रस्विष्टकृतमध्यमेनोत्तमेनवात्राध्वर्युवशात्प्रयोक्तव्यं। प्रयाजे

स्यऊर्ध्वमास्विष्टकृतो मध्यमेन प्रयोगः। हविर्ग्रहणं स्थानांतरे पि प्रधानहविषां मध्यमस्वर एवेति॥ उत्तमेन शेषः॥ इडादिस्विष्टकृदादिर्वा शंयुवाकांतः शेष इत्युत्तमस उत्तमेन प्रयोज्यः॥ अग्निर्वृत्राणि जंघनदिति पूं॰ नावागूर्यादेशं यजति॥ नावित्याज्यभागसंप्रत्ययार्थं। आगूर्येति देवतादेशस्य क्रमविधानार्थं यजतीति देवतादेशस्य क्रमविधानार्थं यजतीति देवतादेशस्य याज्यासंधानार्थं ता वाज्यभागसंज्ञकौ यागा वागूर्यानंतरं द्वितीयया विभक्त्या देवतामादिश्याथ संधाय यजतीत्यर्थः॥ सर्वाश्चानुवाक्यावत्यो प्रैषा अन्याश्चान्वायात्याभ्यः॥ याअन्वायातशब्देनानुनिर्वापशब्देन वा चोदिताः ता अन्वायात्याः ताभ्यो न्या या देवता अनुवाक्यावत्यो प्रैषाश्च ताः सर्वाश्चादिश्य यष्टव्याः। अन्वायात्यानामनुवाक्यारहितानां च सप्रैषाणामा

देशेन कर्त्तव्य इत्यर्थः। सर्वग्रहणमाज्यभागयोरपि संप्रैषयोरादेशानिवृत्त्यर्थं॥ सोमि
कीभ्यश्चयान्प्रंतूरेण वैश्वानरीयं पत्नीसंयाजांश्च॥ सोमिक्याः सोमे उत्पन्नाः न सोमे
ज्यायोज्याज्य पितृत्रोत्पन्नानामेव तत्रभवत्व संभवात् वैश्वानरीयपत्नीसंयाजानां तछब्द चोदिता
नामेवग्रहणं युक्तं। अत एतस्मिन्नेवासने वैश्वानरीयेस्य यजतीत्येतदेवग्रह्यते पत्नीसंयाजेश्च
रित्वावभृथं व्रजंतीति एतदेव च। अन्या इत्यनुवर्त्तते। अंगप्रधानरूपे सोमकर्मणि यौतौ वैश्वा
नरीयपत्नीसंयाजशब्द चोदितौ पदार्थौ तयोर्मध्ये यास्तत्रैवोत्पन्नादेवतास्ताभ्यो व्यन्या दे
वता आदिश्य यष्टव्या इत्यर्थः॥ एतौ वार्त्रघ्नौ पौर्णमास्यां॥ यावेतौ पौर्णमास्यामाज्यभागौ
तौ वार्त्रघ्नसंज्ञौ भवत इत्यर्थः। सनिमित्तेयं संज्ञेत्याह॥ अनुवाक्यालिंगविशेषां नामधेया
न्यत्वं। ततो विचारः॥ अनुवाक्यात एव तिचारो वगमो न्यत्वमित्यर्थः॥ निस्ये याज्ये॥ उक्ते

एवैते सर्वत्र याज्येनानुवाक्यावदेतयोरन्यत्वमित्यर्थः॥ वृधन्वंतावमावास्यापाठत्याताेवा
ग्यमनं। आदित आरभ्याज्यभागपर्यंतं वाग्यमनं भवति॥ अंतराच याज्यानुवाक्ये।
निगदानुवचनाभिष्टवनशास्त्रजपानां चारभ्यासमाप्तेः॥ अत्राभिष्टवनसंस्तवनशास्त्रे
ति संस्तवनशब्दः पठितव्यः॥ आरभ्येति वचनमन्यदपि यत्याज्यादिभ्यस्तदारभ्यासमा
प्तेर्वाग्यमनसिध्यर्थं। होतुरधिकारात्कर्त्रंतरस्यापि प्रापणार्थं चेति॥ अन्यद्यज्ञस्य
साधनात्॥ यज्ञस्य साधनवच सोन्यत्र वाग्यमनं नियम्यते। यज्ञसाधनो वचो नामय
यज्ञसंपादनार्थं तद्दोषपरिहारार्थं च॥ आप्यायेति दिवा आवं तुन इति जपेत्। आप
येति नियममतिक्रम्येत्यर्थः॥ अपि वान्यां वैष्णवीं॥ अन्यामपीति वचनं पूर्वोक्तायाः
अपि वैष्णवीत्वप्रतिपत्त्यर्थं॥५॥ उक्ता देवतास्तासां॰ मान्यंदिवो मातरिश्वा जभारेति॥

राम
२८

उक्तसंकीर्त्तनं देवताविधिक्रमस्मरणार्थं तासां याज्यानुवाक्या वक्ष्यमाणा लिंगक्रमाभ्यां यो
जनीया इदमपि उक्तं कीर्त्तनस्य प्रयोजनं यत्र देवताविधानादनंतरमृचो विधीयंते तत्र
तासां देवतानां ता एव याज्यानुवाक्या इति सार्वत्रिको यं विधिरित्येतत् ज्ञापयितुं अ
यमग्निरिति गायत्र्याप्रियाज्यानंतरमुक्तत्वाद्याज्यैव भवति। सा तु गायत्री सोमान्या
दाधान एव भवति। यद्यग्नीषोमीय इति व्युत्क्रम्यांते पठनं त्वसंशयार्थमुक्तवानाचार्यः॥
अथ स्विष्टकृतः पिप्रीहि देवाँ उशतो यविष्ठेत्यनुवाक्या॥ त्वष्टश्रद्धः प्रधानानंतरं स्वि
ष्टकृतो यागः स्यां नावाहनक्रमेषा इति अनुवाक्यावचनं सर्वत्र पूर्वमनुवाक्या पश्चाद्या
ज्येति प्रदर्शनार्थं॥ पेरुय जामहे ग्निं स्विष्टकृतं० प्रियाधामान्ययाळित्सुपसंततनुया
त॥ आगूर्विधानं निगदादावेव स्यान्न सगादाविति। अग्निं स्विष्टकृतामिति वचनं अ

श्रौ० वृ०
२६

ग्निं होत्रा पशब्देनादेशो न स्यादिति। षष्ठी विधानं द्वितीयापानिवृत्त्यर्थं। देवतामादिश्य प्रिया धामानि शब्दमुपसंतनुयात्। अयाडग्निशब्दः पूर्वं पठित एवोत्तरेण सूत्रेण स्यात्तस्या देवतायाः पुरस्तादिति देशरूपेण विधीयते। देवताया उपरिष्टाद्विधीयमानेन प्रिया धामानि शब्देन संधानार्थं प्रिया धामान्ययाळिति संततं पठितं। अतोत्र प्रतिदेवतमेक एवायाडग्निशब्दः प्रयोक्तव्यो न द्वितीय इति स्थितं॥ एवमुत्तरा अयाळयाळिति त्वेवतासां पुरस्तात्॥ उत्तरासामयं विशेषः अयाडग्निशब्द एव नासां पुरस्तात्प्रयोक्तव्यो नाग्निशब्द इति। एतदुक्तं भवति। प्रथमदेवतायाः पुरस्ताद् याडग्निशब्दः उत्तरासामयाडग्निशब्द एव सर्वासामुपरिष्टात्प्रिया धामानि शब्दः सर्वे च संतता वक्तव्या इति॥ आज्यपा तमनु क्रम्य देव्यं दध्यविशो अध्वरस्य होतरित्यनवानं यजति॥ आज्यपा तमिति प्रसिद्धं

राम
२६

क्रमसंग्रहादावाहनक्रमोत्रापि परिगृह्यते। तेनास्थानिन्यानि गमनमिहापि स्यात् अ
ग्न्युपांतमेवमुक्ता तदनंतरेण प्रियाधामानि शब्देन यक्षदिति संधाय पथासूत्रमुक्ता जुषतां
हविरग्ने यदद्येत्यृचानुच्छूसन्यजेत्। सर्वत्रानुच्छ्वासः कर्त्तव्योस्यां याज्यायां। प्रकृत्य
वा॥ अर्धर्चे वोच्छ्वसेत्॥ ६॥ प्रदेशिन्याः पर्वणी उत्तमे अंजयित्वोपपोरम्या त्वंनिमा
र्ष्टि। प्रदेशिनी नामांगुलिविशेषः पर्वणी पर्वसंधी। उत्तमे इत्यग्रतो द्वे पर्वणी इत्यर्थः।
अध्वर्युणा ते पर्वणी अंजयित्वा अभ्यात्मान पाणितलं कृत्वा ओष्ठयोरवागपवर्गं
निमार्ष्टि॥ वाचस्पति नाते हुतस्येषे प्राणाय० पानाय प्रश्नामीत्य धरसंधरे। अने
नैकस्मिंनित्यनयोरर्थः॥ स्रुच्युदकमंजलिं० वांतरेला मवदापयीत॥ द्विहस्तसंयो
गोंजलिः तं कृत्वा तेनेळांगृहीत्वा सव्ये पाणौ कृत्वा निध्मायेत्यर्थः। अस्याद्वितीयाया इ

श्रौ०व्०
२७

त्यर्थः।या हस्ते वेदीयते सा अवांतरेळा अवदाप्यीताध्वर्युं॥ अंतरेणांगुष्ठमंगुली
स्वस्वर्पं द्वितीयमादधीत॥ अंगुल्यंगुष्ठयोर्मध्येन प्रदेशेन स्वयमिळाया अवांतरेळा
मादधीत॥ प्रत्यालभ्यामंगुष्ठेनाभिसंगृह्य प्रत्याहृत्य॥ प्रत्यालभ्यांस्पृष्टामध्वर्यु
णा चेत्यर्थः॥ अंगुलीरमुष्टिं कृत्वा दक्षित इळां०प्राणसंमितां वा॥ अमुष्टिं कृत्वा
अंगुलीभ्यो बहिरंगुष्ठमकृत्वेत्यर्थः। सव्ये हस्ते निहितामिळां दक्षिणेन हस्तेन गृ
हीत्वावांतरेळां तां दक्षिणतः परिगृह्यास्य संमितां प्राणसंमितां वेळां कृत्वा तामु
पकल्पते प्राणसंमितां नासिकासंमितामित्यर्थः॥ इळोपहूता सह दिवा बृहताहि
त्येनोपास्मां० इदं मे देवा हविर्जुषंतामिति तस्मिन्नुपहत इति॥ इळोपहूतेति सहदि
वेत्यादिना तस्मिन्नुपहूत इत्यंतेन पांश्वित्यनेनाभिमर्शनीतं त्रस्वरत्वादश्रामुपांशुत्वं वि

राम
२७

धीयते। तेनैकश्रुत्यमनुपरतमेवेति स्थितं। तत्र यो ऽन्ते रित्यनेनोत्तरस्य निगदभागस्य
तेत्रस्वरानपगमः। कथ्यते प्रासत्त्वान्नापूर्वविधीयते तस्मिन्ननूच्यमाने शंसयः स्यां
निगदमध्ये उपांशुत्वमुच्यमानं किं सर्वस्य निगदस्य आहोस्वित्पूर्वस्य भागस्य पर
स्य वेति। अस्मिंस्तूच्यमाने पूर्वस्यैव भागस्योपांशुत्वं विहितं भवति नोत्तरस्य भवतीनोन्तिं तत्र
संशयः। इडोपहूतामनुष्याः॥ देवीदेवपुत्राः इति त्रीण्यवसानानि॥ उपहूयावांतरेडां प्राश्नी
यात्‌ सर्वपूरुषाः सर्वपुरुषा इति वा॥ उपहूयेत्यनूच्यमाने हविर्जुषंतामिति निगदांतः स्यात्।
तस्मिन्नुपहूत इत्यवांतरेडाभक्षणमंत्रः स्यादिडाभागमिति वानयोर्विकल्पार्थो वाश
ब्दः सर्वपूरुषाः सर्वपुरुषा इति पदद्वयविशिष्टश्चमंत्र इत्येते दोषाः स्युः एतस्मिंस्तूच्य
माने तस्मिन्नुपहूत इत्येवमंतो निगदः स्यात्। पूर्वः इति शब्दो निगदैकदेशः स्यात्‌ वाश

श्रौ० द्वि०
२८

द्रव्यमंत्रावयवविकल्पार्थत्वस्यात्। सर्वपुरुषा इत्यंतस्य ज्ञात् नैनावानेव च मंत्रस्यात् इ
येवं सर्वसमंजसं भवति। होतावांतरेडां भक्षयित्वेडामपि भक्षयेत्। सर्वे च सयजमा
ना इडां भक्षयेयुः इडा सर्वेषामिति पशुविभागे दर्शनात्। शाखांतरे च यजमानपंच
मा इडां भक्षयेयुरिति दर्शनाच्च॥७॥ मार्जयित्वानुयाजैश्चरंति॥ मार्जनं इडाभक्षणांगं
पित्र्यायामिडाभक्षणाभावे मार्जनस्याप्यभावदर्शनात्॥ भक्षयितुं मार्जने दृष्टश्चोप
कारोऽस्ति शुद्धिर्नाम। इतः इडांतकर्मस्वपि मार्जनमस्त्येवमेनैतदनुयाजांगं चतुर्धाकरणद
क्षिणादानाभ्यां व्यवहितत्वात्॥ पित्र्यायामनुयाजसत्तायामपि तदभावदर्शनाच्च।
अतो मार्जयित्वानुयाजैश्चरंतीति वचनं चतुर्धाकरणदक्षिणादानयोरनित्यत्वसू
चनार्थं। तथा ह्यनाग्नेयेषु चतुर्धाकरणं नास्ति अंगभूतेषु दक्षिणादानं नास्तीति॥

राम
२८

परिस्तरणैरंजलिमंतर्धीयापत्र्यासेचयतेतन्मार्जनं॥ आहवनीयस्यपरिस्तरणैः

भक्षणार्थीनिष्क्रम्यपुनःप्रविष्टानां प्रथमप्राप्तत्वात्तेषामासेचयतेऽयः सहकारि

णा॥ देवाद्यो नुयाजाः॥ देवाद्यौदेवशाह्लादयइत्यर्थः॥ पुनरनुयाजग्रहणंउ

त्तरसूत्रस्यप्रयाजानुयाजार्थत्वाय॥ वीतवत्पदांताः॥ वीतवत्पदांताः॥ वीतवत्पदां

तत्वंप्रयाजानुयाजयोर्गुणःस्यात्॥ त्रयः॥ तेनुयाजास्त्रयोभवंति॥ एकैकंप्रेषितो

यजति॥ देवान्यजेतिप्रथमसंप्रेषस्यसर्वार्थत्वेसत्यपिपुनःप्रेषितएवयजेत्॥

इमेनुयाजाः॥ देवंबर्हिर्वसुवनेवसुधेयस्यवेतु॰ नमोवाकेवीहीत्यनवानंवा॥ अ

मत्स्तेत्यत्रावसायवा॥ अनवसायवौजेत्॥ च॥ सूक्तवाकायसंप्रेषितइदं॰ मिदंह

विरजुषतावीवृतमहोज्यायोकृतेत्युपसंतनुयात्॥ असि॥ सा॥ अभयंकृतो॥ विदि

य

अकृतेति चाग्र्वक्रातामक्रतेत्येवं यजमानस्यनाम्नी। मानुषाः इत्यवसानानि सर्वाणि नि
गदे। अत्र तु प्रथमा विधानं द्वितीयानि वृत्त्यर्थः। आविदीत्यत्रावसाय प्रथमया विभक्त्या
दिश्य देवतामिदं हविरित्युपसंतनुयात्। एवमुत्तराः॥ उत्तरा अपि देवता आदिश्य इदं हवि
रित्येवमुपसंतनुयात्॥ अक्रातामक्रतेति यथार्थं॥ द्विदेवतबहुदेवतयोरेव मूहः कर्त्त
व्यः। यथार्थवचनं अर्थवशेनाभिधानमित्येवमर्थः॥ उक्तमुपांशुः॥ आवहस्वा होतु
क्तमित्यर्थः॥ उक्तस्य वचनमस्य निगदस्य पश्चावपीष्टिवद्देवप्रयोगार्थं न सूक्तवाकप्रै
षवद्जुषतादीनामुपांशुत्वं भवति॥ आवापिकांतमनुद्रुत्य देवा आज्यपा० मे हग
तिवीमस्येदं नमो देवेभ्य इति॥ आवापिकांतमित्येतदावापिकदेवताक्रमप्राप्त्यर्थ
तिनास्थानि न्यत्रापि निगद्यते। देवा आज्यपा इति यथासूत्रं। असावसावित्यत्रयज

मानस्यनामनी प्रथमयाविभक्त्या निर्दिशेत्। सांव्यवहारिकं नाक्षत्रं च॥ होतुर्गुरुरस्त्वेद्य
जमानस्यातत्त्सं निधोउपांशुनाम नीव्रयात्॥९॥ शंयुवाकायसंप्रेषितस्तच्छंयोराहृणीम
हइत्याहानुवाक्यावद प्रणवा॥ अनुवाक्यावद्वचनमेकश्रुत्यप्रापणार्थं। अप्रण
वामितिप्रणवो निषिध्यते॥ वेदमस्मिन्नपच्छत्यध्वर्युः॥ वेदग्रहणकालज्ञापनार्थमे
तत्सूत्रं। अतोध्वर्युणादत्तेगृह्णीयात्। अदत्तेपिस्वयमेवगृह्णीयाद्वेदोसिवेदोविदेयेति।
तमितिविस्यष्टार्थं यदाह्वोदद्यात्तदातंतंगृह्णीयाद्द्वौयुगपद्दद्यात्तदोहेनमंत्रं ब्रूयात्व
रुणप्रघासादिषु॥ उद्वासुषेत्येतेनो पोत्थायपश्चात्प्राङ्० अग्निंगृहपतिमित्याज्येनय
जंति॥ एते भावातिवचनंप्रकृतिविकारेनेभावेपिकृत्स्नस्यमंत्रस्य प्रापणार्थं। आज्य
वचनंपत्राज्येनसोमइज्यतेतत्रैते याज्यानुवाक्ये भवतः नान्यहविष्के सोमइति। यजंतो

श्रौ० सू० ३०

तिवचनं याग एव तासां देवतानां न निगमेष्वनुवृत्तिरिति ॥ आप्यायस्व समेतु ते सं ते पयांसि०
हव्यवाळग्निरजरः पिता न इति पत्नीसंयाजाः ॥ इदं संज्ञाविधानार्थं ॥ अथ प्रजाका
मो० प्राग्गृहपतेर्यजेत ॥ अथशब्दः पक्षान्तरपरिग्रहार्थः । अथ चेद्यजमानः प्रजाकामः
स्यात्तदैवैता देवता यजेतेति ॥ प्राग्गृहपतेरिति देशविधानेन पूर्वाभिः समुच्चयं दर्शयति ॥
राकामहं सिनीवालि कुहूमहमिद्वे द्वे याज्यानुवाक्ये ॥ याज्यानुवाक्यावचनं प्रजाका
मो यजेतेत्यनेन यजमाने संनिहितेपि होतैव कर्ता स्यादिति । याज्यानुवाक्ययोर्होतृकर्तृ
त्वमन्यतः प्रसिद्धमिति । कुहूमहमिति प्रतीके गृहीतेपि स्वयमेव पठति ॥ कुहूमहं सुवृतं
विद्मनापसं ते ळासु पह्यस र्वा प्राश्नीयात् । पर्वाजनाद्युपक्रान्तं तं कार्यं नात्रावान्तरेळा ।
पाणितलस्थमाज्यमिळेत्युच्यते । ततः सर्वा प्राश्नीयादित्युच्यते ॥ शंयुवाको भवेन्नवा ॥

राम ३०

आज्येळायाऊर्ध्वंपुवाको भवति।नभवतिवेत्यध्वर्यूणांसंस्थाप्रकाराःसंतीतितत्सूच
नार्थमेतत्सूत्रं।यदिस्याद्धोतापितथाकुर्यादित्येवमर्थं॥१०॥वेदंपत्न्यैप्रदायवाचये
द्धोतां०तंविदेयप्रजांविदेयकामायत्वेति॥ पत्न्यैवेदंप्रदायतांवाचयतिहोताध्वर्युर्वा।वे
दोसीत्यादिकामायत्वेत्येवमंतंमंत्रं।वाचनमंत्रस्योत्तेः प्रयोगेप्योक्तिध्यति॥कार्यंतुलिं
गजनितमेव॥वेदशिरसानाभिदेशमालभेतप्रजाकामाचेत्॥यदिपत्नीप्रजामेस्या
दितिकामयेततदावेदस्यजानुसदृशेनप्रदेशेनपत्नीस्वनाभिमालभेत।कामाभावेपि
वाचनंभवत्येव॥अथास्यायोक्त्रंविचृतेत्प्रत्वामुंचामिवरुणस्यपाशादिति॥अथेतिसं
बंधार्थः।तेनकामाभावेवाचनानंतरंयोक्त्रविमोकःस्यान्नत्वालंभनमपीति।अस्या
इतियोक्त्रविमोचनंहोतृकर्तृकमितिदर्शयति॥तत्प्रत्यग्गार्हपत्यादिगुणं०वेद

तृणानि करोति॥ तद्यो क्त्रं द्विगुणं कृत्वा गार्हपत्यात्प्रत्यक्प्राक्याशं प्राङ्मूलाग्नप्रदे
शमित्यर्थः। तं निदध्यात्। योक्त्रस्य मूलप्रदेशः पाशः पाशशब्दोत्र मूलाग्रयोः प्रद
र्शनार्थः। अस्य योक्त्रस्योपरिष्टाद्दर्भतृणान्युदगग्राणि निदध्यात्॥ पुरस्तात्पूर्णपा
त्रं संश्लिष्टं वेदतृणेः॥ तृणेभ्यः पुरस्तात्तृणैः संश्लिष्टं पूर्णपात्रं निदध्यात्॥ अभिमृश्य वा
चयेत्पूर्णमसि पूर्ण० अक्षितिरसि मा मे क्षेष्ठा इति॥ अभिमृश्याभिमर्शनमित्यर्थः। तां चा
भिमृशंतीं वाचयेत्। प्रसगाद्यी सून्मंत्रस्य॥ अथैनां पूर्णपात्रात्प्रतिदिशमुदकं० प्र
जापतिमीजीयतां मा जीयंतामिति वा॥ पूर्यपात्रादुदके गृहीत्वा तदुदुक्षन्। तां चैवं कुर्व
त्या वाचने मंत्रलिंगस्य विरोधाभावादुदुक्षणमपि विधीयते। पूर्वत्र तन्मंत्रलिंगादेवा
भिमर्शनं अकुर्वत्यामंत्रोच्चारणं न संभवतीति न तस्याभिमर्शनं विहितं। मार्जयंतामिति वेति

परमात्राविकल्पः॥ अथास्याउत्तानमंजलिमध्य॰ स्वंपाधोऽत्रयीथेति॥ योक्त्रस्याधस्तात्प
त्न्यंजलिमुत्तानमात्मनश्चसव्यंपाणिमुत्तानंनिधायपूर्णपात्रंनिनयन्नुमाहंप्रजामिति
तांवाचयेत्। यथातंनिनीयमानमुदकंहस्तेष्वेवपतेत्। तथानिनयेत्प्राङ्मुखत्वमत्रनाद्रिय
ते। अधस्तादंजलिनिधानस्यादृष्टार्थत्वप्रसंगात्। अत्रपत्नीद्वित्वबहुत्वेसर्वासांवाचनंकर्त्त
व्यंप्रतिपत्नीयोक्त्रविमोचनमावर्त्तते। सर्वेषांयोक्त्राणांद्विगुणीकृत्यनिधानंभवति।
निनयनेनसर्वासांस्वयोक्त्रसंपृक्तोदकलाभायोद्दक्षणेपिसर्वासामन्वयः। वाचनेवा
च्यमंत्रलिंगजनितकार्याभावेपिवाच्यस्यपुरुषस्यवायंसंस्कारइत्यवगंतव्यं। यएते
पत्नीसंबंधाःपदार्थाःतेसर्वेपरस्परसंबद्धाः। अथशब्देनतच्छब्देनान्येनवाअतस्तेस
र्वेसहैवकर्त्तव्याः। नैकैकशः। वेदस्तृणान्यग्रेगृहीत्वा॰तंतुतन्वन्त्रजसोभानुमन्विही

ति॥ वेदबंधास्यमुक्तत्वात्तृणानीत्युच्यते॥ नि दक्षिणेन हस्तेनाग्रप्रदेशे गृहीत्वाऽग्र
विधून्वन् विष्वक्त्केनाकं प्रयगाग्र्हपत्यादारभ्य सव्येन हस्तेन संततं स्तृणं नाहवनीयं
गच्छति॥ ते तुं नन्वग्निं त्वास्तरणमंत्रः॥ नु गमनमंत्रः ततो मंत्रांते स्तरणारंभः॥ शेषं नि
धाय प्रत्यगुदं० त्स्वाहाकारांतैर्मंत्रैर्न चेन्मंत्रे पठितः॥ शेषं निधायेति वचनात्तृ
णि न सर्वाणि स्तरितव्यानि यमेन शेषितव्या॥ नीति गम्यते॥ आज्यस्थाल्याः स्त्रु
वेणाज्यमादायाहवनीये स्त्रुवेणेव जुहुयात्॥ आहवनीयात्प्रत्यगुदगवस्थाय
सर्वप्रायश्चित्तानीति संज्ञैषां होमानां स्वाकारांतैर्मंत्रैर्मंत्रांते स्वाहाकारं कृत्वेत्यर्थः॥
न चेन्मंत्रे यत्र क्वापि स्वाहाकारो न पठितः॥ तदांते स्वाहाकारः कर्त्तव्यः॥ यत्र क्वापि पठित
श्चेत्स एव प्रदानार्थो भवति॥ यत्किं चाविषितो यजेदन्यत्रापि॥ यः कश्चनासिंक्ताल्लेदेवतो

द्दिशेन द्रव्यत्यागात्मको व्यापारो यागो होमो भ्याधानं बलिहरणादयो वा मंत्रेण साध्यंते
तत्र सर्वत्र स्वाहाकारः कर्त्तव्य इति सूत्रार्थः॥ अन्यत्रेति वचनं गार्ह्येष्वपि प्रापणार्थं। अप्रे
षितइति वषट्कार समुच्चय निवृत्त्यर्थं॥ एवंभूतो व्यक्त होमाभ्याधानोपस्थानानि च॥ एवं
भावो नाम एवं प्रकारत्वाहवनीयात्पूर्व गुह्यदेशे स्थित आज्यं स्रुवेणादायाहवनीय इति।
एवं प्रकार विशिष्टः कर्त्ता एवंभूत इत्युच्यते। विशेषणपरोयं निर्देशः। अव्यक्त शब्देना
विहित विशेष उच्यते॥ यत्र होमाभ्याधानोपस्थानान्यविहित विशेषाणि विधीयंते तत्रा
नेन प्रकारेण कर्त्तव्यानीत्यर्थः। एकदेश विशेषे चाप्यपेक्षित मात्रमस्मात्क्रियते॥
अयाश्चाग्नेस्यनभिशस्ती श्च० स्वः स्वाहा भूर्भुवः स्वः स्वाहेति॥ एकमंत्राणि कर्माणीति
न्यायेन द्वाभ्यां द्वे आहुती होतव्ये। व्याहृतिभिरिति निर्देशं कृत्वा पुनः पठितेन ज्ञापते

व्याहृत्युपदेशोनेनक्रमेणैतेचत्वारइति॥कृत्वासंस्थाजपेनोपस्थायतीर्थेननिष्क्र-
म्यानियमः॥स्यादितिशेषः।कृत्वेतिवचनंसंस्थाजपेनहोमस्यसंबंधार्थं॥यत्रसं-
स्थाजपेनहोमस्यसंबंधार्थं।यत्रसंस्थाजपोस्तितत्रप्रायश्चित्तहोमोपिभवतीति।अ-
तःखंडेष्वपिसंस्थाजपस्यप्रयोज्यत्वात्प्रायश्चित्तहोमोपिप्रयोज्यएव।उपस्थाया-
तेतीर्थेनैवनिष्क्रामेत्।निष्क्रम्यानियमइत्यर्थलुप्तानियमादित्यर्थः।अर्थलुप्तत्वे
सत्यपिअनियमविधानंकर्ममध्येपितीर्थेननिष्क्रांतस्याव्याहृत्यादयोनियमा
नभवंतीति।तेनप्रयोगमध्येमार्गांतरेणनिष्क्रांतस्यापिनियमाभवंत्येवेतिज्ञायते
॥ॐ चमेस्वरश्चमे॰ तस्मैतेनमइतिसंस्थाजपः॥अन्वर्थसंज्ञेयंतेनायंसोमेष्विपुन-
भवति॥इतिहोतुः॥इतिशाब्देनांतेनावत्वमुच्यते।एतावदेवहोतुर्नान्यदितिहोतृगृह्यं

होतुरेरैतावता आग्नीध्रस्यान्यदपीति ॥२१॥ अथ ब्रह्मणः ॥ अथ शब्दो धिकारार्थः ॥ इद
नीं ब्रह्मणो पि विधयो वक्ष्यन्त इत्यर्थः ॥ होत्राचमनयज्ञोपवीतशौचानि ॥ व्याख्यातानीत्य
र्थः ॥ स्नानाचमनादिना शुचिर्भूत्वा ब्रह्मत्वं करिष्यामीत्यागुरितो विहारं प्रविश्यान्त्र पु
नाहृते यज्ञोपवीत्येव स्यादिति ॥ शौचग्रहणं तु कृत्वर्थमपि अशुचित्वसंपादि
दिहाराद्बहिः कर्त्तव्यमिति ॥ एतच्चाप्राप्तं विधीयते । अयमपितीर्थेन विहारं प्रपन्न इति
प्राक् चेष्टतास्यने ष्यते यज्ञमनादूतिकर्माभिमुख्य एव यज्ञमनस्त्वोपपत्तेः ॥ अंकध्या
रणमुपवेशागतया प्राप्तमदृष्टार्थता परिहारायैव यावदासनमनुवर्त्तते । तत्र चेत्क
र्मेत्यस्यापि संबंधाद्व्यावृत्तिरविशिष्टेव दक्षिणां गतया चतत्र चेत्कर्मेत्यस्य उत्तरांग

त्विना विशेषादस्यापि भवति ॥ नित्यः सर्वकर्मणां दक्षिणतो ध्रुवाणां व्रजतां वा ॥ त्वन्त्यन्तः प्राप्तस्य ब्रह्मणो यं नियम उच्यते । ध्रुवाणां व्रजतां च पुरुषाणां यानि कर्माणि तेषां दक्षिणतो नित्यो भवेत् । प्राकृतानाम प्राकृतानां च ध्रुवाणां नित्यं दक्षिणत्वं ध्रुवेणैव कर्तुं शक्यत इति ध्रुवेषु ध्रुवत्वं भवेत् । व्रजतां कर्मसु नित्यं दक्षिणत्वाय व्रजनेव भवेत् । ध्रुवाणां व्रजतामिति कर्तृविशेषणेन कर्मणां ॥ नित्यत्वमत्रोपक्रमप्रभृत्यापरिसमासेर्दक्षिणत्व सिध्यर्थं वा शब्दः समुच्चयार्थः ॥ कचित्कर्मणि कश्चित्तिष्ठति कश्चिद्व्रजति तत्र भूयसां धर्मः परिगृह्यते ॥ बहिर्वेदि यादिशं व्रजेयुः सैव तत्र प्राची ॥ यत्र बहिर्वेदि वसतीवरी ग्रहणादि कर्तुं यां दिशमभिमुखा व्रजंति सत्विजः तत्र तामेव दिशं प्राचीकृत्वा दक्षिणतो भवेत् । सैव त

त्रेतिवचनात्। तिष्ठतामभिमुखएव प्राचीभवेत्॥ चेष्टास्वमंत्रासु स्थानासनयोर्वि
कल्पः॥ अमंत्रेषु मंत्रेषु स्थानमासनंवाभवेत्। वाशब्देनैव विकल्पे सिद्धे विकल्प
वचनमव्यवस्थयाविकल्पसिध्यर्थं तेनैकस्मिन्नपि प्रयोगे क्वचिदासनं
क्वचित्स्थानमितिलभ्यते॥ तिष्ठद्धोमाश्च ये ऽवषट्काराः॥ तिष्ठतां ये होमावषट्का
ररहितास्तेषु च स्थानमासनंवाभवेत्॥ आसीतान्यत्र॥ अन्यत्रेत्यनंतर
सूत्रद्वयविषयादन्यत्रेत्यर्थः॥ समस्तपाण्यंगुष्ठोग्नेणाहवनीयंपरीत्य दक्षि
णतः कुशेषूपविशेत्। समस्तौ पाणी अंगुष्ठौ चयस्य सोयं समस्तपाण्यंगुष्ठः
सव्येनपाणिना दक्षिणं पाणितलप्रदेशं गृहीत्वा तद्दक्षिणेन सव्यांगुष्ठं एवंकृते
पाणी अंगुष्ठौ च समस्तौ भवतः। एवंभूतोग्नेणाहवनीयंपरीत्य तस्य दक्षिणतः

श्री·वृ०
३५

कुशेषूपविशेत्॥ निरसनं कृत्वा कुशग्रहणात्संभवे तएवासने प्रकल्प्यंते। दक्षि
णात इति पुनर्वचनमाहवनीयस्यैव दक्षिणतो न क्रियमाणस्य कर्मण इत्येव
मर्थं॥ बृहस्पतिर्ब्रह्मा ब्रह्मसदन आशिष्यते बृहस्पते यज्ञं गोपायेत्युपविश्य
जपेत्॥ उपविश्यग्रहणं सकृदुपविश्य पुनरपि कर्मणाए वदक्षिणतो न भवे
त्। आसमाप्तेस्तत्रोपविशेदिति॥ एष ब्रह्मजपः सर्वयज्ञतंत्रेषु साग्नौ यत्रोपवे
शनं॥ एष मंत्रो ब्रह्मजपसंज्ञो भवति देशशब्दमनपेक्ष्य सर्वेषु यज्ञेषु भवति। तंत्र
ग्रहणं पाकयज्ञेष्वपि प्राप्तिर्णार्थं। पाकयज्ञानामेततंत्रमिति तंत्रशब्दत्वात्तेषामि
ति। साग्नौ यत्रोपवेशनमित्यग्निप्रणयनेन साग्निके कर्मणः प्रतिपन्ने यस्तेपवे
शनं विहितं तत्रायं जपो भवति। एतादुक्तं भवति। एष जपः सर्वेषु यज्ञेषु विश्मा

राम
३७

त्रेभवेत्। अग्निप्रणयनवत्अग्निप्रणयनांतएवभवति॥ उपविष्टमतिसर्जेयते॥
अनुज्ञालाभार्थमंत्रेणामंत्रयतेध्वर्युरित्यर्थः। उपविश्यब्रह्मणंप्रवेशकालज्ञाप
नार्थः। यस्मिन्काले उपविष्टेस्यापवेशनानंतरमध्वर्युणातिसर्जनंभवतितस्मि
न्काले प्रविशेदित्यर्थः॥ ब्रह्मन्नपः प्रणेष्यामीति श्रुत्वा॰ त्वोंप्र— येत्यतिसृजे
त्सवचात्अध्वर्युमंत्रपाठेऽपशब्दाहितेपियाज्ञावचनेप्रणायेत्येवानुजानीया
नापः प्रणयेदित्यपि। श्रुवेतिवचनं श्रुत्वा पश्चाज्जपेन्नसेहेति। जपित्वेतिपूर्व
स्योपांशुत्वायोत्तरस्यचतंत्रस्वरत्वाया। अतिसृजेदनुजानीयात्। सर्वत्रेतिसर्वे
ष्वनुज्ञावचनेषु अस्यविधेः प्रापणार्थं॥ यथाकर्मत्वादेशाः॥ प्राप्तस्यायंविशे
षविधिः। यस्मिन्कर्मणि अनुज्ञामिच्छतितदेवानुजानीयान्नप्रणयेत्येवयथाक

र्मकर्मानुरूपमादेशाः कर्तव्या इत्यर्थः॥ प्रणवाद्युच्चैः॥ उत्तरविवक्षार्थं॥ ऊर्ध्वंवाप्र
णवात्॥ उच्चैर्भवतीत्यर्थः॥ अत ऊर्ध्वं वाग्यत आस्त आ हविष्कृत उद्वादनात्॥ प्रणी
ताप्रणयनोपलक्षितात्कालादूर्ध्वमाहविष्कृतं चोच्चारणाद्वाग्यतो भवति। आस्त
इति वचनं अग्नेत्रेष्वपि कर्मस्वस्मिन्नवसरे आसनमेवेति नियमार्थं॥ आमार्ज
नात्पशौ॥ पशौ वह्निप्रणयनमारभ्य आ चात्वालमार्जनात् वाग्यतो भवेत्॥
सोमे घर्मादिचातिप्रैषादि चा सुब्रह्मण्यायाः॥ घर्ममारभ्यातिप्रैषं चारभ्या सु
ब्रह्मण्यायां वाक्संयमः॥ सोमग्रहणं पश्वधिकारात् पशुनामक एव सोमे स्यादि
ति तं निवर्त्य सर्वसोमेषु प्रापणार्थं॥ प्रातरनुवाकाद्यान्तर्यामात्॥ प्रातरनुवाक
लक्षितोत्कालादूर्ध्वं आ अन्तर्यामग्रहयागात्। अन्तर्याम होमादित्यर्थः॥ हरि

वतोनुसवनत्रयेपि पुरोळाशप्रचारमारभ्यापुरोळाशेळायाः॥स्तोत्रेष्वतिसर्जनाद्यावषट्कारात्॥स्तोत्रादौस्तुध्वमिति उपाकरणं। तदादिआराशस्त्रयाज्यावषट्कारानुमंत्रणाद्वाग्यतोभवेदित्यर्थः॥ ॐ इचः पवमानेषु॥ पवमानस्तोत्रेषूपाकरणादारभ्यओ उदृचः। उदृगितिसमाप्तिरुच्यते॥ यज्ञकिंचमंत्रवत्॥ सर्वमंत्रवति कर्मणिवाग्यमनंभवति॥ होत्राशंसः॥ उक्तादन्योयोविषयस्तत्राप्यस्यवाग्यमनंहोतृतुल्यंभवति। आतोवाग्यमनमित्यादिनियमोस्याप्यधिक्रियत इत्यर्थः॥ आपतिश्च॥ आपद्यातोदेवाश्चर्वंतुनइति जपेदित्युक्तत्वादेतत्प्रायश्चित्तमापत्तिरित्युच्यते। अनंतरोक्तैर्नवभिः सूत्रैर्विहितस्यवाग्यमनस्यभ्रेषएतदेवप्रायश्चित्तमित्यर्थः॥ अन्यत्रैवभूरित्याहुतिः॥ यत्रत्वग्निः प्रणीयेतपिससोमेतदादित

त्रवाग्यमनं॥ विहितएव वाग्यमनेतद्दादित्वमात्रमत्रविधीयतेतुशाह्मसमन्वया
त अपि ससोमे सोमसहिते अग्नीषोमप्रणयने पीत्यर्थः। तत्रवचनं यस्मिंनह
नि अग्निः प्रणीयते तस्मिंनेवाहनि कर्मप्रवृत्तौ तदादि वाग्यमनं न पूर्वेद्युः
प्रणयने तदादित्वनियमः॥ तथा ह्यसद्यस्कालेषु पूर्वेद्युः प्रणीयते वरुणप्रघा
सादिषु॥ दक्षिणतस्थ्व्रजन्जपत्यायुःशिसानदूति सूक्तं॥ सूक्तग्रहणं व्रज
न्जपतीति व्रजतो जपविधानात्। व्रजनसमाप्तावपि कृत्स्नसूक्तप्रयोगवि
धानार्थं। दक्षिणतो व्रजनविधानं दक्षिणतो व्रजत एवायं जपस्यान्नाग्निं सोमं वा
प्रणयतः तदा ह्यग्रेणागच्छतीति॥ समाप्योपवेशनाद्युक्तं॥ समाप्येति वचनं
समाप्योपवेशनादपि यदुक्तं तदेव कुर्यान्न सूक्तावृत्तिं गमनापरिसमाप्तावपी

ति। आदिग्रहणेन ब्रह्मजपः परिगृह्यते उपवेशनग्रहणेन निरसनमपि गृह्यते।
सहचारित्वात् एतत्त्रयमग्निप्रणयनाग्नीषोमप्रणयनयोरन्ते विधीयते तेन सूत्रे
ण साग्नेोयत्रोपवेशनमित्यनेन साग्निप्रणयनेषु पश्वादिषु कर्मसु अग्निप्रण
यनांत एव ब्रह्मजपो नान्यत्रेति नियम्यते॥ न तु सौमिके प्रणयने ब्रह्मजपः॥ सो
ऽन्यत्र विसृष्टवागबहुभाषी यज्ञमनाः॥ यज्ञमनाः क्रियमाणपदार्थपरामर्शी वि
सृष्टवागपि यज्ञमनास्यादिति योगविभागः कृतः॥ विपर्यासेंतरितेमंत्रे॰ जात्वा
च्याहुतिं जुहुयात्॥ विपर्यासो व्युत्क्रमः। अंतरिते निगमने। मंत्रयोः कर्मणोर्वा
विपर्यासेंतरिते मंत्रे कर्मणि वा स्वयमुपलक्ष्य परेण वाख्याते दक्षिणं जानुनिपात्य

वक्ष्यमाणेन मंत्रेण यक्ष्यमाणो ग्नावाज्याहुती जुहुयात्॥ सर्वत्र जानुनिपातन
मुपस्थस्योत्तानत्वाविरोधेन कर्त्तव्यं। नन्यग्भावेन केनचित् स्वकारेणाशंवस्मादि
नादोषनिबंधनात् व्याख्यातोपलक्षणग्रहणामन्यस्मिंनपिविषये यथाकथं वि
ज्ञाते एतत्प्रायश्चित्तं भवतीत्येवमर्थं तेनैवमस्य सूत्रस्यार्थो वगंतव्यः। सर्वेषु शेष
षे तत्प्रायश्चित्तं सामान्यरूपेण भवति। यदन्यत् त्रेषविहितं तदस्यापवादकं भव
ति। विपर्यासांतरितयोरत्र भेदेन ग्रहणात्तद्विषये विशेषेणाप्यस्य समुच्चयो भव
ति सर्वेषां नैमित्तिकानामयमुत्सर्गः निमित्तादनंतरं कर्त्तव्यमिति यस्य पुनर्बलव
ताप्रमाणेनानंतरं कर्त्तुमसंभवति। तस्य यावत्संभवमुत्कर्षो नात्यंतमिति वा शब्द
स्याद्विरुच्चारणं न्नात एव निमित्ते एतत्प्रायश्चित्तं न पूर्वोक्त सर्वप्रायश्चित्तवदज्ञातेपी

तिज्ञानार्थंत्र्याहुतिमित्येकवचनं बहुष्वपि निमित्तेषु युगपत्प्रज्ञातेष्वेकैवाहुतिः कर्त्त
व्यानप्रति निमित्तमितिज्ञापनाय॥ सक्तश्चेत्स्यूरिति गार्हपत्योय्य जुष्टोभुव इतिदक्षि
णेत्र्याग्नीध्रीयेसोमेषु॥ प्रागाग्नीध्रीयप्रणयनात्सोमेपि दक्षिणाग्नावेव दक्षिणा
ग्न्यर्थत्वादाग्नीध्रीयप्रणयनस्य॥ सामतः स्वरित्याहवनीये० भूर्भुवः स्वरित्याहव
नीय एव॥ यदा सर्वेभ्यो वेदेभ्यो युगपद्दोषास्त्र्यागच्छेयुः तदा समस्ताभिरेकाहुतिरा
हवनीय एव कार्या एवकारग्रहणं समस्ताभिरेकाहुतिराहवनीय एवेति ज्ञापनार्थं।
त्र्यविज्ञात इति स्मार्तानां शेषो वाचमनादीनां शेषस्य व्यापणार्थं। एते ऋगाद्याः श
ब्दा वेदवचना न जातिवचनाः॥ प्राक्प्रयाजेभ्यो गारं बर्हि० नमो यत्र निषीदसीति॥ प्राक्प्र
याजेभ्य इति स्रुगासादनात्प्राक्छिन्नं संगृह्णाते बर्हिः परिधीत्यस्य परिधिशब्दस्यादेशो

श्रौ०वृ०
३९

पलक्षणार्थत्वात्सर्वतो निर्वृतं गृह्यते तच्च वक्ष्यमाणैः सूत्रैः स्पष्टयति ॥ अमुं माहिंसीरमुं
माहिंसीरिति च प्रतिदिशं ऐन्द्राग्नीध्रयजमाना उत्तरतः ॥ अध्वर्युं माहिंसीर्यजमानं माहिंसी
रित्येवमेतेन मातपत्यनेन पुरस्तान्निर्गतमभिनिदध्यात् । एवमुत्तरेष्वपि प्रयोगो द्रष्ट
व्यः ॥ चशब्दो मुमादेः पूर्वेण समुच्चयार्थः ॥ दिगनुक्रमेण प्रतिदिशं शब्दार्थः सिद्ध एव प
त्प्रतिदिशंग्रहणं तज्ज्ञापयति । सर्वदिक्संबद्धकर्मानेन क्रमेण कर्त्तव्यमिति ॥ अ
थैनमनुप्रहरेद्दाहंयज्ञं ० रहनो देवामपि शर्म यच्छेतेति ॥ न स्वाहाकारान्तं ॥ तमभिजु
यात्सहस्र ० गोपोषे च यच्छ स्वाहेति ॥ तमिति प्रहृतमेवांगारमभिजुहुयादित्यर्थः ॥
२२ ॥ प्राशित्रमाह्रियमाणमीक्षते ० त्रिरनेनाभ्यात्ममपोनिनयेद्यज्ञो ॥ तदित्याहृतस्य प्रति
ग्रहणार्थं नाह्रियमाणस्येति त्रं तर्वेदिकुशेषु प्रागग्रं दंडं प्राशित्रहरणं निधायानंखा

राम
३९

दन्त्वाश्नीयात्। असंखादं दंतैरपीडयंनित्यर्थः। शौचार्थमाचमनं कृत्वा पश्चान्मंत्रेणा
पः पिबेत् पुनरपि प्राग्वत् शौचार्थमाचमनं कुर्यात्। अनेन प्रक्षालितेन प्राशित्र
हरणेनात्मानमभिमुखेन हस्तेन च तथाभूतेनात्मनः पुरतस्थिरपः सिंचेत्॥ मार्ज
यित्वास्मिन्ब्रह्मभागं निदध्यात्। सर्वैः कर्तृभिरिडाभक्षणस्यानुष्ठेयत्वात्तदंग
त्वाच्च मार्जनस्यास्मिन्नवसरे अयमपीडां भक्षयित्वा मार्जनं च कृत्वा ततः पश्चा
च्चतुर्धाकरणे कृते ब्रह्मणश्चानीतं ब्रह्मभागं प्राशित्रहरणे निदध्यादित्यर्थः॥
पश्चात्कुशेषु यजमानभागं॥ यस्मिन्देशे प्राशित्रहरणं निहितं तस्य पश्चात्कु
शेषु यजमानभागं निदध्यात् न प्राशित्रहरण इत्यर्थः॥ अन्वाहार्यमवेक्षेत प्र
जापते॰ अस्मिंस्वलोके मुष्मिंश्च॥ इति कारणाध्याहारेण सूत्रच्छेदः॥ प्राणापा

नो मे पाहि कामाय त्वेस० ब्रह्मभागेनिदध्यात्॥ अन्येनांगेनास्पर्शं न वजिघ्रेतेअ
न्वाहार्य। प्राणापानावित्यादिना [illegible] पुलाकमात्रमित्यर्थः॥ तन्मात्रमन्वाहा
र्यात् गृहीत्वा ब्रह्मणो भागे निदध्यात्॥ ब्रह्मन्प्रस्थास्याम इति श्रुत्वा बृह० स
यज्ञपतिं पाहि समां पाहि॥ अन्वायुमंत्रपाठः प्रस्थास्यामः प्रस्थास्यामीति वा
श्रुत्वो प्रतिष्ठेत्येवानुज्ञावचनं ब्रूयादित्येवमर्थं॥ भूर्भुवः स्वर्बृहस्पतिप्रतिप्रसूत
इति जपित्वा प्र० त्त मितरेन्वालभेरन्॥ भूर्भुवः स्वरित्यादेः पाठः समुच्चयार्थः॥
समिद्धहवं समिदाधानानुज्ञानमपि सत्प्रतिष्ठेत्येवं रूपमेव भवति॥ नाधेहीत्ये
वं रूपमेव भवति॥ नाधेहीत्येवं रूपं सत्विजां कर्मसु संस्थितेषूपरतेयजमा
नकर्मणि जघन्यः सन्सर्वप्रायश्चित्तानि जुहुयात्॥ अत्राग्नीध्रोनारभेतब्र

स्नाणंबहुवचनंविकल्पार्थं॥ होतारंवा॥ होतारंवेतरेन्वालभेरन्॥ एतयोर्नित्यहोमः॥
होमएवैतयोः कार्यो नान्वारंभः परस्परद्रुत्यर्थः॥ सर्वेसंसृष्टा जपेनोपतिष्ठंत
उपतिष्ठंत॥ सर्वेहोमकर्त्तारोन्वारंभकर्त्तारश्चेत्यर्थः॥ १३॥ इत्याश्वलायनसूत्रवृत्तो
नारायणीयायांप्रथमोध्यायः॥ ॥ पौर्णमासेनेष्टिपशुसामा उपदिष्टाः॥ प्रथमे
ध्यायेदर्शपूर्णमासौव्याख्यातोविध्यंतसहितौइत उत्तरत्रेष्टयः पशवश्चवक्ष्यंते
विध्यंतरहिताः तेषांचमिविध्यंतापेक्षास्ति यथाहनहि तत्करणं लोकेवेदेवाकिंचि
दीदृशं इतिकर्त्तव्यतासाध्येयस्यनानुग्रहेर्थितेतिएवंचतदपेक्षायांसत्यां तदपिवै
दिकमेवश्रौतमेवेत्यपिसिद्धे श्रौतेषुचाग्निहोत्रिकदार्शपौर्णमासिकसौमिकेषुत्रिषुसत्स्व
स्येदमितिविध्यंतविशेषग्रग्रहणेचोदनासामान्यंस्वरूपसामान्यंचमुक्तान्यस्यालिंगस्या

श्रौ०व्व०
४१

भावात्तैरेव विशेषलिंगैर्विध्यंतविशेषः परिगृह्यते। तानीमानि विध्यंतविशेषग्रहण
लिंगानि। निर्वपेत्तद्धितश्चाज्यमोषधत्वंपयोदधि। कपालानि च तत्संख्या देवताशब्द
एव च। तस्मिन्नष्टसंख्या च तद्वाच्ये च्छेकबद्धूपि। द्रव्यत्वं प्राकृतः शद्बो हविषः प्रभवो
दित्वा। एतद्वाक्यपाशब्दश्चतद्वदित्युपदेशनं। नामधेयं तथा व्यक्तचोदना चान्य
दीदृशं। लिंगान्येतानि चोन्यानि गुरूपाचलघुनि च। समीक्ष्य प्रकृतिश्चेयति श्व
तिकल्पना॥ द्रव्यदेवतयोर्यत्र विरोधस्तत्र निश्चयो तत्र द्रव्यंबलीयस्याद्देवताया इ
तिस्थितिः। यत्र सर्वासामिष्टीनां दर्शपूर्णमासौ प्रकृतीत त्रविशेषलिंगात्कासांचि
द्दर्शः प्रकृतिः कासांचित्पौर्णमासीत्येवं समीक्ष्य व्यवस्थाकल्पनीया। एवं सर्वेषांप
शूनां दर्शपूर्णमासावेव प्रकृती। तद्धितादिविशेषलिंगात्तत्राग्नीषोमीयस्य पशोरन्येषां

राम
४१

चात्रन्यायविद आहुः॥ अग्नीषोमीयस्य पशोर्दर्शपूर्णमासौ प्रकृती। तान्येषां पशू
नां। स चातिदेशिकैरौपदेशिकैरौपदेशिकैश्चासंबद्धोऽन्येषां पशूनां प्रकृतिः॥ ए
वं सत्युपकारप्राप्तिरखंडिता भवतीति सत्यमेषां न्यायविदां स्थितिः॥ किंत्वत्रक
ल्पसूत्रकाराणामेवं प्रवृत्तिः॥ सर्वेषु पशुषु दार्शपौर्णमासिको विध्यंतो दर्शपूर्ण
मासाभ्यामेव प्राग्नीषोमीयात्पशोः पासुक इति। अत एवास्मिन्सूत्रेऽग्नीषोमी
यशब्दमनुक्त्वा पशुसामान्यवाचिना पशुशब्दमेव प्रयुक्तवानाचार्यः। तेनायमतिदे
शः सर्वेषां पशूनां नाग्नीषोमीयस्यैवेति गम्यते। अत एव भाष्यकारः अथ सवनी
येनेत्यस्मिन्सूत्रे यद्दैवतग्रहणस्येदं प्रयोजनमुक्तवान् अनुक्तदेवतानामपि पशू
नां सवनीयत्वप्राप्तौ तेषामपि समाम्नातत्वं भवतीति। समाम्नातत्वे चवार्त्रघ्नाज्यभागस्य

श्रौ० सू०
४२

लाभः प्रयोजनं नान्यत। अतः सर्वपः सूनामतिदेश इति सिद्धं। तत्राग्नेय उपांशुयाजो ग्नीषोमी
य इति पूर्णमास संज्ञका यागाः। आग्नेय उपांशुयाज ऐन्द्राग्न इत्यसंनयतोमावास्यायां। संनय
त ऐन्द्राग्नस्थाने ऐंद्रं माहेंद्रं वा दधि पयसी इति। तयोः समुदाययोः पौर्णमावास्या नामनी भवतः।
अनयोस्तंत्रे साधारणं। एतावाने व भेदः प्रधानदेवताः आज्यभागयोरनुवाक्ये च। यत्र प्र
धानदेवता विकृतिषु प्रत्यक्षास्तत्रातिदेशव्यापारो नास्ति। अतः पारिशेष्यादाज्यभा
गानुवाक्ययोरेवातिदेशः फलति। एवं स्थिते ये अस्मिं छास्त्रे समाम्नाता इष्टयः परा व अ
स्वप्रकरणे ऽविशेषिताज्यभागास्तेषामप्येकेषांचिद्वचनाद्वार्त्रघ्नाज्यभागतां मत्वा
तदुपदेशार्थमेतत्सूत्रं प्रणीतवानाचार्यः। तस्यायमर्थः। उपदिष्टाः समाम्नाता इत्यर्थः।
अनुवादत्वेन चायं शब्दः संबध्यते। अतोयमर्थः सूत्रस्य ये अस्मिं छास्त्रे उपदिष्टा

राम
४३

ष्ट्यः पशावप्यापि अविशेषिता आज्यभागास्ते सर्वेवार्त्रघ्नाज्यभागाइति। पौर्णमासेनेत्य
स्यायमर्थः। पौर्णमासेन व्याख्याताइतिवार्त्रघ्नाज्यभागाइत्यर्थः। तेनासमाम्नातानामिष्टी
नां पशूनां चन्यायादेवतत्र नियमः सिद्धो भवति। तथा चोक्तमिष्ट्ययनप्रकरणे। असमा
म्नातास्वर्थात्तत्र विकार इति। तच्च पशूनामपि प्रदर्शनार्थत्वेनोक्तमिति द्रष्टव्यं। सोमगृह
पामुत्तरार्थं। अत्रापि किंचित्प्रयोजनमस्ति। याज्या धर्मानिरसनार्थश्चैवंप्रकाराः
श्रुतावनारभ्याधीता अन्यस्मिंछास्त्रे दर्शपूर्णमासप्रकरणे विहितास्तेषां प्रापणाये
ति।। तैरमावास्यायां पौर्णमास्यां वा यजेत।। तैरिष्टिपशुसोमैरमावास्यायां पौर्णमास्यां
वा याग कर्तव्य इति। इष्टिपशूनां प्रकृतिप्राप्त एवायं कालः पुनर्विधीयते। ग्रहकालतां
निवर्त्यसद्यस्कालताप्राप्त्यर्थं। किंच दर्शप्रकृतेरमासप्रकृतेः पौर्णमासीत्येवं नियमं नि

वर्त्यं स्वनियमेनउभयकालता प्राप्यर्थी प्रकृत्यविरोधात्यर्वणस्तद्वत्य होरात्रे विकृतिःक
र्तव्या। यदाह्नः पूर्वभागे पर्वस्यात्तदा प्रकृतिंकृत्वाविकृतिःकार्या। यदापरभागे रात्रौ वा तदावि
कृतिंकृत्वा प्रकृतिः कार्येति। सोमस्यापमप्राप्तःकालो विधीयते। इत्यादिश हसंबंधा
देवयजेतेत्यपि सिद्धे यजेतेति वचनं सोमस्य यागएवानयोःकालयोः संपादनीयो
नान्यद्दीक्षादीति॥ राजन्यस्याग्निहोत्रं जुहुयात्। क्षत्रियस्याग्निहोमः पर्वणोरेवक
र्तव्यो नान्यस्मिन्काल इति। वशाह्नाहेश्यो प्यनयोरेवकालयोरग्निहोत्रं जुहुयात्ना
न्यस्मिं नित्यवगम्यते। कथमनयोरन्यस्मिन्काल इत्याह॥ तपस्विने ब्राह्मणायेतरं का
लं भक्तमुपहरेत्॥ तपस्वी कर्मनिरतःतस्मै ब्राह्मणाय। अतपस्विनेपि ब्राह्मणाये
वदद्यात्। न जात्यंतराय तपस्विनेपीति। इतरं कालमिति इतरेषु सर्वेष्वग्निहोत्रकाले

ष्वित्यर्थः।भक्तमुपहरेत्तुभक्तंपक्वान्नमुपहरेत्॥ दद्यात्।एतदुक्तंभवति।राजन्यवैश्य
योः पर्वण्यग्निहोत्रकालद्वयंवर्जयित्वाइतरेषु कालेषु ब्राह्मणायोदनंदातव्यं।नहोमः
कर्त्तव्यइति।अग्निधारणंतुक्रियतएव। सततसत्यशीलःसोमस्तु सदा जुहुयात्। सततंवा
अनसयोःससत्वं।सत्यंवाचएवसततसत्यस्वभावः सोमयाजीचयः क्षत्रियोवैश्यावास
सदा जुहुयादग्निहोत्रेनपर्वणोरेव। सततशब्देनैवसत्यशब्दार्थेसिद्धेसत्यग्रहणंवा क्सत्य
स्वभावस्यापिसर्वदाहोमसिध्यर्थं॥ बहुषु बहूनामनुदेशश्चानंतर्ययोगः॥समानानामितिशे
षः।अनेकेषुविहितेषुतानुद्दिश्यानेकेषां समानानामनुदेशेपश्चाद्विधानेसत्यानंत
र्ययोगः क्रमेणासंबंधः स्यादित्यर्थः॥ द्वेद्वे तुयाज्यानुवाक्ये॥ याज्यानुवाक्ययोर्देवता
भिरेवंआनंतर्ययोगोभवति।एकस्याएकस्यादेवतायाद्वाभ्यांद्वाभ्याम् ग्भ्यांनैकैकस्या

एकैकयेति ॥ अदृष्टादेशे नित्ये ॥ यदि कश्चिदनेकादेवता निधाय कस्याश्चिद्देवताया स्तल्लिंगयोर्याज्यानुवाक्ययोर्विधिं न कुर्यात् । तदा नित्ये गृहीतव्ये इत्येकोर्थः । अयमपरोर्थः । गृहीतत्वात्यनस्ताभ्यां विहिताभिश्च सह देवताभिरानंतर्ययोग इति । अदिष्टो विधिरित्यर्थः ॥ नित्ये उक्ते इत्यर्थः ॥ अग्न्याधेयं ॥ अग्न्याधेयप्रभृतितं कर्मणामनुस्योक्तं अनुष्ठानक्रमेणैव व्याख्यानमपीत्युक्तं । तत्रोपोद्घाता दर्शपूर्णमासौ व्याख्यातौ । तत्प्रसंगादतिदेशास्तत्प्रसंगात्कालविधिः । तत्प्रसंगादेवाग्निहोमप्रकारविधिः । परिभाषाप्रसंगात्कथंचिदानंतर्ययोगविधिः । सूत्रत्रयेणैवं गते सति प्रथमप्राप्तमाधानमुच्यते ॥ विशिष्टकाले विशिष्टदेशे विशिष्टपुरुषेण विशिष्टैः मंत्रैर्गार्हपत्याद्यग्न्युत्पत्त्यर्थं यदंगारणां निधानं तदग्न्याधेयमुच्यते । अग्नीनाम

धानस्यकालविधयोमवेयुः। अतएवसूत्रकारःपर्वनक्षत्रविधीनामृतुविधिभिःसंबद्धाना
मेवाधानकालतान्नदर्शनार्थमेतेषांकस्मिंश्चिदितिपर्वनक्षत्रऋतुत्रयविधिपरेसूत्रेप
ठितव्यंपर्वणांहूंउत्तरसूत्रायपठितव्यंसतुराहूंव्यतिषज्यपठितवान्। पर्वनक्षत्रविध्यो
र्तुविध्युपसंहारेन्यायविरोधश्चनास्ति। तत्रैवतयोरंतर्भावदर्शनादिति॥ सोमेनयक्ष्यमा
णोनर्तुमृच्छेन्नक्षत्रं॥ अद्यैवसोमेनयक्ष्यइतिसंकल्प्ययत्राधानमिच्छेत्तत्राधानस्य
कालंनापेक्षितसोमोपक्रमकालएवादधीतेत्यर्थः। अयमपिमुख्यएवाधानकालः।
सतुनक्षत्रानिरपेक्षवचनंपर्वर्त्वोरपिप्रदर्शनार्थं। अस्यमूलंयदहरेवैनमितिश्रुतिः
सोमाधानस्यविधायिकानसोमस्य। तेनवसंतसंबंधित्वंसोमस्यनबाध्यते। ऋत्वुत्तरका
लतातुबाध्यते। सोमाधानयोरानंतर्यविधानादिति॥ अश्वस्याक्षमीगर्भादरण्या

औ० सू०
४६५

हरेदनपेक्षमाणः॥ सभ्याः गर्भः शमीगर्भः। शमीगर्भादश्वत्थादरण्याहरणं कुर्यात्। त
त्राधानार्थमाहरणे कृते अध्वर्युणारण्याहरणे क्रियमाणे तेन सह यजमानोप्यनेन मं
त्रेणाहरेत्। अनपेक्षमाणः पृष्ठतोनवेक्षमाणः। अयं चापरोर्थः। कुर्यादिति नान्यदपे
क्षमाणः। अव्यवसिताधान इत्यर्थः॥ यो अश्वत्थः शमीगर्भः० पूर्णाहुत्यंतमग्न्याधे
यं॥ पूर्णाहुतिरंते यस्य तत्पूर्णाहुत्यंतमग्न्याधेयं कर्त्तव्यमित्युक्तं। तत्राग्न्याधेयम
रण्याहरणादि पूर्णाहुत्यंतं भवतीत्यर्थः। अस्य सूत्रस्य प्रयोजनं पूर्णाहुत्यंते आहिता
ग्निव्रतप्राप्तिः। कथमिति चेत्। श्रुतावेवमाम्नातं। अग्नयः पुरुषार्थसाध्या इति प्रस्तु
त्य वसंते ब्राह्मणोग्नीनादधीतेत्येवमादीनि वसंतादिकालानि ब्राह्मणादिकर्तृकाणिक
र्तृगामिक्रियाफलयुक्तानि निरधिकाराणि आधायततो अरणी आहरेत्। संभारान्सं

राम
४६५

धेयमग्न्याधेयं तत्कर्त्तव्यमित्यर्थः॥ कस्मिन्काल इत्याह॥ कृत्तिकासु रोहिण्यां मृगशिरसि
फल्गुनीषु विशाखयोरुत्तरयोः प्रोष्ठपदयोः॥ फल्गुनीष्विति पूर्वे उत्तरे च गृह्येते। अ
विशेषाद्बहुवचनाच्च। प्रोष्ठपदासूत्तरे एव। अतः सर्वैतानि नक्षत्राणि तेषामेकस्मिं
नक्षत्रेऽग्न्याधेयं कर्त्तव्यमित्यर्थः॥ एतेषां कस्मिंश्चित्॥ एतेषां कस्मिंश्चित्पर्वणि
एवमेतत्सूत्रमर्थतो द्रष्टव्यं। उत्तरं च सूत्रं वसंते ब्राह्मण आदधीतेति। एतेषां न
क्षत्राणां कस्मिंश्चिन्नक्षत्रे पर्वणि चाग्न्याधेयं कर्त्तव्यमितीदं सूत्रं पर्वनक्षत्रसमुच्चयमग्न्या
धेयस्य कालत्वेन विदधाति। पूर्वसूत्रं तु केवलं नक्षत्राणामेवाधानसंबंधं विदधाति। अतो
द्वे पक्षौ स्तः। तत्र समुच्चयः प्रथमः कल्पः। तदसंभवे केवलं नक्षत्रमेवेति विनिवेशो युक्तः॥
इदं कल्पद्वयं सोमाधानवर्जितेषु सर्वेष्वाधानेषु भवति॥ वसंते पर्वणि ब्राह्मणोऽग्नीनादधी

श्रौ०वृ०
४९

त॥ इदमपि सूत्रमर्थत एवं भवति। अनेन वसंते ब्राह्मणकमाधानं विधीयते॥ ग्रीष्मव
र्षाशरत्सु क्षत्रियवैश्योपकुष्टाः॥ वैश्यस्ताक्षकर्मोपजीवी उपकुष्ट इत्युच्यते। अस्मि
न्सूत्रेप्यर्थ एवं भवति ग्रीष्मे आधानानि विधीयंते। ग्रीष्मे क्षत्रियगुणकं। वर्षासु वैश्यगु
णकं। शरदि उपकुष्टगुणकं च। एते वसंतादयः शब्दाः ऋतुवाचकाः॥ ऋतवो नाम
षट् वसंतग्रीष्मवर्षाशरद्धेमंतशिशिराः। ते च चैत्रमाससमारभ्य द्वौ द्वौ मासावृतवः। व
म
संतादयो मासाश्चैत्रादय एव॥ अस्मिन्कस्मिंश्चिदृतावादधीत॥ आदधीतेति प्रकृते
पुनरादधीतेति वचनं आपत्कल्पोयमाधानविधिरिति दर्शयति। अत्यंतापदि मु
मूर्षोः सर्वेष्वृतुष्वाधानं कर्त्तव्यं नेवानाहिताग्निर्म्रियेतेति। इदं चापरमाधानं पू
र्वोक्तानि चत्वारि तेषु सर्वेषु पर्वनक्षत्रविधय उपसंहर्त्तव्याः॥ न पर्वर्त्तुस्वांतत्र्येण॥

राम
४९

भरेत्॥ अग्न्यायतनानि कुर्यात्॥ केशश्मश्रुवपनं॥ ब्राह्मौदनिकं औपासनिकं निदध्या
त्॥ तस्मिन् ब्रह्मौदनं पचेत्॥ समिध आदध्यात्॥ आयतनेषु संभारान् निदध्यात्॥ ब्रा
ह्मौदनिकमण्यो समारोप्य मथितागार्हपत्यादीनादध्यात्॥ तत्र काश्चित्समिध आ
दध्यात्॥ अग्निहोत्रं जुहुयात्॥ पूर्णाहुतिं जुहुयात्॥ तत आग्नेयमष्टाकपालं नि
र्वपेत्तदहरेव॥ तदहरादिसंवत्सरांतानां कालानां कस्मिंश्चित्काले पवमानहवींषि निर्वपे
त्॥ ततश्चान्यानि हवींषीति॥ तथाहिताग्निः किं नदारूनाभ्यादध्यात्॥ नानृतं वदेत्॥ इत्या
दि आहिताग्निव्रतान्याम्नातानि॥ तथाग्निमत्तायां सिद्धायामग्निहोत्रादीनि नित्यनै
मित्तिककाम्यानि कर्माणि तत्र तत्राम्नातानि तत्र कस्मिन्नवसरे आहिताग्निव्रतप्रा
प्तिः॥ कस्मिन्नवसरे अग्निहोत्रादीनामारंभ इति॥ तद्विवेकार्थमिदं सूत्रद्वयं॥ तत्र पूर्वेण

सूत्रे या श्रुत्यादिभिः प्रकरणरहितैः पंचभिः प्रमाणैर्यावंतः पदार्था आधानविधिना संब
ध्यंते तावत्सु समाप्तेष्वाधानसमाप्तिः आधानसमाप्तौ चाहिताग्निव्रतप्राप्तिरित्येतत्प्र
तिपादयितुं पूर्णाहुत्यंतमग्न्याधेयमित्युक्तवानाचार्यः॥ उत्तरेण चाग्निहोत्रारंभा
रंभकालं प्रतिपादितवान्। यदिति विष्टयस्तनुषु॥ आग्नीनेवेति वाक्यशेषः यद्यनधि
कारत्वादाधानविधेर्विनियोजकस्य प्रकरणस्य व्यापारासंभवादाधानांगमिष्टयो
नस्युः। इष्टीनां चानधिकारत्वादिष्ट्यंगमाधानं न स्यात्। तथापि न न कश्चिद्दोषः। आग्न्य
र्थत्वेनैवोभयोरप्यनुष्ठानसिद्धेः। नन्विष्टीनामग्निसंबंधाभावादग्न्यर्थतानसंभव
तीति चेत् न यदाहवनीये जुह्वतीतिएवमादिभिरग्निसंबंधोस्ति। ननैष संबंधः साध
नत्वेन न दृश्यते। सत्यमेव तद्दृश्यते। तथाप्याहवनीयादिष्वग्निषु साध्यत्वबुद्धेरनुवर्ति

मानत्वादन्यस्यचसाध्यस्यानवगमात्। अतस्तन्न्यायेनाग्नयएवेष्टिभिःसाध्याइत्येवमाश्र
यितुंयुक्तं।अत्रानर्थक्याश्रयणादधिकारांतरकल्पनाश्रयणाच्चेति। तत्राधानेनेष्टिभि
श्चाग्निसिद्धिर्भवति। नतयोरन्यतरेणाऽतेनसिद्धमग्निहोत्रादीनामग्निसाध्यानामिष्टि
भ्यउत्तरकालएवारंभइति। अस्मिन्नर्थेएषासूत्रयोजना। यद्याधानसामिष्टीनामाधा
नांगतानस्यात्तथाप्याहवनीयाद्यग्निसंबंधात्तानेवाग्नीनिष्ट्यस्तनुयुः॥ विस्तारये
युः॥ कुर्युःसाधयेयुरित्यर्थः। तुशब्दस्त्वाधानादिषुविशेषंदर्शयति। अत्राधानेऽग्नी
नांसाध्यत्वेसैनेबद्धानामेवसाध्यत्वंइष्टिषुसाधनत्वेनसंबद्धानामविकल्पनागौरवभया
त्साध्यत्वमितिविशेषंगृह्णीमः। एवंयद्याधानेनेष्टिभिश्चाग्नयएवांशतःसाध्याइति
अनधिकाराणांकथमनुष्ठानसिद्धिरितिन्यायः। विदामेवउपालंभोनास्माकं। अत्रस्मा

कं तु साध्यसाधनसंबंधे वगते तदर्थिनां कर्तृत्वेनावगतानां ब्राह्मणादीनामेव कथं चिद
धिकारकल्पनया नुष्ठानसिद्धिः। अथ वा वधिकारिणामनन्यशेषाणामपि तत्साधनसा
ध्यरूपेणोपकारकत्वेन काम श्रुति प्रयुक्त्यैवं विधानामनुष्ठाने सिद्धिरित्यलमतिवि
स्तरेण॥ प्राथमायामग्निरग्निः पवमानाः॥ प्रथमायामिष्टौ द्वे देवते अग्निः प्रथमः
केवलः। द्वितीयः पवमानगुणोग्निः। केवलस्याग्निर्नित्य एव॥ अग्न आयूंषि पवस इति
पवस्ववत्याः॥ एते द्वितीयस्य पवमानगुणविशिष्टस्य॥ सहव्यवाळमर्त्योग्नि होता पुरो
हित इति स्विष्टकृतो विष्टकृतीयात्॥ सौविष्टकृत्यो याज्यानुवाक्ययोः स्विष्टकृत्मेन संया
ज्ये इति संज्ञा विधीयते॥ सर्वत्र देवतागमे नित्यानामपायः॥ सर्वत्रेति प्रकरणांतरे यीति
दर्शयति। देवतागम इत्यत्र समासनिर्देशस्य तुल्यत्वाद्देवतायाः देवतयोर्देवतानां चाग

ऋो०वृ०
५९

यस्यांवषट्कृतावग्निः०उदग्नेशुचयस्तव।एकःपावकगुणोग्निः॥अपरःशुचिगुणकः॥सा
कान्विश्वाअभियुजोमीळे०पृथुपाजाअमर्त्यइतिद्वे॥आवपतइतिवचनात्आधिके
एतेसामिधेन्यौभवतः।प्रथमार्धाद्धितीयस्यांततीयस्यामितिवचनाद्यस्यामिष्टौयत्तंत्रंवि
हितंतस्यामेकदेवतायामपितत्तंत्रंभवतिनयथोक्तनाद्देवतायामेवेति॥धाय्येइत्यु
क्तएतेप्रतीयात्पुष्टि०विंद्राग्नीविष्णुरितिवैकल्पिकानि।त्रयाणामेकोगृह्यते॥अ
दितिः॥अदितिश्चान्या।अस्यांद्वेदेवते॥उतत्वामदितेमहिमहि०सुशर्माणमदितिंसु
प्रणीतिं।एषाकल्पजा॥प्रेद्धोअग्नइमोअग्नइतिसंयाज्येति०रादितितिसः॥इत्येतात्ति
स्नइष्ट्योनुक्रांताइत्यर्थः॥उक्तानुकीर्तनमुत्तरार्थं।यदाद्योत्तमेवैवस्यातामाद्यावेतिप
सास्तदापितिसृणामिष्टीनांयावत्योदेवतास्ताःसर्वायष्टव्याइत्येवमर्थं।आद्योत्तमपक्षे

राम
५९

मध्यमायांदेव्यैवते आद्यायामेव प्रक्षेप्तव्ये प्तव्यो। यदा पुनराद्यैव तदा सर्वा देवता आद्याया
मेव प्रक्षेप्तव्या इत्येवमर्थः॥ अद्यो तमेवैव स्यातां॥ इष्टी इति शेषः॥ आद्या वा आद्यैव
वेष्टिर्भवतीत्यर्थः॥ तथा सति तस्यामेव धाय्ये विराजौ॥ यदाद्यैव भवत्ति तदा द्वितीयया
रपि देवतास्तत्र भवंतीत्युक्तं अतस्तस्यामेव धाय्ये विराजौ च भवतः। धाय्या विराजा नाम अनु
प्रवेशस्य निमित्तं तृतीयस्याः इष्टेः देवतानुप्रवेशः इत्येवमर्थं तथा सतीत्युक्तं। इति मा
त्रे विकारे वैराजतंत्रे तिप्रतीयात्। पौर्णमासतंत्रायामिष्टौ धाय्या विराण्मात्रे विका
रे सति से हि वैराजतंत्रे ति वेदितव्या॥ आधानाद्द्वादशरात्रमजस्रः॥ अत्राधानमिष्टी
श्वोत्का आधानादूर्ध्वं द्वादशरात्रमजस्रा इत्युक्तं। तस्यायमभिप्रायः। यावता कर्मसमु
दायेनाग्नीनां सिद्धिर्भवति तावतः कर्मसमुदायस्याधानशब्दो वाचक इति ज्ञापयितुं॥

तिनाग्न्याधेयं पुनराधेयं वेत्यत्र सेष्टिकस्याधानस्य ग्रहणं भवतीति सिद्धं। आधानेनेष्टि
मिश्र सिद्धा। अग्नयो द्वादशाहोरात्राणि सर्वैस्वरूपेणैव धार्यंते ॥ तदजस्रधारणम
ग्निहोत्रपूर्व एवाधाने भवति। अग्निहोत्रस्यैवानंतरमुच्यमानत्वात्। अनुष्ठानक्र
मेणैव कर्मणां व्याख्यानमित्युक्तत्वाच्च। इष्टिपूर्वे सोमपूर्वे च शास्त्रांतराण्यालोच्य वि
चारणीयं। तत्रायं विचारः। इष्टिपूर्वे जस्रधारणं नास्ति। आपस्तंबवचनात्। अन्यमा
हवनीयं प्रणीयाग्नीनन्वादधातीति इष्ट्यर्थतयानस्य प्रणयनस्य विधानात्। अपवृज्य
श्वोभूते पौर्णमासेनयजेतेति अपवर्जनविधानाच्च। तथा सोमपूर्वे पि नास्ति। तस्मा
द्दीक्षितो द्वादशाहं भृतिं वन्वीतेति प्रकृतौ द्वादशदीक्षानियमादुपसद्भिः सुत्यया च स
ह षोडशाहानि प्रकृतेः कालः। अजस्रधारणं तु द्वादशाहपरिच्छिन्नं। सोमम मध्ये विहर

णस्य चासंभवः। दीक्षणीयासंस्कृतेष्वेवाग्निषु सोमयागविधानात्। अतइष्टिपूर्वे सोम
पूर्वे चाजस्रधारणं नास्तीति सिद्धं। अग्निहोत्रपूर्वेपि यदा वागिष्टिकालो द्वादशाहानि
न पूर्यते तदा कथं। तत्रैते पक्षाः। अजस्रत्वाविशिष्टिकरणं। इष्टिलोपः। यथासंभवमजस्र
धारणं। अजस्रलोपइति। तत्र यथासंभवमजस्रधारणमिति पक्षो दुराश्रयः। तथा
विध्यभावात्। द्वादशाहकालविशिष्ट एवासौ विधिः श्रूयते नान्यकालविशिष्टइति। त
थेष्टिलोपपक्षोपि न संभवति। अग्निमत्तायां सिद्धायां पौर्णमासकालआगतेऽन्त
दनारंभे प्रमाणाभावात्। अक्रियायां प्रायश्चित्तोपदेशाच्च। एवं चेदजस्रेष्वेव पौर्णमासी
भवतु को दोषः। उक्तो दोषः। स्वार्थमेव प्रणीतेष्वाधानदर्शनात्। अपवर्जनविधानाच्चेति।
नन्वग्निहोत्रमपि स्वार्थ एव प्रणीतआहवनीये भवति। अर्थयार्थीयाग्निं प्रणयतीत्य

मइत्येवं भवति॥ नित्यानां प्राकृतीनामित्यर्थः॥ अपायउद्धार इत्यर्थः॥ एतदुक्तं भवति॥ वि
कृतौ देवताया एकस्या आगमे द्वयोर्बह्वीनां वागमेपि प्राकृतीनां सर्वासामुद्धार इतिय
स्यां पुनर्विकृतौ इष्टिचोदनां कृत्वादेवतानाविदधातितत्र नोद्धारः प्राकृतीनां। तत्र ताए
वदेवता भवंतीत्यर्थः॥ यथा गदितः सोमिनषस्तुनेष्टावित्यादौ॥ याः स्विष्टकृतमंतराज्य
भागौ चतास्तत्स्थाने॥ नित्यानामपाय उक्तः॥ तत्र किं सर्वा नित्या उद्धर्तव्या उत काश्चि
द्देवता इत्येतं संशयं निवर्त्तयति। या आज्यभागौ स्विष्टकृतं चांतरा देवता यष्टव्यास्ता उद्ध
र्तव्याः॥ याः पुनर्विकृतौ विहिताः तास्तत्स्थाने उद्धृतानां प्राकृतीनां स्थाने भवंतीति तदि
ति वचनात् तद्धर्मिकाश्च भवंतीति गम्यते॥ एष समानजातिधर्मः॥ योयमुपदिष्टो विधि
र्देवताभ्योन्यत्रापि समानजातिषु भवति। समानजातय एककार्या इत्यर्थः॥ द्विती

स्याविशिष्टत्वात्। सत्यमविशिष्टं तथाप्याधानानंतरं धारणाविधेः प्रवृत्तत्वात्तदवस्थे
ष्वेवाग्निष्वग्निहोत्राधिकारस्य प्राप्तस्य त्यागे प्रमाणाभावात् तिष्वेवाग्निहोत्रहोमो
पुक्तः। एतमेव न्यायमनुसृत्योक्तं भगवतापस्तंबेन। द्वादशाहमजस्रेष्वग्निषु यजमा
नः स्वयमग्निहोत्रकाल एतस्मिन्नेवाग्निहोत्रं जुहुयादेवमन्यत्रापि प्रक्रांते तंत्र इ
ति। अग्निहोत्रस्यान्यार्थेष्वपि प्रवृत्तिदर्शनान्नात्रायं दोष इति गम्यते। अतः
अग्निहोत्रस्यान्यार्थेष्वपि प्रवृत्तिदर्शनादाधानानंतरमग्निहोत्रस्यानन्यार्था
हवनीयासंभवादजस्रेष्वेवाग्निहोत्रहोमो न विरुध्यते। पौर्णमास्याः पुनर्द्वादशाहो
त्तरकालवर्तिन्याः स्वार्थाहवनीयसंभवादजस्रेषु तस्याः प्रवृत्तिर्विरुध्यते। अ
तो जस्रेष्विष्टिकरणमित्ययमपि पक्षो न संभवति। न्वैनेजस्रलोपपक्षेप्याधाना

द्वादशरात्रमजस्राइतिनित्यवदाम्नानंविरुध्यते।नविरुध्यते।अस्यनित्यत्वासंभ
वात्।उक्तंहि।इष्टिपूर्वेचाप्रवृत्तिकरणात्तिमि।तस्मादपिविघ्यंतरानुपरोधेनप्रवृत्ति
दर्शनात्।अकरणेचप्रायश्चित्ताम्नानात्।अस्मिन्विषयेअजस्रलोपएवश्रेयानिति
वक्तुंयुक्तं॥अत्यंतंतुगतश्रियः॥अत्यंतंयावज्जीवमित्यर्थः।गतश्रियः।त्रयोवैगतश्रि
यइतिश्रुतावुक्ताः।गतश्रीयामग्नयोयावज्जीवमजस्राभवंति।नद्वादशाहमेवेति।द्वि
तीयेप्रथमःखंडः॥१॥उत्सर्गेपराह्णेगार्हपत्यं०गार्हपत्यादाहवनीयंज्वलंतमुद्ध
रेत्।उत्सर्गेअजस्रोत्सर्गेअग्निहोत्रहोमार्थंविहरेत्।नाजस्रेषुहोमस्त्वजस्रे
ष्वपिभवतीत्युक्तं।एवं।स्मृतेविहरणसहितमग्निहोत्रप्रयोगवक्तुकाम उत्सर्गइत्यु
क्तवान्।अत्रापराह्णशब्देनअह्नश्चतुर्थभागोगृह्यते।विहरकोपालेगार्हपत्यं

औ०वृ०
५२
५२

मादुष्कृत्य प्रज्वाल्य च दक्षिणाग्निं वैश्यगृहाद्दानयेत्। चतुर्णां वर्णानामन्यतमस्य
न मस्य द्रव्यवतो वा गृहात्गार्हपत्याद्वा नित्यधार्य श्वेत्प्रज्वलयेत्। कालेका
लेयदि निर्मथ्यः स्तदा मंथेत्। एषां प्रकाराणामुत्पत्तिवशाद्व्यवस्था। तेषामन्यतमप्र
कारेण दक्षिणाग्निं साधयित्वा ततो गार्हपत्या ज्ज्वलंतमग्निमाहवनीयार्थमु
द्धरेत्। पात्रांतरेण पृथक्कुर्यादित्यर्थः॥ देवत्वा देवेभ्यः श्रिया उद्धरामीत्युद्धरे
त्॥ अनेन मंत्रेणाग्निर्होत्रार्थमुद्धरेत्॥ पूर्वस्योद्धरेदिति वचनस्येदं प्रयोजनं।
गार्हपत्यं प्रज्वल्येत्यादेराहवनीयं ज्वलंतमुद्धरेदित्यंतस्य मंत्रवर्जितोद्धार
प्रकारस्य सर्वार्थत्वज्ञापनं एवं सर्वार्थमुद्धरणं विदधतो तत्साधितं भवति। येना
ग्निनायत्र प्रयोजनं तत्र तस्योद्धरणं कर्त्तव्यमिति। शास्त्रांतरेस्य स्पष्टं वचनमस्ति।

राम
५२
५२

अर्थापार्थ्यायाग्निं प्रणयतीति। उद्धरणमंत्रोयमग्निहोत्रएवनान्यत्रेतिसिद्धं॥ उद्धि
यमाण उद्धरपाक्षनोमायद० पाहितेस्मादिति प्रणयेत्॥ प्रणयेत्प्राङ्मुखेत्। अग्निमा
हवनीयं प्रत्यनेनमंत्रेण॥ अमृताहुतिममृतायां जुहोम्यग्निं निदध्यादादित्यमभिमुखः॥
आदित्याभिमुखोभूत्वानेनमंत्रेणाहवनीयामपतेनाग्निं निदध्यादित्यर्थः॥ एवंप्रातर्व्यु
ष्टायां तमेवाभिमुखः॥ एवमेव प्रातर्होमार्थमप्यादितआरभ्यनिधानांतंकुर्यात्॥ तमेवा
भिमुखोनिधीयमानमाहवनीयमेवाभिमुखइत्यर्थः। एवंसति प्रातःकाले आहवनी
यायतनात्पश्चात्स्थितेनाभिध्यानं भवति। सयंतुपुरस्तात्स्थितेन व्युष्टायामुषसि उदि
तायामादित्योदयात्प्राक्॥ रात्र्यायदेन इतितु प्रणयेत्॥ प्रणयनमंत्रे अन्ह्यायदेन
इत्यस्यस्थानेरात्र्यापदेन इतिकर्त्तव्यं प्रातःकाले॥ अतऊर्ध्वमाहिताग्निर्व्रतचार्या

श्रौ॰वृ॰
५८
५२

होमात्॥सत्रिधर्मा चातुर्मास्यव्रतान्यत्रव्रतशब्देनोच्यंते।विहरणादूर्ध्वमग्निहो
त्रहोमप्रयोगसमाप्तेर्व्रतचारीभवत्याहिताग्निः॥अनुदितहोमी चोदयात्॥अ
नुदितहोमी चेत्प्रागुदयात्समाप्तेपिप्रयोगे ॐ दयाद्व्रतचारीभवेत्॥अस्तमिते
होमः॥अस्तमितेहोमः कर्त्तव्यः।अंगान्यपिप्रधानकालेकर्त्तव्यानि यत्पुनरंगवि
हरणावत्स्वकालविशिष्टं तत्स्वकालएवकर्त्तव्यं॥नित्यमाचमनं॥उक्तं प्राक्सुत्रस्या
चमनं यत्पुरस्तात्तदिदानीं कर्त्तव्यमस्यागत्वाय॥सततसत्याभ्यात्वा पर्युक्षामी
ति जं॰पुनः पुनरुदकमादाय॥पर्युक्षणमंत्रेपिजपित्वापर्युक्षेदितिशथक्रिय
ते।पर्युक्षणातिदिष्टे परिसमूहनेमंत्रोमाभूदिति॥त्रिरेकैकमित्येतावतैवएकैक
स्याग्नेस्त्रिस्त्रिः पर्युक्षणोसिद्धे त्रिस्त्रिरितिवीप्सावचनंमंत्रस्यापित्रिरावृत्तिर्भवती

राम
५८

त्येवमर्थः। पुनः पुनरुदकमादायेति वचनं न सकृद्गृहीतेन त्रिः पर्युक्षेदित्येवमर्थः॥ आ-
नंतर्ये विकल्पः॥ अग्नीनां पर्युक्षणादिषु कर्तव्येषु केनानंतर्येण कर्तव्या इत्यानं-
तर्ये विशेषेऽज्ञातव्ये ऽनेन सूत्रेणाग्नीनामुत्पत्तिक्रमस्य होमस्य च विकल्पो विकल्पो
विधीयते॥ दक्षिणं त्वेव प्रथमं विज्ञापते तस्मादेवं पर्युक्षेत्॥ पर्युक्षणे आयमेव
क्रमः दक्षिणाग्निं गार्हपत्यमाहवनीयमिति। तत्र श्रुतिमेव हेतुमुपन्यस्यतस्मादे-
वं पर्युक्षेदित्युपसंहृतं तेन पर्युक्षणादि दिष्टे परिसमूहनेयमेव क्रमः॥ अन्यत्र
पूर्वोक्तो विकल्पः॥ अत्र विशेषः प्रधानात्पूर्वेषामुत्पत्तिक्रमः। परेषां प्रधानक्रम
इति॥ गार्हपत्यादविच्छिन्नामुदकधारां हरेऽमन्विहीत्याहवनीयात्॥ अयमाका-
रोमयीदायामग्न्युपघातविरोधात्॥ पश्चाद्गार्हपत्यस्योपविश्योपविश्याद० सुहुतं

करिष्यथेति॥१॥ आग्रहपत्यस्यतत्सीमेवदक्षिणोत्तरिणोपस्थेनोपविश्यगार्हपत्यात्क
तिपयानंगारानुदक्प्रवृष्यकुर्यादधिश्रयणार्थं॥ तेष्वग्निहोत्रमधिश्रयेऽमधिश्रितंहि
इ इति॥ तेष्विति पृथक्कृतेष्वंगारेष्वित्यर्थः। अग्निहोत्रमिति होमसाधनभूतंद्रव्यमु
पचर्यते॥ इडायास्पदंघृतवच्चराचरं जा॰ मयिपुष्टिरस्त्विति वा॥ अनेनवामंत्रेणाधिश्र
येत् पूर्वेणवेतिविकल्पविधिः॥ नरध्यधिश्रयेत्। अधिश्रयेदित्येके॥ अधिश्रयेनवेत्ये
तावतो वसिद्धे गुरुसूत्रकरणंन्यायविकल्पोयतिमिप्रदर्शनार्थः। अत्रैके आचार्याः प्रकृति
परत्वाच्छास्त्रस्यकार्यस्यचातीद्रियत्वाद्लोपमाहुः। आचार्यस्तुकार्यार्थत्वात्प्रवृत्तेः।
कार्यस्यचदृष्टस्यत्यागेप्रमाणाभावात्तदत्यागेसंस्कार्यस्वरूपविनाशात्संस्कार्यसंपा
दकत्वात्संस्कारस्यलोपएवात्रश्रेयानित्याह॥ पयसानित्यहोमः॥ नित्यश्रासोहोमश्च

नित्यहोमः ।सपचसाकर्त्तव्य।अकामत्याग्निहोत्रमः पृथसाकर्त्तव्य इत्यर्थः ।कामानुपदे
सादेवास्यनित्यत्वेसिद्धेनित्यग्रहणमुत्तरार्थं ।।एवाग्नूरोदनोदधिसर्पिर्ग्रोणंतेजस्कामानां ।।
यथासंख्येनग्रामकामादीनां यवाग्वादीन्यग्निहोत्रहोमद्रव्याणि भवंति।ग्रामः प्रसिद्धः ।।
अंनं च तदाद्यं च अंनाद्यं खाद्यं नकाम इत्यर्थः ।इंद्रियशुक्रं चक्षुरादीनि चातेजस्कावि।
नित्यहोमदूत्यत्रापि संवध्यते।तेन पुरुषार्थैरपि क्रियमाणो होमो नित्य एव स्यांनका
मार्थः ।होमाश्रितानि द्रव्याण्येव कामाश्रितानि भवंति।।अधिश्रितमवज्वलयेत्।।अधि
श्रितग्रहणात् अधिश्रितमात्र एवावज्वलयेन्न कालविक्षेपः कर्त्तव्य इत्यवगम्यते ।।
अनधिश्रयंश्च्यग्निष्टेतेजोमा हाषीरिति।।न अधिश्रयोयस्यतत् अनधिश्रयं।
अधिश्रयरहितमपि दधि अवज्वलयेदित्यर्थः ।सर्वत्रावज्वलनमंत्रोयं अग्निष्टे

तेजइति। दधि चेत्येतावतैव सिद्धे गुरुसूत्रकरणं व्रीह्यादीनामपक्वानां संग्रहार्थं॥ स्रुवे
णप्रतिषिंच्यां न वा शांतिरस्य मन्तमसीति॥ पयसा होमे दोहनपात्रप्रक्षालनं स्रुवेना
नीय तेन प्रतिषिंचेत् अग्निहोत्रद्रव्यं अन्यत्रोदके नैव शांतिरिति मंत्रेण न वा प्रति
षेकः कर्तव्यः॥ तयोर्व्यतिचारः॥ तयोः प्रतिषेकाप्रतिषेकयोरित्यर्थः। अव्यतिचा
रोसंकरः। एकस्मिन्पुरुष इत्यर्थः। एकः सर्वदा प्रतिषिंचेत्। अपरः सर्वदा न प्रति
षिंचेदित्यर्थः॥ पुनर्ज्वलतापरिहरेत् त्रिरंतरितं रक्षोंतरितान्यरातय इति॥ पुनर्वचना
त् ज्वलता येनोल्मुकेनावज्वलनं कृतं तेनैव परिहरणं कुर्यादिति गम्यते। उल्मुका
दानं गार्हपत्यादेव न अपणार्थात् अपणार्थे पृथक्कृतस्य पुनः प्रक्षेपविधानात् अ
न्यत्र कार्यार्थे पृथक्कृतस्य कार्यपरिसमाप्तौ त्याग एव कर्तव्यः। येनावज्वलनार्थं

पृथक्कृते ऽग्नावज्वलने कृते पृथगेव निधायते नैव परिहरणमपि कृत्वा त्यजेत्॥ समु
द्दंतं कर्षनिवाद्गुद्वासये॰ पृथिव्ये त्वेति निदध्यात्॥ सम्यगुद्धृतः ऽग्नौ तो यस्य द्रव्य
स्य तत्समुद्दंतं द्रव्यं। परितः स्थाली संबंधप्रदेशोंत इत्युच्यते। यदा पच्यमं पय एवमव
स्थं भवेत्। तदा कर्षनिर्वाद्गुद्वासयेत्। कर्षं निवेति मंदगत्येत्यर्थः॥ निदध्यादिति त्रि
भिर्मंत्रैस्त्रिर्निधानं कुर्वन्नवतारयेत्। प्रथमद्वितीयाभ्यामाकाशे धृत्वा तृतीयेन भूम्यां
निदध्यात्॥ सुकृतकृतस्य सुकृतमकार्षे त्यं॰ निष्टप्ताऽरातय इति॥ ऽग्नौ तिसृणां
गार्हपत्ये प्रक्षेपः। उत्तरतस्थाल्याः स्रुचमासाद्यो ऽमुं नयानीत्यतिसर्जयीत॥
स्थाल्या उत्तरतः स्रुचमासाद्य स्रुवहस्त एव सन्नो ऽमुं नयामीत्यनेन मंत्रेणाहिताग्निमति
सर्जयेत्। आहिताग्निराचम्याप॰ त्वामुं नयेत्यतिसृजेत्। विहरणकाल एवाहिता

श्रौ॰सू॰
५६

ग्निश्चाध्वर्युः पत्नी च स्नात्वा चम्य तीर्थेन प्रविशंति। तत्राध्वर्युर्विहरणं कृत्वा होमकाले
प्राङ्मुख उदङ्मुखो वा आचम्य तीर्थेन प्रविश्य पर्युक्षणादि कुर्यात्। पत्नी तु गार्ह
पत्यस्य दक्षिणत आस्ते। आ होमपरिसमाप्तेः॥ आहिताग्निश्चाहवनीयविहरण
काले दक्षिणत उपविश्य उद्धराहवनीयमित्यध्वर्युं संप्रेषमुक्त्वासे। ततो होमकाले प्रा
प्ते निष्क्रम्य प्राङ्मुख उदङ्मुखो वा आचम्य तीर्थेनैव प्रपद्यापरेण वेदिं दर्शपूर्णमास्यां
गार्हपत्यं दक्षिणाग्निं च गत्वा वेदेर्दक्षिणत उपविशेत्। उपविष्टः संनेत इति सर्जन
वाक्यं श्रुत्वा मुन्नयेत्यनिसृजेत्॥ अतिसृष्टो भूरिच्छा भुवइन्द्रा सूरिच्छा वृष इन्द्रेति स्रु
वपूरमुन्नयेत्। अतिसृष्ट इति वचनं प्रवसति यजमाने स्वेनैवातिसृष्ट उन्नयेत्। नानाति
सृष्ट इत्येवमर्थं। चत्वारस्ते मंत्राः समत्वात्संसर्गाणां अत एव तु पृथक्त्वं उन्नयेत्। स्रुवपूरमि

राम
५६

ति णमुल् प्रत्यययोगा३ ॥ अग्निग्रयमग्निग्रयमिति तुं नयनमेद्दर्शनात् ॥ स्रुवपूरमिति स्रुवं पूरयित्वा पूरयित्वेत्यर्थः ॥ अत्र त्र्यंचममंत्रस्याभावात्पंचावत्तिनां तूष्णीमेव पंचममुन्नीयते ॥ पुरुषविशेषधर्मत्वादवदानविशेषसंबंधस्य ॥ अथ भ्यमनमग्ने पूर्तेर्णमं यो नुज्येष्ठम् ऋद्धिमिच्छेत्पुत्राणां ॥ यो यजमानः पूर्वजानुसारेणात्मनः पुत्राणामृद्धितारतम्यमिच्छेत् ॥ तस्य पूर्वः पूर्णतमो भवेत् ॥ अनेकपुत्रस्यायं काम्यः कल्पः ॥ न चतुः पुत्रस्यैव ॥ योस्य पुत्रः प्रियः स्यात्तं प्रति पूर्णमुन्नयेत् ॥ प्राक्तानामेव पंचानां चतुर्णां वा एकं स्रुवं प्रियं पुत्रं ध्यात्वा पूर्णमुन्नयेत् ॥ अयमपि काम्यः ॥ अयमेकपुत्रस्यापि भवति ॥ स्थालीमभिमृश्य समिधं स्रुचं चाध्य० ॥ इति मिष्टकामुपदधे स्वाहेति ॥ स्थाल्या स्रुवेण स्रुच्युन्नयनं कृत्वा स्थालीमभिमृश्य स्रुचा सह समिधं च गृहीत्वाध्यधि गार्हपत्यं गार्हपत्यस्यो

परिसमीयं हुत्वाआहवनीयस्यानेदीयसिनासिकासंमितांहरेत्। हुत्वातस्यपश्चाद्दूरे
कुशेषूपसाद्यदक्षिणंजानुनिपात्यतांसमिधमादध्यात्। एजतामितिमंत्रेण॥ समि
धमाधायविद्युदसिविद्यमेऽमग्निर्ज्योतिर्ज्योतिरग्निःस्वाहेति॥ समिधमाधायेत्यु
च्यतेसमिदाधानधर्मस्यजानुनिपातनस्यानुवृत्त्यर्थं। समिधमाधायेत्यनेनैवसमि
त्प्रहणेनपूर्वसूत्रेआदध्यादित्येवोक्तेपिसमिधएवाधानेसिद्धेयत्पूर्वसूत्रेसमि
द्ग्रहणंकरोतितज्ज्ञापयति। यत्रयत्रसमिधमादध्यात्तत्रतत्रजान्वाच्यादध्यादिति।
विद्युदसीत्यपउपस्पृश्यप्रदीप्तांसमिधंमूलंतोद्व्यंगुलमात्रेभिजुहुयात्भूर्भुवःस्व
रोमितिमंत्रेण॥ पूर्वामाहुतिंहुत्वाकुशेऽमवेक्षेतपशून्मेयच्छेति॥ हुत्वेतिवचनंनिपा
नितजानुरेवोत्तरमपिकुर्यादित्येवमर्थं। पूर्वामितिवचनंपूर्वाहुत्युत्तरकालीनंस्रुवं

साद्दयित्वैवकुर्यात्। उतद्दुत्युत्तरकालीनं स्रुग्घस्तएवकुर्यादित्यमेवेर्थः॥ अथोत्तरांतूस्रीं
भूयसीमसंसृष्टांप्रागुदगुत्तरतोवा॥ अथत्यानंतर्यवचनेनपूर्वाहुत्योत्तराहुतेः सं
बंधः क्रियतेतिनजान्वाच्यत्यस्यानुवृत्तिर्लभ्यते। प्राधान्यंचोत्तराहुतेः। अतः पूर्वाहु
तायांदुव्यदोषेसति उत्तराहुत्यर्थंद्रव्यमुत्पादयितव्यमेव। भूयसीपूर्वाहुतेः भूयोद्रव्यां
असंसृष्टांपूर्वयाहुत्याप्रागुदक्पूर्वाहुतेरुत्तरतोवातरयाएव। प्रजापतिंमनसाध्या
यात्तूष्णींहोमेषुसर्वत्र॥ यत्रतूष्णींशब्दविशिष्टोहोमश्चोद्यतेतत्रप्रजापतिदेवतांध्याये
त्। देवतासाध्यत्वाद्धोमस्य। ध्यानत्वादेवमानसत्वेसिद्धेमनोग्रहणंशब्दध्यानार्थं। ते
नचतुर्थ्यंतंप्रजापतिशब्दंध्यात्वातदनंतरंस्वाहेत्युपांशूक्त्वाजुहुयात्। होमेष्विति
बहुवचनादेव प्रकरणादुत्कर्षेसिद्धेसर्वत्रग्रहणंगार्ह्येष्वपिप्रापणार्थं॥ भूयिष्ठंस्रु

चिशिस्रुत्रिस्तु० निमार्ष्टिपशुभ्यस्त्वति। उत्तराकृते भूयिष्ठं भूयो द्रव्यं पूर्वाकृते भूयि
ष्ठं यथा भवति तथा भक्षार्थं स्रुचि शेषयेत्। पूर्वाकृत्यर्थं प्रक्षिप्ताद् उत्तराकृत्यर्थं भूयो भ
वति। तस्मादपि भूयो भक्षार्थं भवति। तत्पूर्वाकृत्यपेक्षया भूयिष्ठमित्युच्यते। भूयि
ष्ठं द्रव्यं स्रुचि शेषयित्वा स्रुचमेवाकृति देशात्प्राकर्षयेत्। ततः स्रुगातलेपं पाणिना
धोमुखेनावमृज्य पाणिगतलेपं कुशमूलेषु निमार्ष्टि निमृजेत्। पशुभ्यस्त्वेति॥ तेषां द
क्षिणत उत्तानाश्चांगुलीः करोति० क्त स्मी स्वधापितृभ्य इ कि वा॥ तेषां कुशमूलानां
दक्षिणत उत्तानाश्चांगुलीर्निदध्यात्। प्राचीनावीती भूत्वा स्वधापितृभ्य इति मंत्रेण
तूष्णीं वा॥ अपो वनिनीय॥ एतावदेव सूत्रं। अप्यश्च कुशमूलानां दक्षिणतो निनये
त्। अवाचीनेन पाणिना। एतावत्स्रुग्घस्त एव करोति। एवं वा तेषां। करोति। प्राचीना

वीती॥ निनीय॥ वृष्टिरसि वृश्च मे पाप्मानमृतादुपस्पृश्य॥ इदमयि सू
त्रमेतावदेव। निधाय स्रुचमप उपस्पृशेत्॥ आहिताग्निरनुमंत्रयेत॥ अधिका
रीयं॥ आधानमुक्ता तेन स्विष्टा तेनं यां गिरमुद्दवासीदेति समिधां॥ समिदाधा
नमंत्रेणातेन सर्पिषात्यनेन मंत्रेणा च समिधामाधीयमानमनुमंत्रयते॥ तामस्य सू
ददोह स इति पूर्वामाहुतिं॥ एतया चा पूर्वामाहुतिमनुमंत्रयते॥ उपोत्थायोत्तरां कां
क्षते ईक्षमाणो भूः सुवीरो वीरैः सुपोषः पोषैः॥ इति काराध्याहारेण सूत्रच्छेदः॥ उत्त
राहुते हूयमानाया देशतः कालतश्च समीपे स्थित्वा कटाक्षेणेक्षमाणस्तामेवाहुति
मनुमंत्रयते। कांक्षतेत शब्दः कटाक्ष वचनः। केचिदुत्तराहुतिमीक्षमाणोनुमंत्रयते। त
न्मंत्राभिहितान्कामान्कांक्षते चेति वर्णयंति॥ आग्नेयीभिश्च॥ याभिः काभिश्चत्र्यव

राभिराग्नेयीभिरुत्तरामेवाहुतिमनुमंत्रयते॥ अग्नआयूंषि पवस इति तिसृभिः॥२॥
संवत्सरे संवत्सरे॥ पूर्वे संवत्सरे एताभिरधिकाभिः सकृदनुमंत्रयते॥ यवाग्वा यसा
वा स्वयं पर्वणि जुहुयात्॥ यवाग्वा पयसा वा स्वयं पर्वणि पौर्णमास्याममावास्यायां
च सायं प्रातर्यजमानः स्वयमेवाग्निहोत्रं जुहुयात्। अस्मिन्सूत्रे पर्वणि द्रव्यनियमः
स्वयंकर्तृनियमश्च विधीयते। स्वयंहोमे समिधमनुमंत्र्य विद्युदसीति पूर्वामाहुतिम
नुमंत्र्य पशून्मे यच्छेत्युत्तरामाहुतिमनुमंत्र्य वाछिरसीत्येवंक्रमो भवति। यत्किंचि
दग्निहोत्रद्रव्यं काम्यं वैकल्पिकं वा प्रयुज्यते तत्सायमुपक्रम्य प्रातरपवर्गं प्रयुज्य
ते। नान्यथेति। प्रतिनिधिस्त्वेकप्रयोगपर्यवसाय्येव॥ सत्त्विजामेकइतरं कालं॥
सत्त्विजामेकः कश्चिदृत्विगितरस्मिन्कालेग्निहोत्रं जुहुयात्॥ अंतेवासी वा॥ इतर

स्मिन्काले ऽग्निहोत्रं कुर्जुयादिति शेषः॥ अंतेसमीप एव सतीत्यंते वा सीसपुनः पुत्रः शि
ष्यो वा॥ अत्र किंचिदुच्यते॥ ऋत्विजस्त्रिविधाः॥ देवभूताः पितृभूता मनुष्यभूता
इति॥ ये कर्माणि कर्माणि व्रियंते ते देवभूताः॥ येऽन्वपागताः ऋत्विजस्ते पितृभूताः॥ ये
त्वेकस्य पूरुषस्य सर्वाणि कर्माणि कर्त्तुं व्रियंते ते मनुष्यभूताः॥ तत्रयस्याहिताग्नेः
पितृभूता मनुष्यभूता ग्नेः पितृभूता मनुष्यभूता वा ऋत्विजः संति तेषामृत्विजामेकः
कश्चित्सर्ववर्जितेषु काले जुहुयात्॥ यस्य देवभूतास्तस्यांते वास्येवेति विनिवेशः॥
स्रुच्यादकमुद्धृत्य भक्षयेत्॥ उक्तमेवोदकोपस्पर्शनं कृत्वा उद्गात्य स्रुगाशे
षतं भक्षयेत्॥ उक्तसंकीर्त्तनमाहित्तेन माहिताग्न्यधिकारे सत्यपि होमकर्त्तुः प्राय
णार्थे॥ अपरयोर्वा कृत्वा॥ भक्षयेदिति शेषः॥ आयुषे त्वा प्राश्नामीति प्रथमं॥ अन्नाद्या

यत्वेत्युत्तरं॥ प्रथमं उत्तरमितिभक्षयोः संबंधकरणार्थोतेनोत्तरस्यापिमंत्रस्य प्राप्ता
स्यंततोभवति॥ तूष्णींसमिधमाधायाग्नयेगृहपतयेस्वाहेतिगार्हपत्ये॥ जुहुयादि
त्यध्याहारः॥ तूष्णींग्रहणमाहवनीयेसमिदाधानेहोमेचयेधर्माजानुनिपातनंप्र
दीप्ताभिहोमोथंगुलाभिहोमश्चतेषांप्राप्तिसूचनार्थं॥ नित्योत्तरा॥ उत्तराद्रुतिंतूष्णीं
भूयसीमित्येवमुक्तेस्यर्थः॥ तूष्णींसमिधमाधायाग्नयेसंवे॰ ग्नयेंनादायांनयतयेस्वा
हेतिवा॥ मंत्रविकल्पोयं॥ नित्योत्तरा॥ गतार्थमेतत्॥ भक्षयित्वाभ्यात्ममपःस्रुचा॰
त्रिःसर्पदेवजनेभ्यःस्वाहेति॥ भक्षयित्वेतिवचनंभक्षणानंतरमेवनिनयनमपिस्यादित्ये
वमर्थं॥ अभ्यात्ममपःस्रुचानिनयतइतिअसंस्कारकर्मत्वान्मंत्रोपित्रिरावर्तते॥ अ
थैनांकुशैःप्रक्षाल्यचतस्रः॰हेतरजनेभ्यःस्वाहेति॥ अथेत्यभ्यात्मनिनयनानंतरमेवद्द

दमपि कर्त्तव्यमिति दर्शयति। एनां स्रुचमित्यर्थः॥ विहारस्य प्रागुदग्देशे पूर्णाश्रुतस्त्वः स्रुचो
निनयेत्। एकैकेन मंत्रेणैकैकामिति॥ पंचमीकुशदेशपृथिव्यामं० स्यम्। तं प्राणे जुहो
मि स्वाहेति॥ पंचमीषष्ठीमिति॥ पूर्णास्रुक् संप्रत्ययार्थं॥ प्रताप्यां तर्वेदि निदध्यात्॥
अतएतन्नमाहवनीये स्रुवं तर्वेदिश ह समन्वयात्। प्रताप्य स्रुचमंतर्वेदिदेशे निदध्या
दित्युक्तं॥ परिकर्मिणे वा प्रयच्छेत्। परिचारकाः परिकर्मी इत्युच्यते॥ अग्रेणाहवनी
यं परीत्य समिधश्चाक्तिस्व क्तिस्व उदङ्मुखास्तिष्ठन्॥ पूर्वेणाहवनीयं विहारस्य दक्षि
णादेशं गत्वा तस्य दक्षिणदेशं गत्वा तस्य तस्यानिर्दिष्टि णत उदङ्मुखस्तिष्ठन्नतिस्वक्तिस्वः
समिधश्चादध्यात्। पुनः अपसयस्रुद्दिणादि कुर्यात्। प्रथमां समंत्रां॥ सकृन्मंत्रेणेतिप
रिभाषा प्रधानकर्मसु न प्रवर्त्तते इति कृत्वा प्रथमां॥ समंत्रामित्युक्तवानाचार्यः॥ आहवनी

श्रौ॰ सू॰
६१

येहीदिहीति॰ दक्षिणे होदिदायेति॥ सर्वे स्वाहाकारांताः कर्त्तव्याः॥ उक्तं पर्युक्षणं॥ यदुक्तं
पर्युक्षणं तदिहापि कर्त्तव्यं॥ ताभ्यां परिसमूहने॥ पूर्वोक्तमिदं च द्वे पर्युक्षणे ताभ्यां परि
समूहने व्याख्याते इति॥ धर्मातिदेशार्थोयं॥ परिसमूहने इति योगविभागात् स्वरूपसिद्धि
श्च भवति। मंत्रस्तु जपित्वेति पृथक्करणान्न भवति लिंगाभावाच्च॥ पूर्वे तु पर्युक्षणात्॥ येहे
परिसमूहने पर्युक्षणधर्मके विहिते तयोरनेन क्रमो विधीयते। पर्युक्षणाभ्यां पूर्वे
परिसमूहने भवत इति॥ एवं प्रातः॥ सायंकालेग्निहोत्रविधिरुक्तः। एवं प्रातःकाले
पि होमः कर्त्तव्य इत्यर्थः॥ तत्र विशेषमाह॥ उपोदयं व्युषित उदिते वा॥ उपोदयमादि
त्योदयसमीपं इत्यर्थः। व्युषिते उषस्युदित इत्यर्थः। उदितः आदित्यमंडले कृत्स्ने
उदित इत्यर्थः॥ एते त्रयः प्रातर्होमप्रधानकालाः॥ तत्र यद्युपोदयमुदित इत्युच्यते उ

राम
६२

दितआदित्येसति उदयसमीप इति द्वाभ्यां पदाभ्यामेक एव कालो विहितस्यात् तत् द्वौ ति
निवृत्त्यर्थं व्युषितशब्दात् पूर्वमुद्योदयशब्दं पठितवानाचार्यः॥ एतेषु त्रिषु कालेषु प्रधानं
यथा संपद्यते तथांगानामेवोत्कर्षो वा द्रष्टव्याः॥सत्यस्त्वा भ्यांत्वेति पर्युक्षणमाम्रु
मेष्यामीत्यं॰ सूर्यः स्वाहेति होमनु मार्जनं च॥ एते प्रातर्होमे विशेषाः॥३॥ प्रवत्स्यंन
ग्नीन्प्रज्वल्याचम्यातिक्रम्योपतिष्ठते॥ यस्मिन् ग्रामे अग्नयस्ते सतेतस्मात्प्रदेशा
द्ग्रामांतरे एकरात्रावमोवा सः प्रवासः॥ तं करिष्यन्प्रवत्स्यन्भवति। अग्नीनितिब
हुवचनात्सर्वान्विहृत्य प्रज्वलयेत्। प्रज्वल्याचम्य तीर्थदेशेन प्रपद्यातिक्रम्याग्नी
नुपतिष्ठते। अतिक्रम्य इति अव्यक्तोपस्थानदेशमतिक्रम्य अस्तं तत्समीपं तमग्नि
मुपतिष्ठत इत्यर्थः॥ इदं कर्माहिताग्निः स्वयमेव कुर्यात्। इदमनेनेत्याह॥ आहवनीयं शंस्य

औं०श्रौ०
६२

पशून्मे पाहीति गार्हपत्यं न० पूषेनानभिरक्षस्व स्मार्कं पुनरायनादिति ॥ दक्षिणाग्निमुप
स्थाय तत्रैव तिष्ठन्गार्हपत्याहवनीयावीक्षेत इमा मे मित्रावरुणाविति । उत्तरत्र यथे
तं प्रत्येत्येति वचनात्तत्रैव तिष्ठन्निति लभ्यते । द्विवचनलिंगाद्युगपदेवेक्षेत ॥ यथे
तं प्रत्येत्य प्रदक्षिणं परियन्नाह० स्तवाहं नाम बिभराण्यग्न इति ॥ आहवनीयमुप
स्थाय उत्तरेणाविहारं गत्वा गार्हपत्यस्य प्रत्यगुदग्देशेत्यंत समीपं गत्वा तमुपस्थाय
तद्वदेवास्थित्वा दक्षिणाग्निमुपस्थाय तत्रैव तिष्ठन्गार्हपत्याहवनीये क्षणं कृत्वा पुनः
स्तेनैव मार्गेणाहवनीयसमीपं गत्वा ततो गमनाय प्रदक्षिणमावर्तमानः आहव
नीयमुपतिष्ठते मम नाम प्रथममित्यनेन मंत्रेण । प्रव्रजेदनपेक्षमाणो मा प्रगामेति
सूक्तं जपन् ॥ ष्ठ तोऽग्नीनेक्षमाणो मा प्रगामेति सूक्तं जपन्यथेष्टं गच्छेत् । सूक्त ग्रह

राम
६२

यामनभ्यासार्थं॥ आरादग्निभ्यो वाचं विसृजेत॥ अग्निभ्यो दूरात्कृत्वा वाचं विसृजेत।
यावद्गृते गन्यागारच्छदिर्न दृश्यते तावदारात्त्वाद्वेनोच्यते। अत्रवाग्विसर्गविधाना
दितः प्राकृ यतवागेव सर्वं कुर्यात॥ स दा सुंगः पितुमात्र सुपंथा इति पंथानमवरुह्य॥
ब्रूयादिति शेषः। यो भिलाषितदेशगामी पंथास्तं प्राप्येत्यर्थः॥ अनुपस्थिताग्निः प्र
वासमापद्ये ० प्रतिदिशमग्नीनुपस्थाय॥ गच्छेदिति शेषः यदि कदाचिद्गृह्योक्तो
पस्थानमकृत्वैव गंतव्यं स्याद्देवान्मानुषाद्वा निमित्तात्तदा तत्रैव स्थित इहैव सं नित्यने
न मंत्रेण उत्पतिक्रमेणाग्नेतमग्निं ध्यात्वा तां तां दिशमभिमुख उपस्थाय गच्छेत॥ अ
पि पंथामगन्महीति प्रत्येत्य॥ ब्रूयादिति शेषः। प्रवासं कृत्वा प्रत्येत्य स्वग्रामसमी
पं प्राप्यापि पंथामगन्महीति ब्रूयात॥ समित्पाणिर्वाग्यतो ग्नीं ज्वलतः श्रुत्वाभि० अ

औ॰गृ॰
६३

ग्नेसुंभस्वतन्वःसंमारिष्यासुजेति॥ एतवाक्समिधोगृहीत्वापुत्रेणशिष्येणवापू
र्वंप्रस्थापितेनाग्नीन्विहृतांज्वलतश्वज्ञात्वास्वयमाहृताग्निराचम्यशुचिर्भूत्वो
त्तीर्थेनप्रपद्याव्यक्तदेशादृत्यंतसमीपदेशमभिक्रम्याहवनीयमीक्षेतविश्वदानी
मितिद्वाभ्यामंत्राभ्यां॥ अग्निमुसमिधउपनिधायाहवनीयमुप॰यथायथं
नीतन्वौजातवेद इति॥ इदानीमानीताःसमिधोविमज्यतस्याग्नेःसमीपेनिधा
यतत्राहवनीयमुपतिष्ठते।ममनामतवचेत्यनेनमंत्रेण॥ ततःसमिधोभ्याद
ध्यात्॥ उपनिहितापवास्मिंनतेनेत्याह॥ आहवनीयेगत्वाविश्ववेदसमस्मभ्यं
वसुवित्तमं॰पूषेनानभ्यराक्षीदस्माकंपुनरायनादिति॥ दक्षिणाग्निसमीपेशि
तइत्युक्तं॥ यथेतंप्रत्येत्य॥ परिसमुह्योदग्विहारादुपविश्यभूर्भुवःस्वरितिवाचं

राम
६३

विसृजेत। यथेतमित्युक्तार्थं यथेतं प्रत्येत्य सर्वस्य विहारस्य परिसमूहनं कृत्वा तस्यास्तरतउप
विश्य वाचं विसृजेत। भूर्भुवः स्वरित्यनेन। अथ सत्सति प्रवासनिमित्ते एवं प्रयोगक्रमः। सतितु
निमित्ते यथेतं प्रत्येत्य नैमित्तिकं कृत्वा परिसमूहनं वाग्विसर्गौ कुर्यात्। एवमेव सूत्रस्वरूपं विवि
च्यं॥ प्रोष्य भूयो दशरात्राच्चतुर्गृहीतमाज्यं० संतनोमि हविषा घृतेन स्वाहेति॥ दशरात्रा
दूर्ध्वं प्रवासं कृत्वा जुह्वां चतुर्गृहीतं गृहीत्वा तया जुहुयात् मनो ज्योतिरित्येतयर्चा। चतु
र्गृहीतश्चाद्दे वाज्यद्रव्यसिद्धो सत्या माज्यग्रहणं तूष्णीमुत्पवनलाभार्थं॥ अग्निहो
त्रहोमे च॥ अग्निहोत्रहोमविच्छेदे चैतामाहुतिं जुहुयात्॥ विशेषाभावात् एकस्य द्वयोर्वा
ह्नामपि विच्छेदे एषैव प्रायश्चित्तिः कार्या॥ प्रतिहोममेके चशब्दोत्राध्याहार्यः। एतामाहुतिं
हुत्वा प्रतिहोमं च कुर्यात्। इत्यर्थः। प्रतिहोमो नाम यावंतः कालो होमेन विच्छिन्नास्तावता

मेकैकंकालंप्रत्येकैकोहोमःकर्त्तव्यइति।एवंपरिसमुह्येत्यादिपूर्वमेवव्याख्यातं॥ गृहानि
क्षेताप्यनाहिताग्निर्ग॰शिवंशग्मंशंयोःशंयोरितित्रिरनुवीक्षमाणः॥ ईक्षणंप्रपदनंचा
नाहिताग्निरपिकुर्यात्।गृहामाबिभीतेतीक्षेत।गृहानहमितिप्रतिपद्येत।प्रतिपद्यमा
नएवंप्रपद्येतशिवंशग्मंशंयोःशंयोःशंयोरितित्रिरनुवीक्षमाणः।अनुवीक्षणमनु
मंत्रणं।मंत्रेणप्रकाशनं।तत्तुनर्मत्रेणविनाकर्त्तुनशक्यतइति।मंत्रोपित्रिरावर्त्तते॥ वि
दितमप्यलीकंनतदहर्ज्ञापयेयुः॥ अलीकमप्रियमवगतमप्रियंप्रवासादागतस्यतस्मिं
नहनिनेनिवेदयेयुः॥ विज्ञायतेभयंवोभयंमेस्त्वितिस्येवोपातिष्ठेतप्रवसन्नेत्यत्याहरहर्वे
ति॥ वाशब्दश्चशब्दस्यार्थे।अभयंवइत्यनेनप्रवत्स्यन्प्रवासादागतश्चाहरहरग्निहोत्र
होमेचउपतिष्ठेतेतिश्रुतिरेवोपन्यस्ताविज्ञायतइति॥ अस्मिन्पक्षेप्रयोगक्रमः॥ वि

हृत्य प्रज्वल्याचम्य तीर्थेन प्रपद्यतत्रैवस्थित्वा सर्वानग्नीन्सकृदेवोपस्थाय प्रदक्षिणमावृत्य
तीर्थेनैव निष्क्रम्य मा प्रगामेति जपन्प्रज्यसदासुग इति पंथानं प्राप्य क्रयात्। प्रत्येत्या
पि पंथामित्युक्त्वा विहृतां ज्वलितान् तीर्थेनैव प्रपद्यतत्रैवस्थित्वाऽभयं वइत्युपस्थाय
परिसमूहनादिशेषं पूर्ववत्। प्रति प्रवासोस्ति चेत् सस्यनैमित्तिकमपि कुर्यात्। अ
ग्निहोत्रहोमे च दक्षिणाग्निहोमानंतरं अभयं वइत्युपतिष्ठेत। पूर्वोक्तस्यानुमंत्रणस्य
याजमानत्वादस्य चोपस्थानत्वान्न विकल्पः। तेन समुच्चय एव। अनुपस्थिताग्नेः प्रवासेऽ
द्देवसंनित्येतदेव नान्यत्किंचित्॥४॥ अमावास्यायामपराह्णे पिंडपितृयज्ञः॥ अमावा
स्याहः प्रतिपत्त्यं च दृश्योः संधिवचनोप्यत्रापसहाशाह्नसमन्वयात् तद्दृत्य हो रात्रेव
र्त्तते। औतेपराह्णे अह्नश्चतुर्थभागे पिंडपितृयज्ञः कर्त्तव्यः। औपवसथ्येहनि यजनी

औ॰ वृ॰
६५

येवाहनि। यजतीयेचेत्स्वार्थ एव दक्षिणाग्निः प्रणीयते। यदापुनरहोरात्रसंधौ तिथिसंधिः
स्यात्तदोपवसथ्य एवाहनि क्रियते॥ दक्षिणाग्नेरेकोल्मुकं प्राग्दं॰ त्वग्निष्टाल्लौकात्प्र
णुदात्तस्मादिति॥ एकोल्मुकं एकतः प्रदीप्तमुल्मुकं प्रागदक्षिणा प्राग्दक्षिणस्यां दिशी
त्यर्थः॥ दक्षिणाग्नेः सकाशादेकोल्मुकग्रहीत्वा तस्मादेव प्राग्दक्षिणस्यां दिशि प्रणयेत्॥
ये रूपाणीत्यनेन मंत्रेण॥ सर्वकर्माणि तां दिशं॥ ऋत्विकशिष्टानि सर्वाणि कर्माणि ता
मेव प्राग्दक्षिणां दिशमभिमुखानि कर्त्तव्यानि॥ उपसमाधायोभौ परिस्तीर्य दं॰ सकृ
दाछिन्नेध्ममेत्तया कमंडलूनि॥ उभयोरुपसमाधानं परिस्तरणं च कर्त्तव्यं मध्यग
तस्योभावितिशब्दस्य विशेषसंबंधे कारणाभावात्॥ पात्राणीति चरुस्थाल्यादीन्यु
च्यंते। तेन संव्यवहारार्थं चरुश्रपणार्था स्थाली॥ चरुस्थाली। चरुस्थाली ध्रुवा शद्वेया

राम
६५

श्छांदसं ह्रस्वत्वं। एकेन प्रयत्नेन छिंनाः कुशाः सकृदाछिंनाः॥ दक्षिणेनाग्निं कुमारस्य चकरस्था
लीं व्रीहीणां पूर्णां निमृजेत्। निमृज्यादिति प्राप्ते निमृजेदिति छांदसः। अग्निसमीप इति कुती
त्यग्निं कृत्वा करं। प्रयाणकाले वाग्नयो यत्र तिष्ठंतीति। तदग्निं कृत्वा दक्षिणतत्रारूह्य तत्रैव
शूर्पे स्थालीं निधाय व्रीहिभिः पूरयेत्। तां पूर्णां निमृज्यात्। यथो परितना द्विलदेशाछू
र्पीपरि पतंति॥ परिसंनांनिदध्यात्॥ स्थाल्याः स्यदेशाछूर्पोपरि पतंति तान्परिसंनांछक
टे निदध्यात्॥ कृष्णाजिन उलूखलं कृत्वेतराः न्यत्न्यवहन्यादविवेचं॥ कृत्वा निधायेस
र्थः। इतरान्स्थाल्यंतर्गतानित्यर्थः। अविविच्या विविच्येत्यर्थः॥ अवहतानामकृत्स्ना
ल्प दक्षिणाग्नौ श्रपयेत्॥ अवहतेषु अवहतवचनं फलीकरणनिवृत्त्यर्थो दक्षिणा
ग्नौ श्रपयेदिति श्रपणावचनं वचनादितेगार्हपत्य एव श्रपणमिति ज्ञापनार्थं॥ अवीगति

औ० वृ०
६६

प्रणीतात्स्य० असुरारक्षांसि वेदिषद इति॥ दक्षिणाग्न्युति प्रणीतयोरंतराल उल्लिखे
दित्यर्थः॥ तामभ्युक्ष्य सकृदाच्छिनैरवस्तीर्य० ध्रुवायामाज्यं कृत्वा दक्षिणतः॥ आज्यं स
र्पिरित्यादि ध्रुवायामाज्यं कृत्वा दक्षिणात इत्येवमंतः पदसमूहः॥ आसादयेदभिघा
र्यैतस्मात्पुरस्तादर्थतो द्रष्टव्यः। तेनायमर्थः। लेखामभ्युक्ष्य सकृदाच्छिनैरवस्तीर्याज्यं स
र्पिर्गृहीत्वा ध्रुवायां कृत्वा दक्षिणतो दक्षिणाग्नेर्निधायनेनाज्येन स्थालीपाकमभिघार्य
दक्षिणाग्नेः पश्चादासादयेत्। यदि नवनीतमाज्यकार्यार्थ स्यात्तदा सविलापनमात्रं कृ
त्वान्यस्मिन्पात्रे आनीय पवित्राभ्यां तूष्णीमुत्पुयत ततो ध्रुवायां कृत्वा दक्षिणाग्नेर्निधायते
नाभिघार्येत्यादि समानं द्वितीयाज्यग्रहणस्येदं प्रयोजनं पात्रांतरस्थमुत्पूय पश्चाद् ध्रु
वायां ग्रहणमित्येवमर्थं। पूर्वमाज्यग्रहणं कार्यलक्षणार्थं। सर्पिः पक्वं नवनीतमपक्वं॥

राम
६६

ऋांजनाभ्यंजनकशिपूपबर्हणानि॥ दक्षिणातइत्यत्रापि संबध्यते। विशेषाग्रहणादपेक्षि
तत्वाच्च। आंजनादीनि च दक्षिणतो दक्षिणाग्नेर्निदध्यात्। पूर्वसूत्रप्रणयनाद्दक्षिण
तइत्यस्योभयार्थत्वायेव॥ प्राचीनावीती ध्ममुपसमाधाय सहं॰ग्नये कव्यवाहनाय स्व
धानमइति॥ इध्मः पंचदशसंख्याकः। मेक्षणेनादाय तेनैव जुहुयात्। अवदानसंप
दाऽवदानसंपंनाम उपस्तरणं द्विरवदानं प्रत्यभिघारणं च। तयेत्थंभूतं जुहुयात्। नात्र
स्वाहाकारः स्वधानमः शब्दस्य प्रदानार्थत्वात्॥ स्वाहाकारेण वाग्निं पूर्वं यज्ञोपवीती॥ स्व
धानमः शब्दस्य स्थाने स्वाहाकारं वा कृत्वा जुहुयात्। अस्मिन्पक्षे मंत्रविपर्ययः व्यत्यासः
यज्ञोपवीतत्वं च भवति। अग्निपूर्वमिति। अग्नये कव्यवाहनायेत्येतं मंत्रं पूर्वं कुर्यादि
त्यर्थः॥ मेक्षणमनुप्रहृत्य प्राचीनावीती लेखां॰ शुधतां प्रपितामहाइति॥ प्राचीनावीती न

औ॰ वृ॰
६२

हणं स्वाहाकारप्रदेपि मेक्षणानुप्रहरणो चरकालं प्राचीनावीतित्वप्रापणार्थः। उभयस्मि
न्पक्षेपि मेक्षणमग्नावनुप्रहर्तव्यमेव। त्रिभिर्मंत्रैस्त्रिर्निनयेत्। पिंडस्थानेषु॥ तस्यां पिंड
निपरणीयात्पराचीं। ततस्सौर्ये च त्वा मंत्रान्विति॥ अत्र षिकृत्वापं लेखा संप्रत्यपार्थेत स्यां
ग्रहणं क्रियते। नाधिकाराल्लेखासंबंधोस्तीति ज्ञापनार्थं। तेन हविरासादनमग्नेः पश्चादि
ति साधितं भवति। तथैक्तं च निपृणीयाद्दक्षिणादित्यर्थः॥ निपरणं पित्र्ये येवतीर्थेन पाणे
रुत्तानत्वमजहदेव पित्र्येण तीर्थेनियद्दाकुर्यात्तदपराचीनपाणिर्भवति। अत्र सावित्यस्य
स्थानोसंबुध्यंतानि पित्रादीनां नामानि गृह्णीयात्॥ तस्मैय एवां प्रेतास्युरिति गाणगारिः
प्रत्यक्षमितारानर्चयेत्तदर्थत्वात्॥ त्रयाणां मध्ये प्रेतानां पिंडदानं जीवानां प्रत्यक्षार्च
नमिति गाणगारेर्मतं। पितृप्रीत्यर्थत्वात्कर्मण इति॥ सर्वेभ्य एव वा निपृणीयादिति तौल्व

राम
६२

ति:। क्रियागुणत्वात्॥ पित्रादिभ्यस्त्रिभ्यः प्रेतेभ्यो जीवद्भ्यश्च सर्वेभ्यो निपरणं तोल्वलि
मन्यते। क्रियायामुद्देशकारकत्वेन च गुणेषु भूताः पितरः न तेषां प्रीतिः शास्त्रतो लोकतो वा
गम्यत इति॥ अपि जीवान्तं त्र्यात्रिभ्यः प्रे० क्रिया स्वार्थकारिता॥ आदिमध्यान्तशब्दैः पि
तृपितामहप्रपितामहा उच्यन्ते जीवः अन्तो यस्य स जीवान्तः अपिशब्देन जीवादि जीवम
ध्य इति लभ्यते। जीव सर्व इति च त्रयाणामेकस्मिन् द्वयोः सर्वेषु वा जीवत्सु वा यावदर्थं प
रान्पितॄननुगृहीत्वा प्रेतेभ्यस्त्रियो दद्यादिति गौतमो मन्यते। क्रियाह्यर्थकारिता मरणावद्
र्थे प्रवृत्ता यस्मात्क्रियेत्यर्थः॥ उपायविशेषो जीवन्मृतानां॥ पित्रादीनां जीवानां मृता
नां च पिंडदाने उपायविशेषो वक्ष्यत इत्यर्थः। उपन्यस्तान्यक्षां दूषयितुमाह॥ नवरेभ्यो
नधिकारत्वान्न प्रत्यक्षं न जीवेभ्यो निरूपणीयात्॥ गौतमगाणगारितोल्वलीनां क्रमेण दू

श्रौ॰ वृ॰
६८

षणानि॥ न जीवंतं न हितेभ्यः॥ जीवव्यवहितेभ्यो न निरूपणीया इत्यर्थः। सर्वपक्षव्यापीदं दूषणं। सर्वत्रानधिकारादित्ययमेव हेतुः। अनधिकारादयोग्यत्वादित्यर्थः। क्वचिद्विध्यभावात् क्वचिन्निषेधाद्योग्यत्वमवगम्यते। अयमुपायविशेष उच्यते॥ जुहुयाज्जीविभ्यः॥ जीवेभ्यो जुहुयात्प्रेतेभ्यो निरूपणीया इत्यर्थः। न जीवंतमतीयाद्दद्यादित्यत्रापि निषेधोस्ति। तेन जीवपितुः जीवोभयस्य वायमपि पक्षो नास्ति तत्र होमांतमनारंभो वा॥ अथ सर्वेषु जीवत्सु कथमित्याह॥ सर्वहुतं सर्वजीविनः॥ सर्वहुतमिति सर्वे पिंडा होतव्या इत्यर्थः। ।पिंडहोमो निपरणमंत्रे पास्वाहाकारं तेन कर्त्तव्यः। अत्र दूषणीयपक्षाणामुपन्यासे प्रयोजनं। सपिंडीकरणे पितामहे जीवति पितरि मृते संवत्सरादिषु तस्यावश्यकर्त्तव्यत्वात्तत्रैषां पक्षाणामुपयोग इत्येवमर्थं। एवमादीन्यन्यान्यपि प्रयोजनानि चिंत्यानि॥

राम
६८

नामान्यविद्वांस्ततपितामहप्रपितामहेति॥ पित्रादीनांनामाज्ञानेततादयःशब्दानामाष्ठ
नेप्रयोक्तव्याः। निहतताननुमंत्रयेताऽ॰ यथाभागमावृषायध्वमिति॥ निपृत्तीनितिप्राप्ते
नितिच्छांदसोनिर्देशः। निपृत्तीनेवपिंडाननुमंत्रयतेनहुतानित्येवमर्थंनिहुतानित्युच्यते॥
तेनसर्वहोमइदमनुमंत्रणंनभवति। अस्मिन्प्रकरणेयद्यपिपिंडानामेवानुमंत्रणमुपस्था
नंप्रवाहणंचविधीयते॥ तथापिमंत्राणांपितृलिंगत्वात्पिंडाएवपितरइतिकृत्वापित
रएवतेमंत्रैरभिधातव्याः॥ सव्यावृदुदङ्ङ् वृत्यपयथाशक्त्यप॰ यथाभागमावृषायीषतेति॥
अनुमंत्रयेतेतिशेषः। सव्यावृदुदङ्ङित्येतावसव्यावृत्वोदङ्मुखत्वयोः। सिद्धयोरावृत्येति
वचनमावृत्यैवोच्छ्वासोनपूर्वमितिएतदर्थं। यथाशक्त्यनुच्छ्वसंनासित्वापुनरभिपर्यावृत्या
मीमदंतइत्यनुमंत्रयते। आवृषायीषतेतियकारःपठितव्यः। व्यक्तिविवृत्तिःप्रमादजा॥

श्रौ॰वृ॰
६९

चरोः प्राणभक्षं भक्षयेत्॥ तूष्णीमेवात्र भक्षणं कार्यं॥ नित्यं निनयनं॥ यदुदकोपनयनमु
क्तं शुंधंतां पितर इत्यादिमंत्रकं तदत्र निनयनमित्युच्यते तदत्र कर्त्तव्यमित्यर्थः॥ अत्र सा
वर्ण्यं वासो वदध्वेति पिंडेष्वन्यं जनां जने॥ दद्यादिति शेषः॥ वासो दद्यादृशामूर्णास्तुकां वा
पं॰ मानो तोन्यत्पितरो युवध्वमिति॥ एतेषामन्यतमं द्रव्यं वासोर्थं पिंडेषु दद्यादित्यर्थः॥
दशा वस्त्रस्यांतप्रदेशः ऊर्णास्तुका वा अत्र विलोमानि पंचाशद्वर्षतायाः पंचाशद्वर्षेष्व
तीते पूर्वं जीवन्त्या यमेव लोम वासार्थं दद्यात्॥ मंत्रस्त्वयमेव सर्वेषु द्रव्येषु सकृदेव भवति॥
अथैनानुपतिष्ठेत नमो वः पितर इषे॰ जीवा वो जीवंत इह संतः स्याम॥ इति काराध्याहा
रेण सूत्रच्छेदः स्संतः स्यामेति मंत्रः पठितव्यो वकारं जैवे पित्वा॥ मनोन्वाहुवामह इति
चतिसृभिः॥ उपतिष्ठेतेति शेषः॥ अथैनान्प्रवाहयेत्परे॰ रयिं च नः सर्ववीरं नियच्छते

राम
६९

ति॥ अत्रापि पिंडस्थान्पि हन्त्वा हयेत्॥ अग्निं प्रत्येयाद्गग्नेतमग्ध्या स्वंनस्तोमेरिति॥ प्र
त्येयादिति वचनसामर्थ्याद्दक्षिणासुखेनात्र किंचिदनुव्रजनं कर्त्तव्यं॥ अग्निं प्रत्येयाःमे
रिति अविशेषवचनेन दक्षिणाग्निमेव॥ इतरयोर्विशेषाभिधानात्॥ गार्हपत्यं यदंतरि
क्षं पृथिवीमुं करोतु मामनेनसं॥ इति प्रत्येयादिति शेषः॥ पत्नीप्राशयेत्॥ धत्तं॰ पयाय
मस्पात्त्वसदिति॥ तमेवमध्यममिति शेषः॥ पत्न्येवमंत्रं ब्रूयाद्ध्यत्तेति॥ क्षितरो॥ प्रक्षि
पेदपि पेदित्यर्थः॥ अतिप्रणीते वा॥ प्रक्षिप्य दाहयेत्॥ यस्यावागंतुरंनकाम्याभावःस
प्राश्नीयात्॥ आगंतुरभिनवः॥ निर्निमित्तएवान्नेच्छाभावो यस्य सवेतरो प्राश्नीया
त्॥ महारोगेणवाभितप्तः प्राश्नीयादन्यतरंगतिंगच्छति॥ तपकृच्छ्रादिनाशक्यप
रिहारेणाति पीडितः प्राश्नीयादिति पुनर्वचनं पूर्वेणास्यसंबंधनिवृत्त्यर्थं॥ तेनान्य

अ

औ॰ वृ॰
७०

तरामित्यत्रैवम भवति॥ अन्यतरां गतिं गच्छतीत्ययमर्थः॥ सद्य एव अरेगो भवेत् म्रि
येत वेति॥ एवमनाहिताग्निर्नित्ये॥ अनाहिताग्निरप्येवं पिंडपितृयज्ञं कुर्यात् नि
त्येष्वौपासने इत्यर्थः॥ अपयित्वातिप्रणीय जुहुयात्॥ तस्यायं विशेषः॥ हविः
श्रपणं कृत्वातिप्रणयनं कर्तव्यं। तस्यैवातिप्रणीतस्योपसमाधानं परिस्तरणं च
कृत्वा ततो वीगति अपणीतादित्यादि समानं जुहुयादित्ययमनुवादः॥ अयं चात्र विशे
षः यदंतरिक्षमित्यस्मिन्मंत्रे गार्हपत्यशब्द उद्धर्तव्यः॥ तच्छब्दप्रवृत्तिनिमित्तस्य संस्का
रस्यात्राभावादिति॥ द्विवत्पात्राणामुत्सर्गः॥ द्विशब्द इत्यर्थः॥ तृणं द्वितीयमुदिक्ते॥ ए
कस्यातिरिक्तस्य तृणे न द्वित्वं संपाद्योत्सर्गः कर्तव्य इत्यर्थः॥ ५॥ दर्शपूर्णमासावार
भ्यमानोऽन्वारंभणीयां॥ पूर्वं दर्शपूर्णमासयोः स्वरूपमात्रमुक्तं। इदानीं तयोरनुष्ठाना

राम
७०

रंभ उच्यते। इदानीं तावारप्स्यमानस्यान्वारंभणीयाविधानात्। यस्मादाधानानंतरमज
स्त्वग्निहोत्रपिंडपितृयज्ञानुक्तानयोरारंभ उच्यते। तस्मादेतत्साधितं भवति। पौर्णमास्या
माधानमिच्चेष्टिं कृत्वा ततो जस्त्वप्यास्यामग्निहोत्रहोमं च कृत्वामावास्यायां पिंडपितृ
यज्ञं च कृत्वा पौर्णमास्यां तयोरारंभ इति। तत्र यद्यापस्तंबवचनं पौर्णमास्यां तु पूर्वस्मि
न्पर्वणि सेष्टिसान्वारंभणीयमपवृज्य श्वोभूते पौर्णमासेन यजत इति। तत्र स्याप
मर्थः। पौर्णमास्यामाद्ध्यानस्तद्दहरेव पौर्णमासीमारभेत इति। तस्यायं विषयः। य
स्यां पौर्णमास्यामनारंभणीयापवर्ग्यं तं सर्वं प्रतिपत्यं चतुर्दशी संधिक्षणात्प्रागेव क
र्तुं शक्यते सास्य विषयः। सं ध्य नयगमात्पौर्णमास्यधिकार आप्तिरिति। एकस्मिं
नह नियउत्तरस्मिन्क्षणे दर्शपूर्णमासावारभते स तस्मात्पूर्वस्मिन्क्षणे तावारप्स्यमान

श्रौ'वृ
७१

इत्युच्यते। तस्यान्वारंभणीयाकर्त्तव्या॥ सेयंपुरुषार्थानकर्मार्था॥ श्रुत्यादीनामभावत्वाद्
र्शपूर्णमासावारप्स्यमान इत्यनेनचकर्मसंबंधोवक्तुंनशक्यते निमित्ततस्याधिकारिविशेष
णत्वेनउपलक्षणात् उद्देशकत्वंनभवितुमर्हति। तस्मादनंगंतयोरन्वारंभणीया॥ तथापि
तत्संबंधिपुरुषसंबंधात् तयोरेवाधिकारित्वेनपुरुषंसंपादयतीति। युक्तमुक्तं।
अतोदर्शपूर्णमासावृत्तौविकृतिषुवनपुनःकार्यातिदेशाभावात्। कार्यसंबंध्यति
देश्यते। नपुरुषार्थसंबंधमपीति॥ अग्नाविष्णूसरस्वतीसरस्वानग्निर्भगी॥
भगीत्यग्नेर्गुणः॥ अग्नाविष्णूसजोषसेमा॰मासवेसावितुर्यथासनोराधांस्या
भरेति॥ इष्टौयाज्यानुवाक्या॥ आधानाद्यधामयावीयदिवार्थीव्यथेरन्पुनराधे
यइष्टिः॥ आमयावीउदरव्याधिमान्। अर्थेव्यथा अर्थहानिः॥ अर्थीःपुत्रपश्वा

राम
७१

दर्पः त्र्याधानानंतरं तस्मिन्नेवसंवत्सरे यद्येतानि निमित्तानि स्युः तदा पुनराधेयं कर्तव्यमिति त्र्य
यमर्थोऽस्मिन्सूत्रेऽर्थाल्लभ्यते। तस्मिन्पुनराधेये वक्ष्यमाणलक्षणोऽतिदेशः कार्य इत्यर्थः॥ तस्यां
प्रयाजानुयाजान्विभक्तिभिर्यजेत्॥ तस्यामिति वचनं तस्यामेवेष्टौ नान्यस्यां वक्ष्यमा
णो विधिः स्यादित्येवमर्थं। तेन ज्ञायते नैकेष्टिकं पुनराधेयमिति॥ विभक्तिभिः सहिता
न्प्रयाजानुयाजान्कुर्यात्। का विभक्तिः। क्व वा प्रदेशे प्रयोक्तव्या। किं सर्वेषु उत कतिपयेष्विति
ति एतेषां संशयानां निवृत्तये चतुरः प्रयाजान्पठित्वा तानेव प्रयाजांश्चतुरो विभक्ति
भिः सहितान्पठति द्वावनूयाजौ च पठति तयोरविकृतत्वसिद्ध्यर्थं॥ समिधः समिधो
ऽग्न आज्यस्य व्यंतु तनूनपात् बर्हिरग्निरग्न आज्यस्य वेत्विति॥ नराशंसिनां नराशंसो
ऽग्निमग्न इति विभक्तिविधानस्याविशेषात्। पाठस्य चोत्तम प्रयाजानुयाजव्यावृत्त्य

र्थत्वात्॥ समिधाग्निं दुवस्यतेत्युभ्ब्रवाणित इत्याग्नेय्या वाज्यभागो॥ सोमस्याग्नेव्यमि
रेव। तयोरेते अनुवाक्ये॥ बुद्धिमदि दुर्मतावित्याचक्षते। आज्यभागयोरेतौ गुणौ॥
तथानुवृत्तिः॥ निगमेषु सगुणयोरेवानुवृत्तिरित्यर्थः॥ इज्या च॥ इज्याशब्देन याज्यायां
देवतादेश उच्यते। स च सगुणयोरेव कर्त्तव्यः। केचिदिहानुवृत्तिशब्देनैव देवतादेशस्यापि ग्र
हणमभ्युपगम्य इज्या च इज्या च इत्यनेन याज्यामध्यगतस्याग्निशब्दस्य गुणोत्वाणमि
च्छेति॥ नित्यं पूर्वमनुब्राह्मणिनः॥ मित्यः केवलोग्निः। अनुवाक्या चाग्निर्वृत्राणीत्यनुब्रा
ह्मणिन आचार्याः॥ अग्न आयूंषि पवस इत्युत्तरं॥ उत्तरोपि केवलोग्निरियं चानुवाक्या
अनुब्राह्मणिनामेवाभिप्रायेण॥ नित्यस्तूत्तरे हविःशब्दः॥ उत्तरेयाज्यामंत्रे हविःश
ब्दस्य सोमधर्मत्वात् तं निवृत्तौ तस्य निवृत्तिप्रसंगे तत्स्थानापन्नत्वादग्ने यं हविः। अ

धाह्यग्ने क्रतो भद्रस्याभि० देवो नराशंसो ग्नो वसुवने वसुधेयस्य वेत्विति ॥ गतार्थमि
दं ॥ ८ ॥ आग्रयणं व्रीहिश्यामाकयवानां ॥ अग्निस्त्वयनं भक्षणं येन कर्मणा तदाग्र
यणं । प्रथमद्वितीयपोर्ह्रस्वदीर्घत्वव्यत्ययः ॥ एषां त्रयाणां द्रव्याणां संवत्सरे प्रथमनि
ष्पन्नानामाग्रयणं नाम कर्म कर्त्तव्यमित्यर्थः । व्रीहिशब्दस्य प्रथमनिपातो व्रीहीणां प्रा
धान्यस्थापनार्थं तेन कालचोदनं व्रीह्याग्रयणस्य भवति । श्यामाकशब्दस्य मध्ये निपा
तो व्रीहिकालाद्यवकालो भिन्न इति ज्ञापयति ॥ सस्यं नाश्नीयादग्निहोत्रमहुत्वा ॥
सस्यं नवनिष्पन्नं । तं नाश्नीयादाग्रयणेनानिष्ट्वा । यद्याग्रयणेनानिष्टवतो नवनि
ष्पन्नाशने न विनानि वहिन स्यात् । तदा तेषां द्रव्याणां तत्कालनिष्पन्नेन सायं प्रातर
ग्निहोत्रं हुत्वाश्नीयात् । ततः कालस्त्वागते त्वाग्रयणं कुर्यात् । त्वग्निहोत्रमहुत्वा

श्रौ॰ वृ
७३

नाश्नीयादिति वचनादाग्रयणेनानिष्ट्वाग्निहोत्रं हुत्वाश्नतो न दोष इति गम्यते। सस्याग्र-
हणं व्रीह्याद्यन्यदपि यन्निष्पन्नं तस्य सर्वस्य प्रतिषेधार्थं॥ यदा वर्षस्य तृप्तः स्यात्तदाग्र-
यणेन यजेत॥ यदा वर्षेत् प्रतिलोकस्य भवति तदाग्रयणेन यजेत। अनेन प्रकारेण व्रीह्या-
ग्रयणस्य शरत्काल उक्तो भवति। एतमेव कालं स्तुत्या समर्थयति॥ अपि हि देवा आहुस्तृ-
प्ता नूनं तस्याः पयसा जुहुयात्॥ आग्रयणेन यजेतेति दृष्टिरेवाग्रयणशब्देनोक्ता। इ-
दानीमिदमप्युच्यते। अग्निहोत्रहोमार्थी धेनुरग्निहोत्रीत्युच्यते। तां व्रीहिश्यामाकय-
वानामन्यतमं आशयित्वा तस्याः पयसा सायं प्रातरग्निहोत्रं जुहुयात्। इष्टिः प्रथमः क-
ल्पः। इति द्वावेवाग्रयणकल्पौ अत्रोच्यते॥ अपि वा क्रियापायवेषु॥ यवैराग्रयणस्य क्रि-
या भवेत् अक्रिया वेति विकल्पः॥ इष्टिस्तु राज्ञः॥ त्रयाणां वर्णानामविशेषेण कल्पद्व-

राम
७३

यप्राप्तो राज्ञो विशेष उच्यते। दृष्टिरिव नान्यदिति॥ सर्वेषांचैके॥ सर्वेषामपि वर्णानामिष्टि
रेवेत्येके मन्यंते॥ श्यामाके स्यां सौम्यश्चरुः॥ श्यामाकाग्रयणे स्यात्सोमदेवत्यश्चरु
र्भवति। कालो वर्षास्तु॥ शास्त्रांतरे दर्शनात्॥ सोम्यास्ते मयोभुवो याते धामानि॰म
द्यं यशा सिमह्यमंनाद्याय॥ इति कारा ध्याहार्यास्तु चैवेदं॥ नित्यजपशेषेनेच्छेभाग
मितिमंत्र उच्यते। तस्य नित्यमपिनित्यवचनं एते न भक्षिण इति विध्यतिदेशे तद्वर्जि
तस्य प्रापणार्थं॥ भद्रान्नः श्रेयः समनैष्ट देवास्त्वयावसेन॰ दमाम एधि मामृथा मदेदि
ति॥ स्मृतिप्राप्तस्याचमनस्य विधानं यस्मिं देशे आचमनं कृतं तस्मिं नेव देशे तत्
स्य नाम्यालंभनसिध्यर्थं॥ एतेन भक्षिणो भक्षान्सर्वत्र न वभोजने। एतेन विधानेन स
र्वभक्षेषु सर्वे भक्षिणः सर्वान्भक्षान्भक्षयेयुः॥ सर्वत्रवचनं प्रकरणादुत्कर्षार्थं॥ नव

भोजनवचनं लौकिकेपि नवभोजने प्रापणार्थं। सर्वत्र वचनात् प्रकरणादुत्कृष्टमपि
नवचनाल्लौकिक एव व्यवतिष्ठते। वैदिकेग्निहोत्रहोमे नवानां सवनीयादिष्वत्र
न प्राप्नुयात्। तत्रापि प्रापणार्थमिहावचनं। अथ व्रीहियवानां धाय्ये विराजौ॥
अथानंतरं व्रीहीणां यवानां चाग्रयणेष्टिरुच्यते। तत्र व्रीह्याग्रयणस्य कालउक्तः
वसंतो यवाग्रयणस्य। तत्र हि ते धान्य प्रथमः पाक इति तंत्रे विशेषाभावात्। उभयोः
सह वचनं तयोर्धाय्ये विराजौ भवतः। इतरस्यां पौर्णमासतंत्रे वैराजमित्येतावतेवोक्ते
पितावन्मात्र विकारसिद्धो सत्यां धाय्ये विराड्ग्रहणं विकल्पेन वृधन्वतोरपि प्रापणा
र्थं॥ अथ प्रथमं द्वावैंद्राग्नी वा विश्वेदेवाः सोमो यदि तत्र श्यामाको द्यावापृथिवी॥ आ
द्ययोर्विकल्पे नैतादेवतागृह्यंते। यदि श्यामाकाग्रयणमस्यामेवेष्टौ समानतंत्रेण

क्रियते तदा शोभमस्य तीव्रो भवति ॥ आप्यायेऽग्निमिंधते सुकर्माणः । पूर्वेर्वे जे पित
रा नव्यसीभिरिति ॥ इंद्राग्न्योः सोमस्य चोक्ता याज्यानुवाक्याः ॥ ७ ॥ अथ काम्याः ॥
अथानंतरं काम्या इष्टयो वक्ष्यंते ॥ आ चातुर्मास्येभ्य इत्यर्थः । काम्या इति वचनम
नित्याः शास्त्रात् तदपि तासां कामोऽन्वेष्टव्य इत्येवमर्थं ॥ आयुष्कामेष्ट्या जीवातुमंतो ॥
आयुष्कामेष्टिः ॥ अस्मिन्प्रकरणे काममपहाया नामे तत्प्रायो ज्ञानं यद्देवतासंयुक्ताया
मिष्टौ यतं त्रीहि विहितं तद्देवतासंयुक्तायामप्यन्यकामसंयुक्तायां तं न भवतीति ज्ञापना
र्थं ॥ आनो अग्ने सुचेतुना त्वं सोम महे भगमिति ॥ अग्निरायुष्मानिंद्र स्त्राता ॥ द्वे दे
वते आयुष्मान्नित्यमगुणाः ॥ त्रातेतींद्रस्य गुणाः ॥ आयुष्टे विश्वतो दधदयं० स्वस्त्यय
न्यां रक्षितवंतो ॥ स्वस्तिगमनसाधनीभूता स्वस्त्ययनीष्टिः ॥ अग्ने रक्षाणो अंहसः स्त्वं नः

सोमविश्वतइति॥ त्वंनः सोमविश्वतइति ऋक्षालिंगाद्वितम्येव॥ अग्निः स्वस्तिमान्। स्वस्ति
नोदिवो० अग्नइह इति पूर्वयोक्तेसंयाज्ये॥ याहिनइ इत्येते॥ पुत्रकामेष्ट्यामग्निः पुत्री॥
पुत्रंकामेष्टोऽग्निः पुत्रीदेवता। पुत्रीत्यग्नेर्गुणः॥ यस्मैत्वं सुकृते जातवेदोयस्त्वा०
आग्नेय्या उत्तरे॥ ये उत्तरेइष्टी वक्ष्येते मूर्द्धन्वते कामायेति च ते अग्निदेवत्ये एवं भ
तइत्यर्थः॥ पूर्वस्यामग्नेर्मूर्धन्वान्गुणः। उत्तरस्यां कामो गुणः॥ नित्येमूर्द्धन्वतः॥ अग्नि
र्मूर्द्धा भुवो यज्ञस्येत्यर्थः॥ तुभ्यंता अंगिरस्तमाभ्याम। तंकामगुणस्याग्नेस्तुभ्यंता अंगिरस्त
माभ्यामतंकाममितियाज्यानुवाक्ये॥ विमृध्या उत्तरे॥ उत्तरे द्वे इष्टी वैमृध्यौ भवतः। तयो
र्वक्ष्यमाणे याज्यानुवाक्यायुगले ते इंद्रदेवते भवतः। स चेंद्रो विमृद्गुणकः। विमृधगुण
को वा भवति। अतएते इष्टी वैमृध्यो इत्युच्यते॥ विनइंद्रमृधोजहि मृगोनभीमः कु

च॰ चनी खुदस्य थासपमभिनः सुश्रुतिं नयेति॥ एते पुष्टिकामस्य याज्यानुवाक्ये॥
इंद्रा पर्वता त्रे पुनर्दी त्रे वा॥ इंद्रो दाता सु पुनर्दाता वा देवता भवति। उभय थाप्येते एव याज्या
नुवाक्ये वचन सामर्थ्यात्॥ यो निनीधना निक्रु द्धो जिनासि मन्युना॰ हविषा मधातो
ति। आशानामाशापालेभ्यो वा॥ आशापाला वा देवता। अत्रापि याज्यानुवाक्ययोरेकं।
आशानामाशापालेभ्यश्चतुर्भ्यो अ॰ त्वग भीताः पशवः संतु सर्व इति। लोके ष्टिः॥ इष्टि
नामेदं॥ पृथिव्यंतरिक्षं द्यौरिति देवताः॥ देवताग्रहणं पृथिव्यादीनां पृथगेव देवतात्व
सिद्ध्यर्थं। त्रिलिंगत्वा द्याज्यानुवाक्ययोस्तिस्रः संहिता एका देवता मा भूदिति। तेनैत
त्साधितं भवति॥ याज्यानुवाक्यालिंगाद्देवतानिर्णयः कार्य इति॥ पृथिवी मात
रं मही मंतरिक्षं॰ द्यौर्मे शर्म मम हि अव इति। तिसृस्रयाणां॥ एतास्तिस्रः सच स्रयाणांह

श्रौ॰ वृ॰
७६

विषांयाज्यानुवाक्या भवंति। उत्तरसूत्रे विनिवेशसामर्थ्यादेवास्यार्थस्यार्थस्यसि
द्धो सत्यां वचनमिदमन्यत्रापि तिसृणां याज्यानां विहिता एवं विनिवेशयितव्या इत्येवमर्थं।
एवं भवतीत्याह॥ प्रथमे प्रथमस्योत्तरे मध्यमस्योत्तमा प्रथमा चेत्तमस्य॥ ८॥ मित्रविं
दामहाविराजी॥ मित्राणि पयो विंदते समित्रविंदा। गुणनामैतत्। महाविराजीति नामे
वा। अग्निः सोमो वरुणो मित्र इंद्रो बृहस्पतिः॰ त्वेष्ट्रेत्येकप्रदानाः॥ दशैता देव
ता एकप्रदानाः॥ महाविराज्यां भवंति। एकप्रदानशब्दउक्तार्थः॥ अग्निः सोमो वरुणो मि
त्र इंद्रो बृह॰ त्वष्टा रूपेण समनक्तु यज्ञं॥ इयमनुवाक्या॥ प्रतिलोममादिष्य यजेद्धे
याजा॰ मित्रो दाता वरुणः सोमो अग्निरिति॥ एता देवताः प्रतिलोममादिश्य यजे
धेयजाम ह इति वचनं याज्यायामेव प्रतिलोमत्वं नान्येषु निगमेष्वित्येवमर्थं। प्रति

राम
७६

लोमविधानादेवप्रतिलोमत्वे सिद्धे प्रतिलोमपाठस्येदं प्रयोजनं। उत्पत्तियागक्रमदृत्य
स्यन्यायस्यैंद्रामारुत्यामुक्तत्वादुत्तरेषु निगमेषु प्रतिलोमत्वं स्यादिति तन्निवृत्त्यर्थं। दू
हं च पाठप्रयोजनं। वरूयास्याप्सु पांसुत्वं भवती। तात्वष्टारूपाणीति याज्या॥ त्वष्टो वै
राजतंत्रा:॥ आग्नेय्यां उत्तरे इत्येवमाद्यामाहा वैराज्यं ताइष्ट्यो वैराजतंत्रा:॥ तासा
माद्या: षड्वैकहविषा:॥ अनुवादोयं प्राप्तत्वात्। प्राप्तानुवादे प्रयोजनं हवि: शब्देन प्र
धानहविषामेवेग्रहणमिति ज्ञापनार्थ:। स्नुषा श्वसुरीयया अभिचरन्यजेत॥ स्नुषा श्व
शुरीयानामेष्टि:। तयाभिचरन्नुराम्नुं मारयामीति संकल्पयन्यजेत॥ इंद्र: सरो अत
रद्रुजां सि स्नुषा सप॰ सपत्ना वाचं मनस उपासतां॥ याज्यानुवाक्ययोर्लिंगादेवास्या
देवताकल्प्या॥ सा चेंद्रा: इंद्र: शूर गुणो वा॥ जुष्टो दमूनी अग्ने शर्द्धमहते सौ॰ विम

श्रो० २०
२७

तानां संसत्यर्थे संज्ञानी॥ विमतानां विमनस्कानां संमतिप्रयोजनार्थे संज्ञानी नामेष्टिः का
र्या॥ अग्निर्वसुमान्सोमो रुद्रवा० आदित्यवानित्येकप्रदानाः॥ चतस्रः सगुणदेवताए
कप्रदाना वेदितव्याः॥ अग्निः प्रथमो वसुभिर्नो अव्यात्सो० समादित्यैर्वरुणो विश्ववे
दा इति॥ एषा संज्ञानी नामेष्टिः॥ स्वामिभृत्ययोः संमत्यर्थं। यः समाने मिथो विप्रियः स्या
त्तमेतया याजयेदिति श्रुतेः॥ ऐंद्रामारुतीमेदकामाः॥ इंद्रश्च मरुतश्च देवते यस्याः
सा ऐंद्रामारुतीत्येवात्र विग्रहः। केवलानां मरुतां याज्यानुवाक्यादर्शनादिंद्रस्य
च पूर्वयोक्तयोर्ग्रहणेनाद्विदेवत्येयमिति निश्चीयते। भेदकामाः राज्ञां च विशां च। लो
के आहिताग्नयो यदि स्युः तेषामस्यामधिकारः एकैकस्यैव॥ मरुतो यस्य हि क्षये प्र
राद्धीयमारुताय स्वभानवइति॥ इंद्रस्य नित्ये एवा॥ ऐंद्रीमनूच्य मारुत्या यजेन्मारुत्याय

राम
२७

जेन्मारुं०ऽदिंद्रं पूर्वं निगमेषु मरुतो वा॥ प्रधानक्रम इति प्रसिद्धो न्यायः। अत्र तु प्रधानयोः
परस्परस्य परव्यतिषक्तसिद्धयोः क्रमो नास्तीत्याज्यानुवाक्याभ्यामुभाभ्यां यागक्रिया
न यथावभूतस्य उद्देशभागस्य सिद्धेरिति मन्यमानो विकल्पमुक्तवान्। अमुदस्यत्येनं॥ इंद्रं
वा॰ अग्रदानादूर्ध्वं मरुतः॥ सत्यमुत्पत्तिक्रमाभावे प्रधानक्रम एवांगानां भवति। उत्पत्ति
क्रमे तु सति स एवानुपजातविरोधित्वात्प्रधानाबाधात् भवति पश्चात्तु प्रधानक्रम एवेति
न्यायः। अत्र तु प्रधानयोः क्रमोस्त्येवायाज्याया एवोद्देश्यतया प्रतिपादकत्वात्। आवा
हनादिवदनुवाक्याया देवताद्रव्यस्वरूपप्रतिपादकत्वात्तमारुत एवात्र यागः पूर्वं
क्रियेत। पश्चादैंद्र इति विनिवेशमुक्तवानाचार्यः। वा शब्दोत्र पक्षव्यावृत्त्यर्थः॥ प्रकृ
त्या संपत्तिकामाः संज्ञानीं च॥ पयसा हितामग्न्योराजवि ज्ञां संपत्तिं कामयेरन्॥ तदा तेष

तेदेवतेप्रकृत्येवयजेरन्। पूर्ववदैकदेवतेततः संज्ञानीं च कुर्युरेवमेव॥ ऐंद्राबार्हस्पत्यां
प्रध्यमाणाः शत्रुभिरभिभूयमानाः॥ अग्नानइंद्राबृहस्पती अस्मे इंद्रो इं॰ यद्यपींद्राय
चोदयेयुः॥ यद्यैंद्राबार्हस्पत्यं निरूप्य इंद्राय चोदयेयुः॥ अध्वर्यवः यद्वा बार्हस्पत्यं
निरूप्यं इंद्राय चोदयेयुः॥ उभयोरपि पक्षयोरेते एव याज्यानुवाक्ये भवत इत्यर्थः॥ दे॥
पवित्रे ष्ठ्वा॥ एतत्वं ड मात्रं नरं॥ २०॥ वर्षकामेष्टिः कारीरी॥ वर्षकामस्य कारीरीनामेष्टिः का
र्या॥ तस्यां प्रतित्यं चारुमध्वरमी ळे अग्निं वसन मोभिरिति धाय्ये॥ तस्यामिति कारीर्यामित्य
र्थः॥ अत्र बहुदेवत्याया आम्नानात् अन्यदाद्यमेव कारीरी एकदेवत्या भवति तस्या मपि
प्रापणार्थं तस्यां ग्रहणं॥ याः काश्चवर्षकामेस्यो प्सुमंतो॥ एतौ वर्षकामेष्टिमात्रे भवतः॥
अप्स्वग्ने सधिष्टवा प्सुमे सोमो अब्रवीदिति॥ अत्र पूर्वस्या गायत्री त्वात्तत्रा हचर्या दुत्तर

पिगायत्र्येवग्रहीतव्येति। तथा चोत्तरत्रवक्ष्यति। अग्रमंतौ गायत्राविति। इदमेववा
क्याम्नायमनुसरन्॥ अग्निर्धामच्छन्मरुतःसूर्यः॥ धामच्छदित्यग्नेर्गुणः॥ तिस्रश्च पिंडू
त्तराः॥ उत्तरास्तिस्रः पिंड्यश्च भवंति। पिंड्य इति पिंडीद्रव्यामरुद्देवत्यास्त्रयोयागाइत्यर्थः
। हिरण्यकेशोरजसोविसारइतिद्वित्वंत्याचिंनियुत्वंतोग्नामजितोयथानरः॥ धा
मच्छदोयाज्यानुवाक्यायुगलद्वयंव्यवस्थयायोजनीयं। यदाकेवलोग्निस्तदापू
र्वयदाग्निर्धामच्छत्तदोत्तरमिति॥ अग्नेबाधस्वविमृधोविदुर्गहायं स्वचोनृ
च्यय जुर्भिरेकेयजंति॥ पिंडीयागानितिशेषः। राकेशाखिनस्त्वएवानुवाक्याउ
क्ताय जुर्भिरेवपिंडीयागंकुर्वतीत्यर्थः। अत्रविसेषस्तेभ्यएवाधिगंतव्यः संस्थि
तायांसर्वादिशउपतिष्ठेताछां प्रत्यृचंसूक्तेनसूक्तेनवा॥ एकैकांदिशंसर्वादिशाइ

श्रौ॰ वृ॰
७९

त्युपक्रम्य चतसृभिः प्रत्यृचमित्युपसंहारादन्यत्रापि दिशां सर्वत्वं च सर्वत्र पर्यवस्यतीति
गम्यते। सूक्तेन सूक्तेन वा। एकैकां दिशं कृत्स्नेन सूक्तेनोपतिष्ठेतेत्येवं ॥११॥ अथात ऊर्ध्व
मिष्ट्ययनानि ॥ अथात ऊर्ध्वं यानि वक्ष्यामि तस्मिन् ध्यायेतानीति विद्यात्। इष्टिभिरयनं
गमनं येषु कर्मसु तानीष्ट्ययनानि ॥ सांवत्सरिकाणि ॥ संवत्सरेण क्रियन्ते संवत्स
रे वा क्रियन्त इत्युभयथा विग्रहः कर्तव्यः ॥ दाक्षायणयज्ञ चातुर्मास्यानामनेकसांवत्सरि
कत्वसिध्यर्थं ॥ तेषां फाल्गुन्यां पौर्णमास्यां चैत्र्यां वा प्रयोगः ॥ फल्गुनीभिर्युक्ता पौर्णमा
सी फाल्गुनी चित्रया युक्ता चैत्रीति। तेषां सांवत्सरिकाणामागन्तुकानीम [illegible]
[illegible] स्मिन् काले प्रारंभः कार्यः ॥ दर्शपूर्णमासगुणविकाररूपाणां दाक्षायणयज्ञादी
नामारंभे कालनियमो नास्तीति तेषामित्युच्यते ॥ तुरायणं ॥ तुरायणं नामेष्ट्ययनमुच्य

राम
७९

ते॥ अग्निरिंद्रो विश्वेदेवा इति एष्वग्निष्टोमेनु सवनमहरहः॥ अग्निदेवत्यादिंद्रदेव
त्या विश्वेदेवदेवत्याश्चैतास्तिस्र इष्टयः क्रि सुसवनेषु यथासंख्येन नैकैकेष्टिः कार्या ऽ
हन्यहनि। अहरहरितिवचनं पौर्णमावास्ययोर्वाधनार्थं॥ एका वा त्रिहविः॥ एताभिरेव
देवताभिर्युक्ता एकैव इष्टिस्त्रिहविष्का ऽहनि प्रातःसवन एव कर्त्तव्या वेत्यर्थः॥ दाक्षायण
यज्ञे द्वे पौर्णमास्यौ द्वे अमावास्ये यजेत॥ दाक्षायणयज्ञः कर्त्तव्य इत्ययमर्थो र्थाल्लभ्यते।
तस्मिं दाक्षायणयज्ञे द्वे पौर्णमास्यौ द्वे अमावास्ये यजेत द्वितीयानि र्देशात्प्रतिपन्नयो
र्द्विगुणत्वं गुणो विधीयते नाप्रतिपन्नयो र्द्विस्त्वविशिष्टयोर्विधानमत्रेति गम्यते। एतदु
क्तं भवति। या पौर्णमासी या मावास्या ते एव स्वस्वकाले द्विरावर्त्तयितव्ये इति॥ नित्ये पूर्वे
यथासंनयतोमावास्यायां॥ आवृत्तयोः पूर्वे ये ते उक्ते एव न विकृते। तत्रामावास्या

श्रौ० वृ०
८०

द्वित्वेऽसंनयतो यासेव नियम्यते॥ उत्तरयोरैंद्रं पौर्णमास्यां द्वितीयं। उत्तरयोर्विकार उच्य
ते पौर्णमास्यां यद्वितीयं हविस्तदैंद्रं भवति॥ मैत्रावरुणममावास्यायां॥ अमावास्यायां यद्द्वि
तीयं तन्मैत्रावरुणं भवति॥ आनो मित्रावरुणायद्धं प्राजापत्य इच्छादध्यः॥ इच्छादधो
नामेष्ट्ययनं तत्प्रजापतिदेवत्यं। तत्पर्वणि पर्वणि कर्त्तव्यं शेविध्यभावात्॥ प्रजा
पते न त्वदेतान्यस्त्वेमे० मिति' द्यावापृथिव्योरयनं॥ दूदम पीष्ट्ययननामतस्य स्वरू
पमुच्यते॥ पौर्णमासेनामावास्यादामावास्येनापौर्णमासात्। स्वकाले पौर्णमासं कृ
त्वा तेनैवाहरहर्यजेत। आमावास्याया। कालात्। ततोमावास्यायां स्वकाले कृत्वा तये
वाहरहरापौर्णमासात्। एवं संवत्सरे समापयेत्। अन्नापि दर्शपूर्णमासयोः पुनः क्रि
यानास्ति। अस्त समाम्नातास्वर्थात्तं त्रविकारः॥ अस्मिंश्छास्त्रेयाऽसमाम्नाताभ्रष्टःयः

राम
८०

नास्वर्थात्तंत्रविकारो भवति दृष्टिप्रकरणात् स्त्रीलिंगात्त्रेष्टिष्वित्यवगम्यते। अर्थात्सामर्थ्याद्व
व्यदेवतादेश्चोदनासामान्यात्स्वरूपसामान्याच्चेत्यर्थः। तदुक्तं प्रकृतिविकारभावस्य
लक्षणं। निर्वपेत्तद्धितं चाज्यमित्यादिना तंत्रविकारः तंत्रान्यत्वं पौर्णमासादीत्यर्थः।
उपदिष्टानामिष्टिपशूनां तंत्रमुक्तं। अनुपदिष्टानां कथमित्यपेक्षायामिनिश्चयार्थमि
दं सूत्रचतुष्टयमारब्धं। अस्यार्थस्यन्यायलभ्यत्वात्सूत्रमप्येतत्प्रदर्शनार्थत्वेन
व्याख्येयं॥ अध्वर्युर्वा यथास्मरेत्। अध्वर्युशब्देन यजुर्वेद उपदर्शनार्थः। तेनैवं भवति य
त्र क्वापि वेदेऽस्यैतत्तंत्रमित्याम्नातं स्यात्तस्य तद्दैवतं तंत्रं भवेत्। नन्यायतस्तंत्रकल्पने
ति। वाशब्दो वधारणार्थः॥ वैराजं त्वग्निमंथने॥ अग्निमंथनसंयुक्तायामिष्टौ वैवतं॥
त्रं भवति। तुशब्दात्तंत्रं भवति। तुशब्दोऽवधारणार्थ एव॥ धाय्येत्वेवैके॥ अग्निर्मंथ्येनेस

तं

श्रौ॰ वृ॰
८१

स्यपि धाय्ये एव केवले नियम्येते। न वैराजं धाय्याभ्यामन्यत्र न्यायकल्प्यमेव तंत्रमि
ति। अथ समाम्नातासु तंत्रलक्षणमुक्तं इदानीं याज्यानुवाक्यालक्षणमुच्यते॥ देवलक्ष
णा याज्यानुवाक्याः॥ देवतालक्षणेति छांदसो ह्रस्वः। लक्ष्यते ऽभिधीयते विहितदेवता
येन पदेन तल्लक्षणं देवता या याज्यानुवाक्या भवंति। विहितदेवतावाचकपदवत्य इ
त्यर्थः। व्यधिकरणो यं बहुव्रीहिः॥ गायत्र्यावती हृतवत्युपोत्तवती पुरस्ताल्लक्षणा
नुवाक्या॥ इदमनुवाक्यालक्षणं। गायत्री छंदः। अग्न आ इत्येतत्पदवती अग्नावती अग्नाव
ती हृतवती। निष्ठांत ग्रहणेषु धातुमात्रग्रहणं भवतीति सार्वत्रिकमेतत्। हृत इति औ हे
रूपं। उपोत्तवती उपपूर्वस्य वचेरिदं रूपं। उपोत्तवतीति प्रमादपाठः। पुरस्ताल्लक्षणा
ऋचः पूर्वभागे देवतापदं यस्याः सा पुरस्ताल्लक्षणा॥ त्रिष्टुप्वती तवती जुष्टवत्युप

राम
८१

रिष्टा लक्षणा याज्या॥ अपि वान्यस्यच्छंदसः॥ असंभवे विहितछंदसो न्यस्या वा याज्या
नुवाक्याः कर्त्तव्याः कर्त्तव्याः॥ न तु याज्या ह्रसीयसी॥ सर्वथा तावदनुवाक्या या याज्या
ह्रसीयसी॥ सर्वथा तावदनुवाक्या या याज्या ह्रसीयसी न भवति॥ नो ह्मिङ्गं बृहती॥ नो ह्मिङ्ग
बृहतीया ज्येत्यर्थः॥ क्षामनष्टहतदग्धवती स्तु वृर्जयेत्॥ एकवचनाधिकारे बहुवचनं
याज्यानुवाक्या परिग्रहणार्थं॥ व्यक्ते तु दैवते तथैव॥ सर्वलक्षणा संपादनाशक्तावस्वपद
र्थे पर्यवसिते कार्ये देवतापदे सति तथैवाश्रयणीयं न लक्षणांतरमन्वेषणीयमित्यर्थः॥ ल
क्षणमपि वा व्यक्ते॥ अथवा एवं भवति। अथक्ते देवतापदे सति लक्षणं गायत्र्याद्या अ
यणीयमित्यर्थः॥ अव्यक्त इति चोदितनामधेयपर्याये वा वज्रहस्तधूमकेत्वादिपदे चो
दितनामधेये वापरार्थे सतीत्यर्थः॥ अनधिगच्छन्स्वरैः॥ उभयथाप्यभावे सर्वशो धिगंतव्याः॥

श्रौ॰सू॰
८२

शाखांतरादाहर्त्तव्या इत्यर्थः॥ अनधिगमत्वाग्नेयीभ्यां॥ एवमप्यसंभवे याभ्यां चिदाग्ने
यीभ्यां यजेता नुब्रूयाच्चेत्यर्थः॥ व्याहृतिभिर्वा॥ तत्रानुब्रूयाद्यजेच्चेत्यर्थः॥ देवतामादि
श्य प्रणुयाद्यजेच्च॥ पुरस्ताल्लक्षणत्वात्प्रथमानुवाक्यायां देवतां द्वितीयया विभक्त्यादि
श्य ततो भूर्भुवस्स्वरोमिति ब्रूयात्॥ याज्यामागुरमुत्का तो देवतां ततो व्याहृतीः पुनस्तां देव
तामुपरिष्टाल्लाक्षणत्वात्प्रथमेतो वषट्कार इति॥ नम्राभ्यां वा॥ नम्रे इति नामधेयमृचो
र्वक्ष्यमाणयोः॥ इममाश्रृणुधी हवं यत्वा गीर्भिर्वीहिहव्यं प्रयमाकृतं म इति नम्रे॥ त
एते नम्रसंज्ञे। पुनर्नम्रे इति वचनमेतयोर्नमनप्राप्त्यर्थं। नम्रेन मनस्शीले ऊह्ये इत्यर्थः॥
आग्नेय्यावनिरुक्ते॥ देवतापदरहिते इत्यर्थः। तथाप्याग्निदेवत्ये एते ऋचौ भवत
इत्यर्थः॥ १२॥ चातुर्मास्यानि प्र॰ वैश्वानरपार्जन्यां॥ चातुर्मास्यानीत्यध्ययननामा ता

राम
८२

निचवैश्वदेवादीनि चत्वारि पर्वाणि। तानि फाल्गुन्यां चैत्र्यां वा आरभ्यमानस्तस्याः पू
र्वस्मिन्नहनि वैश्वानरपर्जन्यदेवत्यामिष्टिं चातुर्मास्यानामारंभार्थं कुर्यात्। द्वे एते
देवते याज्यानुवाक्यायुगलदर्शनात्॥ वैश्वानरोऽग्नेर्गुणः याज्यानुवाक्ययोरग्निलिं
गत्वात्। यद्यध्वर्यवः केवलं वैश्वानरं कुर्युः स्तदा स्तावानं वैश्वानरं नाभिं यज्ञानां सद
नमिति याज्यानुवाक्ये भवतः॥ वैश्वानरो अजीजनदग्निर्नो० अग्न्याधेयप्रभृत्यात
उपांशुहविषः॥ अग्न्याधेयं प्रभृतिकृत्वा वैश्वानरपार्जन्यांतां इष्टयोयास्ता उपांशुहविषः
उपांशुप्रधानादित्यर्थः॥ सौमिक्यः॥ प्रायश्चित्तप्रकरणोत्पन्नाः॥ अन्वायात्यैककपालाः॥
अन्वायात्यैककपाला। नामिष्टित्वासंभवाद्यागा विशेष्यंते। अन्वायात्या एककलाश्च ये यागास्ते
उपांशुप्रयोक्तव्यादित्यर्थः॥ सर्वत्रवारुणवर्जं॥ सर्वत्र विषये वारुणं वर्जयित्वा उपांशुत्वं भवति। न

क्वचिदपि विषये वारुणा उपांशुर्भवतीत्यर्थः ॥ सावित्रश्चातुर्मास्येषु ॥ चातुर्मास्येषु सावि
त्र उपांशुर्भवति ॥ प्रधानहवींषि चैके ॥ हवींषीत्येनावता प्रधानप्रत्यये सिद्धे प्रधानव
चनं प्रधानांतरस्य संप्रत्ययार्थं । अतो ये चतुर्णां पर्वणां व्यपदेशहेतवो वैश्वदेववारु
णप्रघासमाहेंद्रसुनासीरीयास्ते प्रधानशब्दवाच्यास्तेषामुपांशुत्वं भवतीत्यर्थः ॥ पित्र्या प
सद्यः सतंत्राः ॥ तंत्रेण सहैता उपांशवो भवंति ॥ पौनराधेयिकी च प्रागुत्तमादनुयाजात् ॥
यास्माभिरास्ना तापुनराधेयेष्टिः । सा चोत्तमादनुयाजात्प्राक्सतंत्रोपांशुर्भवति ॥ अ
पि वा सुमद्दतंत्राः ॥ या सुसंतंत्रमुपांशुत्वं विहितं ताः सर्वाः सुमद्दतंत्रा वा भवेयुः सुमं
द्रतंत्रा इति मंद्रेपि पूर्वतरायमास्तेः प्रयोक्तव्यं तासां तत्र प्रधानं तूपांश्वेवेत्यर्थः ॥
आगूः प्रणवव्वषट्कारा उच्चैः सर्वत्र ॥ प्रणवशब्देनात्रानुवाक्याप्रणव एव गृह्यते आगू

वैषट्कारसाहचर्यात्। आगुरादयः सर्वविषये उच्चैर्भवंति न द्वित्रिदयिविषये तेषामुपांशुत्वं
स्यात्॥ तथाग्नयेणेयत्प्रथमं हविः स्त्वाग्नेंद्रं ऐंद्राग्नं वा तदुच्चैर्भवति॥ आहार्यस्तु प्राण
संततः प्रणवः पुरोनुवाक्यायाः॥ पुरोनुवाक्यायाः प्रणवस्योच्चैष्ट्वं विहितं स प्रणवः
पुरोनुवाक्यायाः प्राणसंततः कार्यः॥ तथागूर्वषट्कारो याज्यायाः॥ तथैतौ याज्यायाः
प्राणसंततौ कार्यावित्यर्थः। आगुरादिभिः प्रसिद्धोच्चैस्वैरेरयोर्याज्यानुवाक्ययोः प्राणसं
तानविधिसामर्थ्यादेवोपांशुत्वं सिद्धं भवति। प्राणसंततः प्रणवः। तथागूर्वषट्का
रावित्येतावतैव याज्यानुवाक्ययोरुपांशुत्वस्य प्राणसंतानस्य च सिद्धो सत्यामपि
यद्याज्यानुवाक्याग्रहणं करोति तत् ज्ञापयति। अनुवाक्यायाश्च पृथक्कृत्य प्राण
संतानेन आगूः प्रणववषट्कारा वक्तव्या ऋग्गतस्य ऋगादेश्च प्लुतैरन्यः सांहि

तोविकारो मा भूदिति। तत्र स्वरान्त्युपांशु शुरुच्चानि॥ तत्र स्वरा आतो मंद्रेणेत्येवमादिभि
र्विहिताः तेतत्रावपवसंबद्धत्वात्तत्रस्वरा इत्युच्यंते येषां तानि तत्र स्वराणि उपांशुयाज
संबंधीनियान्युच्चानि आवहादीन्यागुरादीनि च तानि तत्र स्वराणि भवंति। मंद्राण्युपांशु
तत्राणांनान्युच्चानि मंद्रस्वराणि भवंति तत्तत्र स्वराणीत्यर्थः॥१३॥ प्रातर्वैश्वदेव्यां प्रेषि
तोग्निमंथनीयाअन्वाह पश्चात्सामिधेनीस्थानस्य पदमात्रे वस्थायाभिहिंकृत्य॥
प्रातरित्युच्यते प्रयोक्ष्यमाणः पूर्वेद्युरिष्टानद्यतनविभक्तिदर्शनात्। पूर्वेद्युरेववै
श्वदेव्या अपि यागः प्राप्नोतीति तन्निवृत्त्यर्थं। अतः पूर्वेद्युरुपक्रम्यापरेद्युः प्रातर्वै
श्वदेव्यायष्टव्यमित्यर्थः। अग्निमंथनार्था ऋच अग्निमंथनीयास्ताः प्रेषितोनुब्रू
यात्। प्रेषितवचनं अस्यानुवचनस्य प्रैषएव निमित्तं नाम्नानं। अनाम्नानेपि प्रै

षितोनुब्रूयादेवेति। सामिधेनीस्थानस्य पश्चादवस्थायेत्येतावतो ऽवपदमात्रैवैनस्य स्था
सिद्धे सत्यां पदमात्र इति वचनं पदमात्रे नीत इति ज्ञापनार्थं। अभिहिंकृत्येति वच
नं अस्यानुवचनस्याभिहिंकार प्रतिषेधे सत्यपि अभिहिंकृति सिध्यर्थं। तथा
च वक्ष्यति। प्रातरनाभ्यासमनभिहिंकृतानीति॥ अभित्वा देव सवितर्महीद्यौः पृ
थिवी च नस्त्वामग्ने पुष्करादधीति तिसृणामर्धर्चे शिष्ट्वारमेदासंप्रैषात्॥ त्वामग्न
ग्न इति तिसृष्वृचः। तासामुत्तममर्धर्चं शिष्ट्वा यदवसानं तत्रावसायारमेत्॥ आसंप्रै
षात्। अवपात्तानोत्तरामाददीतेत्यर्थं॥ अन्यत्राप्यंतरर्धर्चावसाने जायमाने त्वेतस्मि
न्नेवावसाने॥ अन्यत्रापि विषये ऽर्धर्चोमध्यमे ऽवसाने यत्रारमेदिति विधिरस्ति
तत्राप्यासंप्रैषतो नोत्तरमाददीत। अग्ने हंसि न्यत्रिणमिति सूक्तमावपेत पुनः

श्रौ॰ वृ॰
८५

पुनराजन्मनः ॥ मथ्यमानो ऽग्निर्यदि न जायेत तदा तत्रैवावसाने स्थित्वा अग्ने हंसीत्या
वपेत् । पुनः पुनरसकृदप्यावपेत् । अग्नेरा जन्मनः आजन्मन इति वचनात् जाते
सति संप्रैषात् प्रागपि सूक्तस्य कांचिदप्यृचं नारभेत् । एतस्मिन्नेवेति वचनादेत
स्मिन्नेवाईचावसाने ऋगंतरमावपेत् । अन्यत्र त्वृगंत एव ऋगंतरमावपेतेति गम्यते ।
तेन यद्यप्युपसंस्कारेष्वंजनोत्क्रयणपरिव्ययणेषु पदार्थानुसमयं कुर्वंति । बहुयू
पे कर्मणि तदा ऋगंते ऋगंतरावापः सिद्धो भवति । पादग्रहणं सूक्तग्रहणयोः प्रयोज
नं आवापो पूर्वावधिरेका ऋक् । परावधिः सूक्तं तत्रैकस्या द्वयोर्बहूनां वा ऋचां सू
क्तस्य वाऽऽवापः सिद्धो भवति । आवृत्तौ च सूक्तं समाप्यैवावृत्तिरित्येवमादि । जातं श्रु
त्वानंतरेण प्रणवेन शिष्टमुपसंनुयात् ॥ जातश्रवणानंतरमग्ने हंसीत्यस्य सूक्तस्य यः

राम
८५

प्रण व आगछतितेनशिष्टमर्द्धं र्चेडपसंतनुयात्।शिष्टेनोत्तरां॥ऋनावाप पक्षे जातश्रवणा
नंतरमव शिष्टेनार्द्धर्चेनोत्तरां ऋचमुपसंतनुयात्।उतब्रुवंतु जंतव० रमेत्।प्रदेवं
देवं० परिदध्यात्॥यज्ञेनेत्यनयर्चा परिदध्यात्।समायर्यादित्यर्थः॥सर्वत्रोत्तमो
परिधानीयेति विद्यात्।सर्वत्र शस्त्रादिषु या उत्तमा ऋक् कृतां परिधानीयेति वि
द्यात्।धाय्येविराजौ नवप्रं० तिस्रो देवी रग्न स्त्रा ज्यस्यव्यंत्विति॥ बर्हिरग्न इतिप्र
याजानंतरमेतानावपेत्।अग्निः सोमः सविता० द्यावापृथिवी॥अष्टौ देवताः
स्वतवस इति मरुतां गुणः॥आविश्वदेवं सत्यतिं वाममद्य० गृणाते तुरायेति॥अ
स्मिन् पर्वणि निगुणानामपि मरुतां एते भवतः॥प्रगुणा शब्दस्य चस्तु त्यर्थत्याय्य
च पसंभवात्।नवानुयाजाः षळूर्ध्वं प्रथमाद्देवीर्द्वारो० वसुधेयस्य व्यंत्विति॥अ

श्रौ०वृ० ८६

नुयाजानामेकदेशाः कृताः। अनुयाजानां सूक्तवाकस्य० मनासाल्वादेशं। त्रयाणामन्यतमस्मिन् काले
वाजिभ्यो यागः कर्तव्यः। वाजिनं च तस्य द्रव्यं द्रव्यशब्देन कर्मणः संव्यवहारार्थी। तद्वच
नमनावाह्येत्यावाहनप्रतिषेधाय मनुवादः। अपूर्वत्वं च पूर्ववत्त्येकारणाभावात्। द्र
व्यदेवतासंबंधमात्रमत्र चोद्यते। नैतावता प्राकृतधर्मसंबंधोस्ति। उक्तं च। प्राकृ
तधर्मसंबंधे कारणं। निर्वपेत्यादि। तस्य चात्राभावः। तेनापूर्वत्वं निश्चीयते। द्रव्यश
ब्दवाच्यता चास्य नास्ति। तेन चापूर्वत्वं। तस्मादपूर्वत्वादुत्तरेषामपि निगमेषु निगमनं
नास्ति। आदेशवचनं वाजिनां यागानामन्वायात्यत्वसंशयनिवृत्त्यर्थं। तत्रायं संशयः।
किं पूर्वस्य चित्वधानुपस्थापयात्यनेक्रियते तत्सर्वमन्वायात्यमुतान्वायात्यशब्दचोदि
त्वमेवेति। तत्र तच्छब्दचोदिते चातच्छब्दचोदिते चान्वायात्यशब्दप्रवृत्तिनिमित्त

राम ८६

स्याविशेषाभावाद्यत्किंचिदन्यानुप्रवेशि तत्सर्वमन्वायात्यमिति कृत्वा वाजिनामप्यन्वाया
त्यत्वादनादेशः प्राप्नोति। एवं प्राप्तेनुप्रवेशिनामादेशं विदधन्नाप्रवेशित्वमन्वायात्यत्वेनि
मित्तमिति दर्शितवानाचार्यः। अतस्तत्र दृष्टचोदितमेवान्वायात्यमिति सिद्धं। एतदेवादे
शवचनस्य प्रयोजनं। नान्यदिति मंतव्यं। शंनो भवंतु वाजिनो हवेषु० रनवानं याज्या॥ ऊ
र्ध्वज्ञु ऊर्ध्वजानुः। याज्याग्रहणस्य प्रयोजनमनुवषट्कारे ऊर्ध्वज्ञुता माभूदिति। अग्ने
वीहीत्यनुवषट्कारो वाजिनस्याग्नेणद्विरनुमंत्रयेत। संव्यवहारार्थमिदं। यत्र क्वचवि
षये एकस्मिन्नेवाध्वर्युसंप्रैषे तुल्यरूपावतुल्यरूपौ वा द्वौ वषट्कारौ भवतस्तत्रैतौ व
षट्कारौ मस्तावेव वा गो ज इत्यादिना द्विरनुमंत्रयेत॥ न चाग्नेरुत्तरस्मिन्। याज्याश
वा गूर्भवतीत्युक्तत्वादनुवषट्कारेप्यागूः प्राप्तो निषेधः॥ आगुरः प्रतिषेधो याज्या

श्रौ०त्रू. धर्माणामितरेषांप्रापणार्थः॥ वाजिनभक्षमिळामिवप्रतिगृह्योपहवमिच्छेत॥ दृष्टशिष्टं
८७ वाजिनंभक्षार्थंपात्रेणानीतं। इळामिवांजलिनाप्रतिगृह्यांजलौनिधायोपहवमि
च्छेत भक्षणानुज्ञापनार्थंवाजिनभक्षसंबंधिनः सर्वान्याचेतेत्यर्थः। सर्वेषुभक्षसं
बंधिषुउपहवयाचनंकर्तव्यमित्युक्तं॥ तदनेनक्रमेणैवंप्रकारेणवात्याह। अध्वर्य
उपह्वयस्वब्रह्मन्नुपह्वयस्वाग्नीदुपह्वयस्वेति॥ वचनसामर्थ्यादेवैषामयंक्रमः। ए
ते आदितो ततोन्ये भक्षिणः वाक्यंच एवंप्रकारंकर्मनामधेयमित्युक्तमित्येतत्सर्व
मवगम्यते। अतो ततो यजमानो यह्वयस्वेति। एतदपिलब्धं भवति॥ प्रतिवचनश
ब्दस्यास्मिंछास्त्रेनुक्तत्वात्तस्य चापेक्षितत्वात्तस्य चापेक्षितत्वाच्छास्त्रांतरुक्तस्योपहूतइति
शब्दस्य ग्रहणं भवति॥ यन्मेरेतः प्रसिच्यते यद्वा० प्राणभक्षं भक्षयेत्॥ तस्य वाजिनस्य राम ७

किंचिदादायानेनमंत्रेणावजिघ्रेत्॥ एवमध्वर्युर्ब्रह्माग्नीध्रः। एते च प्राणभक्षं भक्षयेयुः॥ अ
ध्वर्युग्रहणं भक्षणे पि क्रमोस्तीति ज्ञापनार्थं न तस्यापि प्राणभक्षणा नियमार्थं। अतो हो
तुर्भक्षणानंतरं अध्वर्य्वादेः क्रमेण भक्षणं सिद्धं भवति॥ यजमानः प्रत्यक्षमितरे च दीक्षि
ताः॥ यजमानादितरे च दीक्षिताः॥ यजमानादितरे च यत्र दीक्षिताः॥ यजमानादित
रे च यत्र दीक्षिता भवंति तत्र सर्वे प्रत्यक्षमेव भवेयुः॥ तत्र सत्रे संभवति। तत्र गृहपते
श्चान्येषां च प्रत्यक्षमेवेत्यर्थः। तत्र च क्रमो मुख्यादिगृहपत्यंतः। पौर्णमासेनेष्ट्वा
चातुर्मास्यव्रतान्युपेयात्॥ यस्मिन्नहनि पौर्णमासेनेष्टुं तदानीमेव वक्ष्यमाणानि
व्रतानि कर्तुमारभेत। पौर्णमासीयागवचनं व्रतारंभकालविधानार्थं। नित्या
नामनिवर्तकत्वात्। विकृतीनामिति। व्रतशब्देन मानसो नियम उच्यते। अतः केश

निवर्त्तनादीनि करिष्ये। मध्वादीनि वर्जयिष्ये इति दृढसंकल्पो भवेत्। एतद्व्रतरूपं
निवर्त्तनादीनि च कुर्यात्। मध्वादीनि वर्जयेच्च। न केवलसंकल्पमात्रमेवा केशानि नि व
र्त्तयीत॥ निवर्तनं कर्तव्यं। श्मश्रूणि वा पयीत। वर्जयेत्॥ केशप्रसाधनादीति स्वैरि
कर्माणि॥ अवलेखन शब्देनोच्यंते। पूर्वाणि कार्याणि। परा पूर्वाणि पंच वर्जनीयानि।
एतानि चातुर्मास्य व्रतानि। चातुर्मास्य व्रत वचनं सर्वेषां पर्वणां एतानि व्रतानि नैक
स्यैव संनिहितस्य पर्वण इत्येवमर्थं। ऋतौ भार्यामुपेयात्॥ स्त्रीशब्दे प्रतिषिद्धस्य
कालविशेषे प्रतिप्रसवोऽयं। वापनं सर्वेषु पर्वसु॥ उत्तर विवक्षार्थोऽयमनुवादः॥ त्वा
द्योत्तमयोर्वा॥ आद्योत्तमयोर्वा पर्वणो र्वापनेन मध्यमयोरित्यर्थः॥ अनुवादाभावे आद्यं
तयोरेव वापनस्यात्तत्र विकल्पेन न मध्यमयोर्वापनप्रसंग एव नास्तीति गम्यते तेनाद्यंतयोर्वाप

न नित्यं मध्यमयोरनित्यमिति सिद्धं भवति ॥१४॥ पंचम्यां पौर्णमास्यां वरुणप्रघासैः ॥ यस्यां
पौर्णमास्यां वैश्वदेवी कृता तामारभ्य या पंचमी पौर्णमासी तस्यां वरुणप्रघासकं कर्त्तव्य
व्यमित्यर्थः ॥ पश्चाद्गार्हपत्यौर्णमासिकाया वेदेः प्रतिपद्यते । वेदेः पश्चादिति प्रदर्शनार्थं ।
प्रणीयमानस्याग्नेः पश्चादित्यर्थः ॥ प्रेषितवचनमुक्तप्रयोजनं ॥ अग्निप्रणयनी
याः अग्निप्रणयनार्थाः ॥ प्रदेवं देव्याधियेतिति स्रं रमेतु । आसीनः प्रथमा प्रणवां ।
उपविष्टस्यैवासीन इति वचनं व्रजत्स्वपि प्रथमामसमाप्य नानुव्रजनायोत्तिष्ठेदित्ये
वमर्थं । सप्रणवां समानप्रणावासीत्यर्थः ॥ प्रथमायास्तृतीयप्रणवेऽवसानेऽपि त्रि
मात्र एवेत्यर्थः ॥ तत्र स्थानसंक्रमणोत्तरां प्रतिपद्यते । तत्र प्रणवेनावसायेत्येता
वतेव सिद्धे स्थानात्स्थानसंक्रमणादिति वचनमेनस्य विधेः सर्वार्थत्वाय । तत्रोपांशुस्व

रस्थानात्स्वरांतरस्थानसंक्रमणेप्रणवेनावसायानुच्छ्वस्यैवोत्तरामृचमारभेतक्रंगते
ष्वासस्य प्राप्त्यभावेसत्यप्यनुच्छ्वासवचनमवसानविधिवल्लादुच्छ्वासोपि प्राप्नोती
तितंनिवृत्त्यर्थमनुच्छ्वासविधानं तेनावसानविधानमच्छ्वासार्थं साधितं भवति।
अतोयत्रोच्छ्वासप्रतिषेधः। तत्रावसानमपिनकर्तव्यं भवेद्गावानादौ॥ अग्निप्रणाय
नादयोर्मंद्रस्वरेणप्रयोक्तव्याः। प्राथम्यात्तस्य स्वरस्य तदतिक्रमे कारणाभावात्।
आतो मंद्रेणेत्यत्र पूर्वावधेरभावात्। प्राणसंततं भवतीतिविज्ञायते॥ यदि
दमवसायानुच्छ्वस्योत्तरामारभेत इति तत्प्राणसंततं भवतीतिविज्ञायते॥ श्रूयत
इत्यर्थः॥ उत्तरमग्निमनुब्रूजनुत्तराः। अनुब्रूयादितिशेषः। द्वयोः प्रणीयमानत्वा
दुत्तरमितिविशेष्यते॥ अग्निद्वित्वेप्याहवनीयद्वित्वाभावान्मंत्राणामूहोनास्ति॥

इर्मंमहे विदथ्याय शूषमयमिहप्रथमोधायिधातृभिरितितु राजन्यवैश्ययोराद्ये॥ स
मानजातीयत्वादेताभ्यांवाधः प्रदेवत्रित्यस्याः॥ अयंराजन्यवैश्ययोर्विशेषः॥ अ
न्यत्समानं॥ पश्चादुत्तरस्यावेदेरवस्थायाशेषंसमापयेदितिशेषः॥ वेदिद्वित्वादु
त्तरस्याइत्युच्यते॥ उत्तरवेदेस्तुसोमेषु॥ पश्चादवस्थायसमापयेदितिशेषः॥ निहि
तेग्नौसीदहोतःस्वउलोकेचिकित्वान्निहोताहोतृषदनेविदानइतिद्वेपरिध्यायतस्मिन्ने
वासनउपविश्यभूर्भुवःस्वरितिवाचंविसृजेत॥ अत्रनिहितेग्नावित्युत्तरासनस्य
निमित्तंनाध्वर्युसंप्रैषः॥ तस्मिन्नेवेति। यस्मिन्निदमनुवचनमारब्धंतस्मिन्नेवेत्य
र्थः॥ अन्यत्रापियत्रानुब्रुवन्ननुव्रजेत्। तत्राप्येवंकर्तव्यमितिशेषः। त्वनुब्रुवन्निति वचनरा
वैतत्स्यान्नाभिष्टवनादिष्वित्येवमर्थं॥ तिष्ठत्संप्रैषेतुतथैववाग्विसर्गः। तिष्ठतःसंप्रैषे

तुतिष्ठ ऐतेवा वाग्निसंसर्गो भवति ॥ अग्निमंथनादिसमानावैश्वदेव्या । इयमिष्टिर्वैश्वदेव्या
सानाभवति । द्वयोरपिमथ्यमानयोरग्निद्वित्वंनास्ति । एकस्यैवायमग्नेर्विभागइति कृत्वा
नूहेनाहवनीयाभिधायिनांप्रयोगसिध्यर्थमग्निमंथनादिसमानावचनं ॥ हविषांतु
स्थानेषष्ठप्रभृतीनामैंद्राग्नीमरुतोवरुणःकः । अयमत्रविशेषः ॥ षष्ठ्याद्यास्तिस्त्र उ
द्धृत्य इंद्राग्न्यादयस्तिस्त्रःकर्तव्याइति ॥ इंद्राग्नीअवसागतंश्नथद्वृत्रमुतसनोति वाजंमरु
तोयस्यहिक्षयेराद्वेद चरमा अदे वेमंमेवरुण श्रुधितत्वायामिब्रह्मणावंदमानःक
यानश्चित्रआभुवद्धिरण्यगर्भःसमवर्तताग्रइतिप्रतिप्रस्थातावाजिनेतृतीयः ॥ उपहू
वयाचनेऽध्वर्युस्तृतीयोभवति । भक्षणेचतुर्थः । उपहवयाचनंहोत्रादियजमानांतंहो
तुरध्वर्य्वादियजमानस्याग्नीदंतं । भक्षणंतुहोत्रादियजमानांतमेव ॥ वैश्वदेव्यापयस्यैवमे

वा॥ संस्थितायामवभृथं व्रजंति॥ संस्थितायामिष्टौ॥ अवभृथकर्मार्थमुदकं गच्छंत्यध्वर्यवइत्यर्थः। तत्रावभृथेष्टिः कृताकृता॥ कृतिरेव कृतं कृतं च यस्याः साकृताकृता अनित्येत्यर्थः॥ इष्ट्वा भाविपदन्यदप्यवधानादितत्सर्वेन भवति। तामुपरिष्टाद्व्याख्यास्यामो द्वयोर्मासयोर्मासियोर्मासयोरैंद्राग्नः पशुः। वरुणप्रघासपौर्णमास्यनंतरा यस्यांपौर्णमास्यामित्यर्थः॥ अनेन चातुर्मास्यांगत्वेन पश्वंतरं विधीयते। नानेन निरूढकालो विधीयते। अतो निरूढोपि स्वकाले कर्तव्य एव॥१०॥ तथा वरुणप्रघासेभ्य ऐंद्राग्नः॥ तथैंद्राग्ना साकमेधाः॥ द्वयोर्मासयोरि त्यर्थः। अनीकवदादीनामादित्यांतानां सकमेधा इति नाम॥ पूर्वेद्युस्तिस्र इष्टयोनुसवनं॥ यस्यां पौर्णमास्यां साकमेधायष्टव्यास्तस्याः पूर्वेद्युः सवने सवने एकैकेष्टिः कार्या॥ प्रथमायामग्निरनीकवान्॥ अनीकवंतमूतयेग्निं

गीर्भिर्हवामहे॥ सनः पर्षदति द्विषः। सो नानीकेन सुविदत्रो अस्मे इति॥ उत्तरस्यां वृधन्वं
तौ मरुतः सांतपनाः सांतपना इदं हविर्येनो मरुतो अभि दुहे णायुरिति। मरुद्भ्यो गृ
हमेधेभ्य उत्तराज्यभागप्रभृतीळांता॥ मरुतो गृहमेधा देवता॥ आज्यभागप्रभृतिश्च
साइळांता चेति आज्यभागप्रभृती ळांता गृहमेधा सत्रागत प्रवुध्या वईरतेमहांसी
ति॥ आम्नातत्वादेते एव गृहमेधिभ्यो पि भवतः॥ पुष्टिमंतौ विराजौ संयाज्ये अनिग
दे॥ इह विराजौ संयाज्ये इत्युक्तं। ते संयाज्ये अनिगदे निगदरहिते भवत इत्यर्थः॥ नि
गद इति अयाळग्निरित्यादि जुषतां हविरित्येवमंत उच्यते। अन्यत्राप्यनावाहनो। गृ
हमेधीयादन्यत्रापि यत्रावाहनं नास्ति तत्राप्यनिगदे संयाज्ये भवतः॥ अन्यत्रावीति
यो गविभागार्थमुच्यते तस्य प्रयोजनं। अन्यत्रानावाहने गनिगदे भवतः॥ इहत्वावाहने

नावाहनेवा अनिगदे एवेत्येवमर्थः॥ आतरा वा त्रपक्षे आवाहनमप्यस्तीति ज्ञापितं भ
वतीति गम्यते॥ पूर्वसूत्रे संख्या ज्याग्रहणस्येदं प्रयोजनमिदमनिगदत्वविध्यानं सं
ख्याज्यामात्रस्य न विराज एवेति ज्ञापनार्थं॥ आवाहनेपि पित्र्यायां पशौ च॥ अनयो
रावाहनेसत्यपि अनिगद एव भवतः॥ बहु चैतस्यां रात्र्याम न्नं प्रसुवीरन्॥ प्रसुवीर
न्निति बहुवचनं। लोके पष्टारो वहव इति प्रसुवीरन दद्युरित्यर्थः॥ एतस्यां रात्र्यामि
ति वचनाद्रात्रावेवेष्टिः परिसमाप्यत इति गम्यत इति॥ तस्या विवासे पौर्णदर्वं जुहु
युः॥ विवासो रात्र्याः पश्चाद्भागः॥ पौर्णदर्वमिति कर्मनाम॥ तत्तस्मिन्काले कर्तव्यं॥
ऋषभेरवाणे॥ ऋषभे रुवति॥ स्तनयित्नौ वा रुवति॥ आग्नीध्रं हैके रावयंति ब्रह्म
पुत्रं वदंतः॥ तस्याप्यभावे ब्रह्मपुत्रशब्देनाग्नीध्रं संबोध्य रावयंति। ब्रह्मपुत्र रोरुहीत्ये

श्रौ·वृ·
९२

वं॥ यदि होतारं चोदयेयुस्तस्य याज्यानुवाक्ये॥ पूर्णा दर्वि परापत सुपूर्णा पुनरापत॥
वस्नेव विक्रीणावहा इषमूर्जं शतक्रतो॥ देहि मे ददामि ते नि मे धेहि नि ते दधे। अया
मिवसंमरकोबादर्द्दैतद्ददि ति। एतत्कुर्वतोध्वर्यवो यदि होतारमपि चोदयेयुः॥ अ
नुब्रूहि यजेति तदेते याज्यानुवाक्ये भवतः॥ शतक्रतुलिंगाछाखांतरे ते ऐंद्र्यो पौर्णदर्वेद्
त्याम्नानाच्चाइंद्रोस्य देवता भवति॥ मरुद्भ्यः क्रीळिभ्य उत्तरा॥ इष्टिरित्यर्थः॥ उत ब्रु
वं तु जंतवो यं क्रतुरभीग॥ तइति परोक्षवार्त्रघ्नौ॥ आज्यभागौ परोक्षवार्त्रघ्नौ भव
तः॥ क्रीळं वः शर्द्धो मारुतमाख्यासो नयेमरुतः स्वंचाः क्रीळिनामेते आम्नाते। अक्री
ळिनामध्येते याज्यानुवाक्ये भवतः॥ जुष्टो दमूना अग्ने शर्द्धमहते सौभगायेति संयाज्ये।
वाजिनावभृथवर्जं माहेन्द्रस्तुक्तावरुणप्रघासे॥ माहेंद्रीतीष्टिनाम॥ आमिक्ष्याभावा

राम
९२

देववज्जिनाभावेसिद्धेवाजिना प्रतिषेधं कुर्वन्वाजिनस्य प्रधानसंबंधं दर्शयति ॥ तेन
वाजिनस्य मध्यमः स्वरः साधितो भवति ॥ हविर्षां तु सप्तमादीनां स्थाने । इंद्रो वृत्रहें
द्रो वा विश्वकर्मा । वृत्रहा शब्दः इंद्रस्य गुणः ॥ आद्यास्त्रि स्वो विकल्पंते विश्वकर्मेत्यः
अतो शब्दवद्देवता ॥ आतू नइंद्र वृत्रहन्ननु तेदायि महइंद्रियाय विश्वकर्मन्हविषा
वावृधा मानि परमाणियावमेति ॥ २६ ॥ दक्षिणाग्ने रग्निमाप्रिप्रणीयपित्र्या ॥ दक्षिणा
ग्नेरग्निमानीयातीत्यतंदेशमन्यत्र निधाय तस्मिन्नग्नौ पित्र्यानामकर्मकर्तव्यं ॥
अग्निनतिप्रणीयपित्र्येति वचनात्तस्मिन्नेव पित्र्या भवेत् ॥ नैमित्तिकं त्वाहवनी
यादिष्वे वा । आहवनीयोप्यत्र विहरणीयः ॥ उत्तरत्रोपस्थानदर्शनात् । साग्रहणं योग
विभागार्थं । योगविभागप्रयोजनमनं प्रेतिणीत चर्यायामपिशंप्ये तादिधर्मप्राप्त्यर्थं ॥ लुप्त

श्रौ०द०
८३

जपादो तारमद्वथावषट्कारानुमंत्रणाभिहिंकारवर्जं। जपशब्देनात्र न केवलो जप एव गृह्यते। अनुमंत्रणस्योपप्रतिषेधाज्जपादीनां षण्णामुपलक्षणार्थ इति गम्यते। नान्यस्योपांशुप्रयोज्यस्यालोपः सिद्धो भवति। लुप्ताजपायस्यापि तेनेव्वानिगदस्यालोपः सिद्धो भवति। लुप्ताजपायस्याः सा लुप्त जपादो तारमद्वथा इत्यस्य निगदैकदेशस्योपांशुत्वसिध्यर्थे न जपे इति वचनेन जपशंकया लोपशंकानिवृत्त्यर्थं तद्वर्जनवचनं। इतरयोः प्राप्तस्य प्रतिप्रसवएव॥ तस्यां प्राचिकर्माणि दक्षिणा। तस्यामिति वचनं कृत्स्नप्राप्त्यर्थं॥ प्रकृत्यात ऊर्ध्वमित्यत्रापि प्रापणार्थं। यानि प्रकृतौ प्रांचि कर्माणि प्राङ्मुखानीत्यर्थः॥ तान्यस्यां दक्षिणामुखानि कर्तव्यानीत्यर्थः॥ इतराणि तथान्वयं॥ यानीतरदिङ्मुखानि प्रकृतौ तान्यस्यां निर्दिष्टदिक्कानि अनिर्दिष्टदिक्कानि च यथान्वयं कर्तव्यानि। दक्षिणा दिक्प्राचीकृत्वा तदनुसारेणान्यदिङ्मु

राम
८३

स्वा निकर्तव्यानीत्यर्थः ॥ उशंतस्त्वा निधीमहीत्येतां त्रिरनवानंताः सामिधेन्यः ॥ एताम्र्चं त्रिरनुछंदसन्ननुब्रूयात्। तादृतिवचनात्ता एव सामिधेन्योनुपुनरभ्यसितव्या इत्यवगम्यते। तासामुत्तमेन प्रणवेनावहदेवान्पितॄन्यजमानायेति प्रतिपत्तिः ॥ तासां सामिधेनीनां उत्तमेन प्रणवेनावहदेवान्पितॄन्यजमानायेति प्राप्तिरेव संधेया। तेनाग्ने महा नित्यादि पारिभूरसीत्यंतं लुप्यते। प्रतिपत्तिश्चैवंरूपा भवति पित्र्यायां। प्रकृतौ देवाङ्युज्यंत इतरेषां संकीर्तनात्। ताइह च देवाश्च पितरश्च ज्यंत इति पितृशब्दोपि प्रयोक्तव्य इति। सर्वत्र देवशब्दवति मंत्रे पितृशब्दः प्रयोज्यत्वेन प्राप्ते स्वार्थ एव देवशब्दप्रयोज्यो न परार्थ इति कृत्वाचार्योन्यत्र परार्थत्वादप्रयोगं मन्यमानः तत्साहितं प्रतिवाक्यं पठितवान्। तेनान्यत्र पितृशब्दो न प्रयोक्तव्य इति सिद्धं। प्रतिपत्तिवाक्यमुक्त्वा ततो वक्ष्यमाणदेवता आवाहयेत।

श्रौ०वृ०
२४

अग्निंहोत्राया वह स्वं महमा नमा वेहेत्येत स्य स्थाने ग्निंक व्यवाह नमा वाहयेत्। आज्य पां तदेवता आवाह्य प्राकृतस्य स्विष्टकृतावाहनस्योद्धारं कृत्वा तत्स्थाने ऽग्निंकव्यवाह नमावाहयेत्। उत्तमे चैनं प्रयाजे प्रागाज्यपेभ्यो निगमयेत्। उत्तमे च प्रयाजे प्रागाज्य पेभ्यः अग्निं कव्यवाहनं निगमयेत्। सूक्तवाके चाग्निहोत्रेयेत्येतस्य स्थाने। निग मयेदिति वर्त्तते। नोहप्रादेशः। कार्यार्थत्वान्मंत्राणां मंत्रलोपेपि कार्यस्यालोप इति कृत्वा कार्यस्यापि प्रतिषेधः क्रियते॥ न बर्हिषं नोपयाजानुयाजौ नेळायां भक्षं भक्ष णं॥ भक्षेषु प्राण भक्षमिति प्राप्तेरिळायां भक्षयामेवनास्ति। कः प्रसंगः प्राणभक्षस्येत्य र्थः॥ भक्षणवचनं प्रकृतावन्नातरेळाभक्षादन्य इळाभक्षोस्तीति ज्ञापनार्थं। इळायामिति सप्तमीनिर्देशादिळाविषयं यद्भक्षणमिति गम्यते। तेळाया एव भक्ष इतीति तेनावांतरे

राम
९४

ळाभक्षयां इळाभक्षयां च अत्र नास्तीति गम्यते। न मार्जनं। इळाभक्षणां गत्वा देवमार्जना
भावेसिद्धे तदभाववचनं तदंगत्वाज्ञापनार्थं। न सूक्तवाकेनामादेशः। सूक्तवाके यद्य
जमानेनामत्तन्नादेष्टव्यः॥ सूक्तवाकवचनं सुगाह्नायनादिष्वध्वर्य्वादिसंबंधप्रसंग
निवृत्यर्थं। ईक्षितः सीद होतरितिवोक्त उपविशेत्। उत्तरस्योपवेशनस्येदं निमित्तद्व
यं विधीयते। प्रादेशकरणाद्यर्थत्वात्पूर्वस्य तदभावेभावः। प्रादेशस्याभाव उक्तः। अ
नुमंत्रणाप्यायनोपस्थानानां मंत्राः रूपत्वात् क्रियायां मंत्राभावे क्रियाया अभाव इ
ति। तस्मादत्र पूर्वमुपवेशनं नास्ति। मानुषशब्दप्रत्याम्नायईक्षणादितल्लात्वोपविशेदित्यु
क्तत्वाद्धर्मिक्रमणादिसर्वं न भवति। निरसनोपवेशनबर्हिरूपस्पर्शनानि मंत्ररहिता
नि कुर्यादेव। जीवातुमंतोस्मरथ्यात्पर्युपस्थः। प्राचीनावीतिनो हविर्भिश्चरंति। उपस्थ

औ०वृ०
२८

विधानंयेषांतदंगंतेषामेवाहविर्गहणंप्रधानेष्वयंधर्मइतिज्ञापनार्थं।तेनप्रधानम
ध्येपियत्प्रायश्चित्तत्वेनप्राप्तंतस्यायंधर्मोनभवतीतिगम्यते।दक्षिणआग्नीध्रउत्त
रोध्वर्युः।द्वेद्वेअनुवाक्ये।आध्यर्धामनवानं।अत्रानुवाक्याकार्यस्यैकत्वान्मध्येप्र
णवोनास्ति॥ॐस्वधेत्याश्रावणं।अस्तुस्वधेतिप्रत्याश्रावणं।अनुस्वधास्वधेतिसं
प्रैषो।अनुस्वधाइत्येके।स्वधेत्यपरे।एकवचनंत्वमत्यभिप्रायं।अनुस्वधांस्वधेतिदीर्घः
पठितव्यः।येस्वधेत्यागूर्येस्वधामहइतिवा।स्वधानमइतिवषट्कारः।अत्रओंस्वधे
त्यादयःस्वधाशब्दाःदीर्घाताएवप्रयोक्तव्याः।अध्वर्युसंप्रैषपाठप्रयोजनं।तदे
वश्रुत्वास्यकार्यकरणार्थं।नित्याःप्लुतयः॥उक्ताःप्लुतयःप्रकृतावाद्येद्वितीयेउपान्त्ये
वयदक्षरस्यप्लुतिःएतेष्वपितदक्षरस्यैवकार्येत्यर्थः।पितरःसोमवंतःसोमोवापितृमान्

राम
२८

पितरोबर्हिषदः पितरोग्निष्वात्ता यमः। पितृर्यां सोमवत्तागुणः। सोमस्य पितृमत्तागुणः।
बर्हिषदोग्निष्वात्ता इति च पितॄणामेव गुणः। आद्ये वैकल्पिके। उदीरतामवरउत्परास
स्तेयाहिनः पितरः सोमपूर्वं उपहूताः पितरः सोम्यासस्त्वं सोम प्रचिकितो मनीषा सो
मो घेनुं सोमो अर्वंतमाशुं त्वं सोम पितृभिः संविदानो बर्हिषदः पिरते ऊत्यर्वी गाहं पितॄ
न्सुविदत्रां अवित्सी दं पितृभ्यो नमो अस्त्वग्ध्याग्निष्वात्ताः पितर एह गच्छते ये चेह
पितरो ये च नेह ये अग्निदग्धा ये अनग्निदग्धाइयं यम प्रस्तरमाहि सीदेति द्वे परेयिवांसं
प्रवतो महीरनु। पं चानां ति स्वास्ति स्वक्रचः। वैवस्वताय चेन्मध्यमायाज्या। यदि यमो वैवस्वतो
देवता तत उत्तमे त्रिके मध्यमा [illegible] क्रग्याज्या भव
ति। प्रथमोत्तमे अनुवाक्ये इति। ये तातृषुर्देवत्रा जेहमाना स्त्वदग्ने कव्यात्त्वम

श्रौ०वृ०
९६

नीषाः स प्रत्नथा सहसा जायमान इति। स्विष्टकृत् इति शेषः। अग्निः स्विष्टकृत् कव्य
वाहनः। प्रकृतौ यो अग्निः स्विष्टकृत् इहतत्कार्यकरोऽग्निः कव्यवाहन इत्य
र्थः। तेनात्र स्विष्टकृच्छब्दो न प्रयोक्तव्यः। प्रकृत्या तत ऊर्ध्वं स्विष्टकृत ऊर्ध्वं प्रकृत्या
भवति। सव्योत्तर्युपस्थेतादयो न भवंतीत्यर्थः। वचनमिदं स्विष्टकृत्यपि प्रापणा
र्थं। अं गत्वा देव उत्तरत्र आप्यमावात्। वषट्कारक्रियायां चोर्ध्वमाज्यभागाभ्यामन्य
न्मेत्रल्लीपात्। मंत्रलोपशब्देन पूर्वोक्तः सर्वै विकारा लक्ष्यंते। तेभ्योन्येषां सव्योत्त
र्युपस्थतादीनाम भावाय प्रकृतिभावो विधीयते प्रधानेषु स्विष्टकृति च स्वधाकारं
वर्जयित्वा वृषट्कारेणा क्रिया चेत् ऊर्ध्वमाज्यभागाभ्यामिति वषट्कारक्रियायास्था
नलक्षणार्थं। तेनाज्यभागाभ्यामूर्ध्वं स्विष्टकृत्यर्थं तेस्थानेवषट्कारक्रियायां प्रकृ

राम
९६

त्यां भवतीति गम्यते। तत्र मंत्रलोपादिः पूर्वो विकारः सर्वप्रकारायो पित्र्यायामासमास्तेभ
वत्येवा। एकैकाचानुवाक्या। प्रकृतिभावादेव एकत्वे सिद्धे एकत्ववचनमिदं तयोरेके
कस्याग्रहणार्थं यो अग्निः क्रव्यवाहनस्त्वमग्न ईळितो। जातवेद इति संयाज्ये। वषट्
कारक्रियायामेव। भक्षेषु प्राणभक्षान्भक्षयित्वा बर्हिष्यनुप्रहरेयुः। सस्थितायां प्राग्वा
नुयाजाभ्यां दक्षिणावृतो दक्षिणाग्निमुपतिष्ठंते। उभयतो विहारादनियमे प्राप्ते नि
यमार्थं दक्षिणावृद्वचनं॥ अनावृत्यानतिप्रणीतचर्यायां। अनतिप्रणीतचर्या
यां पित्र्यायां आवर्त्तनमकृत्वैवोपतिष्ठंते। तथैवाभिमुखत्वसंभवान्॥ अयावि
ष्ठा जनयन्कर्वराणि सहि घृणिरुरुर्वरायगातुः। सप्रत्युदैद्धरुणं मध्वोअग्रंस्वा
यत्तन्वां तन्वामैरयतेति॥ अयं दक्षिणाग्नेरुपस्थानमंत्रः। आवृत्य त्वेवेतरो। अतिप्रणी

तचर्यायोर्दक्षिणावृद्दक्षिणाग्नेरुपस्थानमुक्तं। अनतिप्रणीतचर्यायामनावृत्यतस्यै
वोपस्थानमुक्तं। इदानीं गार्हपत्याहवनीययोरुपस्थानमुच्यते। तु शब्दो विध्यर्थः। एवंश
ब्दोवधारणार्थः। अतिप्रणीतचर्यायामनतिप्रणीतचर्यायां च गार्हपत्याहवनीययोः
आवृत्त्यैवोपस्थानमिति। त्र्याहवनीयं सुसंदृशं त्वेति पंक्त्या। पंक्तिवचनं प्रतीकसंदेह
निवृत्यर्थं॥ गार्हपत्यमग्निं तमन्य इति॥ एकयर्चा न सूक्तेन उत्तरत्र सूक्तवचनात्॥
अथैनमभिसमायंति। मा प्रगाम मा अग्ने त्वं न इति जपंतः॥ एते सूक्ते जपंतः। एपंतः। एनं गार्हप
त्यमभितः समायंति। प्रादक्षिण्येन॥ पूर्वेण गार्हपत्यं सूक्ते समाप्य सव्यावृतस्वंबका
न्त्रजंति। गार्हपत्यस्य पुरस्ताद्योदेशः तस्मिन्देशे यथा सूक्ते समाप्येते तथा समाप
यति सूक्तग्रहणमग्निं तमन्य इत्यत्र कर्चो ग्रहणार्थं॥ यदि द्विं समाप्योपतिष्ठंते तदा तत

त्र्यंबकान्वर्जं तिष्पदानूयाजाभ्यां प्राक् तदासमाप्ये स्विंत्र्यंबकार्थं प्रजेषु॥ त्र्यंबका नाम क
र्मविशेषाः। तत्राध्वर्यवः कर्मा धीयते॥ तत्र यदध्वर्युणोक्तं तदस्मदीयैरपि कर्तव्यमित्य
र्थः॥ प्रत्येत्यादित्ययाचरंति। अदितिरत्र देवतानादित्यः। आदित्या नाम्या ज्यानुवाक्या
नाम्नात्॥ वृष्टिमंतो धाय्ये विराजौ॥१०॥ पंचम्यां पौर्णमास्यां शुनासीरीयया। सा क
र्मेध कालमारभ्य यावत् पंचमी पौर्णमासी। तस्यां शुनासीरीया कर्तव्या। शुनासीरीयेति कर्मे
नाम। अर्वाग्यथोपपत्तिर्वा॥ पंचम्याः पौर्णमास्या अर्वागपि यत्र काले कर्तुं संभवति तत्रैवे
त्यर्थः॥ ततो द्वादश्यहे इति शाखांतरोक्तमित्यर्थः॥ वाजिनवर्जं समानावैश्वदेव्या॥ हवि
षां तु स्थाने पशुप्रभृतीनां वायुर्नियुत्वान्वायुर्वा शुनासीरौ विंद्रो वा शुनासीर इंद्रो
वा शुनः सुर्य उत नः॥ नियुत्वानिति वायोर्गुणः॥ शुनासीरः शुनश्च इंद्रस्य गुणौ॥ प्रथ

श्रौ०ह्न०
१९८

मद्वितीयौ वैकल्पिकौ ॥ पुनस्त्वयोपि विकल्प्यंते सूर्यस्योत्तमवनं देवतांतरप्रवेशेपि
सूर्य उत्तम एव ॥ अन्यक्रमांतरं भवतीत्येवमर्थः ॥ आ वां यो भूषशुचिया उपनः
प्रयाभिर्यासि दाश्वांसमच्छ सत्वं नो देवमनसे शानाय प्रकृतिं यस्त आनट् शुनासीरा
विमां वाचं जुषेथां शुनं नः फाला विकृषंतु भूमिं दुंवयं शुनासीरमस्मिन्यज्ञे हवाम
हे ॥ स वाजे सुष्ठनो विषत्ः ॥ अश्वायंतो गव्यंतो वाजयंतः शुनं हुवेम मघवानमिंद्र
मश्वायंतो गव्यंतो वाजयंतस्तरणिर्विश्वदर्शतस्त्विंद्रे देवानामुदगादनीकमिति याज्या
नुवाक्याः ॥ या याज्यानुवाक्या गृह्यं या अस्मिन्प्रकरणे आम्नाता याज्यानुवाक्यास्ता एव
एतत्प्रकरणसंबंधिनीनां देवतानां शाखांतरादागतानामपि कथंचिदपि संभवे गृहीतव्याः
॥ नान्या इत्येवमर्थः ॥ समाप्य सोमेन यजेत राकेण पशुना ॥ चातुर्मास्यानामेतावंगभूतौ

राम
९८

पशुसोमौ निरूढ ज्योतिष्टोमप्रकृतिकौ समाप्तिनिमित्तत्वादनयोः ॥ चातुर्मास्यानि वा पुनः श्चातुर्मास्यानि वा पुनः ॥ चातुर्मास्यैरिति वक्तव्ये अन्यथा वचनं नैमानि तदंगभूतानीति ज्ञापयितुं तेन पुनः पितान्यवाभ्यसितव्यानीति गम्यते ॥ अभ्यासपक्षे समाप्तावपि नैव पशुसोमौ कर्तव्यौ ॥ तस्य पक्षस्य पूर्वाभ्यां सह वैकल्पिकत्वात् ॥ वरुणप्रघासे बृहदुच्यते । अग्निहुत्वाभावादग्निवाचिनाम नूहः ॥ घृतवतीमित्यत्राध्वर्यू आस्येथां विश्ववारा इत्यूहः ॥ वेदोसीत्यत्र वेदविषयाणां पदानामूहः ॥ अन्यदप्येवं रूपमस्ति चेत्तदन्वेषणीयं ॥ १८ ॥ इत्याश्वलायनसूत्रवृत्तौ नारायणीयायां द्वितीयोध्यायः ॥ ॥ हरिः ऽॐ २ अथ पशौ ॥ अधिकारोयं प्राक् प्रायश्चित्ताधिकारात् ॥ पशुगुणकं कर्म पशुरित्युच्यते ॥ इष्टिरुभयतोन्यतरतो वा ॥ तस्य पशोरुभयतः अन्यतरतो वा इष्टिः कर्तव्या ॥ आग्नेयी वा ॥ या सा विष्टिः पशो

श्रौ॰ वृ॰
९९

रुभयमेोन्यतरतो वा कर्तव्यत्वेन चोदिता साग्निदेवत्या वा भवेदित्येकोर्थः ॥ अपरश्चार्थो
वाशब्दाल्लभ्यते ये यमाग्नेयीष्टिः पशोरुभयतोन्यतरतो वांगत्वेन विहिता सा न भवेद्दे
ति । तेनेयमिष्टिरनित्येत्यवगंतव्या । अतः सिद्धस्वतंत्रेषु पशुषु कर्तव्या अंगभूतेषु न
कर्तव्येति ॥ आग्नावैष्णवी वा ॥ इष्टेः करणपक्षे देवताविकल्पोनेन विधीयते । उभे वा ॥ आ
ग्नेयी चाग्नावैष्णवी च एकस्मिन्पशुप्रयोगे द्वे वा इष्टी भवेतां ॥ अन्यतरा पुरस्तात् ॥
यदा उभे स्यातां तदैका पुरस्तादितरोपरिष्टादित्येवं भवतः ॥ नोभे संहृते उभयतोन्य
तरतो वा भवेतामिति सूत्रार्थः ॥ उक्तमग्निप्रणायनं ॥ उक्तग्रहणं वारुणप्राघासि
कस्य सविधिकस्य ग्रहणार्थं ॥ पश्चात्पाशुबंधिकाया वेदेरुपविश्य प्रेषितो यूपाया
ज्यमानायां जंति त्वामध्वरे देवयंत इत्युक्तमनवचनेनार्धर्चआरमेत । वेदं तरस्या

राम
९९

भावेपि पाशुबंधिकाया इति विशेषणं तत्छानेतद्धदुपचारसिध्यर्थं॥ प्रेषितवचनं बहु
यूपकेकर्मपि अंजसादीनां पदार्थानुसमये क्रियमाचो प्रेषितः प्रेषितोनुब्रूयादित्येव
मर्थं। यूपायाज्यमानायेति यूपमज्यमानमभिधातुमेतामृचमनुब्रूयादित्यर्थः॥ तस्याउ
त्तमेनवचनेनेति संबंधः॥ उछ्रयस्व वनस्पते समिद्धस्य श्रयमाणः पुरस्ताद्धूर्ध्व ऊ तय
इति द्वेजातोजायते सुदिनत्वे अन्हामित्येकर्चं आरंभे युवासुवासाः परिवीत आगादिति
परिदध्यात्॥ परिदध्यादिति वचनं पदार्थानुसमये प्रतिपदार्थं नानुवनस्यमेद्दृइतिज्ञापना
र्थं॥ यत्रैकतंत्रे बहवः सपशवो त्यं परिधायसंस्तुयादनोमिहिंकृत्य यानो नरो देवयंतो
निमिम्युरिति षड्भिः॥ यस्मिन् कर्मणि एकस्मिन्नेव पशुतंत्रे बहवो यूपाः सपशवश्चेत
त्रांत्यमंत्रवचनं परिधाय संस्तुयाद्यूपान्॥ कांडानुसमयाभिप्रायेणेयं समुच्यते अंत्यमिति

श्रौ·वृ०
१००

त्यमिति॥ तदानुवचनस्याभिन्नत्वात्यदार्थानुसमये त्वेकमेवानुवचनं भवति। एकतंत्रवचनं एककर्ममात्रनिवृत्यर्थं। बहवइति द्वयोर्निवृत्यर्थं। सपशवइति अपशुकबहुत्वनिवृत्यर्थं॥ पंचभिर्वा॥ अनभ्यासमेके॥ प्रथमोत्तमयोरनभ्यासमित्यर्थः॥ उक्तमग्निमंथनं तथा धाय्ये कृताकृता वाज्यभागा वावाहने पशुदेवताभ्यो वनस्पतिमनंतरं॥ आवाहयेदिति शेषः॥ आवाहनग्रहणं आवाहनादिष्वोष्टकेषु वनिगमेषु निगमनं वनस्पतेर्न पाशुकेष्वित्येवमर्थं॥ अतः सूक्तवाकप्रैषे निगमनं न कर्तव्यं भवति॥ संमार्गैः संमृज्य प्रवृत्ता हुतीर्जुहुयात्॥ संमार्गैः संमृज्य उल्मुकं स्रुचौ प्रवृत्ताहुतीर्जुहुयात्। प्रवृत्ताहुतीरिति कर्मनामनगुणविधिः॥ जुष्टो वाचे भूयासं जुष्टो वाचस्पतये देवि वाक्। यद्वाचो मधुमत्तमं तस्मिन्माधाः सरस्वत्यै वाचे स्वाहा। पुनदाहापर्पच विग्राहं स्वाहा वाचे वाचस्पतये स्वाहा सरस्वत्यै स्वाहा स

राम
१००

रस्वतेमहोभ्यः संमहोभ्यः स्वाहेति॥ सकृद्गृहीत्वैकां हुत्वा पुनः सकृद्गृहीत्वा पंचाहुतिर्जु
हुयात्। आहुतिसंख्याभेदादेव द्रव्यभेदे सिद्धे विग्राहवचनं मंत्रविग्राहणार्थं॥ सोम एवैके
॥ सोमशब्देन सोत्यमहरुच्यते सौत्य एवाहनि अयं होमो नान्यस्मिन्नित्येके॥ प्रशास्तारं ती
र्थेन प्रपाद्य दंडमस्मै प्रयच्छेद् दक्षिणोत्तराभ्यां पाणिभ्यां मित्रावरुणयोस्त्वा बाहुभ्यां
प्रशास्त्रोः प्रशिषा प्रयच्छामीति। विहारस्य प्रपदनस्य तीर्थेनैव सिद्धत्वात् तीर्थेनेति वचनं प्र
शास्तातीर्थेन प्रपद्यस्वेति संप्रैष लाभार्थं॥ प्रदानमंत्रो मित्रावरुणयोरित्यादि॥ तथा
युक्ताभ्यामेवेतरो मित्रावरुणयोस्त्वा बाहुभ्यां प्रशास्त्रोः प्रशिषा प्रतिगृह्णाम्यवक्रो वि
धुरो भूयासमिति गृह्णीयादिति शेषः। तथा युक्ताभ्यामिति दक्षिणोत्तराभ्यां पाणिभ्यामि
त्यर्थः। प्रतिगृह्योत्तरेण होतारमतिव्रजेद् दक्षिणेन दंडं हरेन्न चानेन संस्पृशेदात्मानं वान्यं

वाप्रैषवचनात्॥ अनेन दंडेनात्मानमन्यं वा न संस्पृशेत्॥ आप्रैषवचनात्॥ यावत्प्रैषोच्चा
रणं नास्ति वैतावदयं नियमः। आरब्धे प्रथमे प्रैषे नायं नियमः॥ अन्यान्य पियेज्ञांगान्युपयु
क्तानि न विहारेणाव्यवेयात्। अन्यान्यपीति वचनात्पूर्वोक्तमुत्तरे याहोनारमति
व्रजेद्दक्षिणेन दंडं हरेदिति तदपि व्यवायपरिहारार्थमेवेति गम्यं। तेनैतद्दर्शितं भवति।
हवींषि चाग्नयोंतरतमाह विष्णुच प्रधानाप्रधानविशेषोस्ति। ततः स्रुगादीनि साध
नानि तेषु च विशेषोन्वेषणीयः॥ ततः कर्तारस्तेषु च स्वामी मुख्यो द्वितीयत्ती
चतुर्थेषु विशेष इत्येवं बुध्वा एतेषु पचारे कृते यज्ञांगानि विहारेणाव्यवेतानि भवंति।
उपयुक्तवचनमनेप वृत्तकर्मणामेव ग्रहणार्थं चेदं सूत्रं व्यवायप्रतिषेधपरत्वात्॥

दक्षिणोहोतृषदनात्प्रक्रोवरणायवेद्यां दंडमवष्टभ्य ब्रूयात्प्रैषाश्चादेशं॥ वेदिमोपर्या

बर्हिर्वेदिहोतृषदनं तस्य दक्षिणतो बहिर्वेदि स्वयमवस्थायां तर्वेदिदंडमवष्टभ्य ब्रूया
त्। प्रैषानादेशं। अप्रैषं प्रैषणमित्यर्थः॥ यावंति प्रैषार्थानि प्रैषणानि संति तावत्सु
प्रैषणेषु प्रैषान्ब्रूयादिति। एतदुक्तं भवति। प्रैषाम्नाय परिपठितांस्तत्तान्प्रैषान्मैत्रावरुण
उपप्रेषितः प्रेषितोनुब्रूयादित्यर्थः। च शब्दो मैत्रावरुणानुकर्षणार्थः। तेन ह्यायते
वाय प्रतिषेधसूत्रं सर्वार्थमिति॥ अनुवाक्यां च सप्रैषे॥ पूर्वं प्रैषात्। अनुवाक्यां ब्रूया
दिति शेषः॥ पर्यग्निसोक्रमनोतोन्नीयमानसूक्तानि च॥ एवंभूतमैत्रावरुणानुकर्षणा
र्थश्चशब्दः॥ सोम आसीनोन्यत्र॥ उक्तेभ्यो यदन्यन्मैत्रावरुणस्य सोमे कर्मास्ति तदासीनो ब्रूया
दित्यर्थः॥ ३॥ एकादश प्रयाजाः॥ पशावेकादश प्रयाजा इति नियम्यते सर्वत्र सर्वेषां। तेषां प्रैषाः॥
तेषां प्रयाजानां प्रैषा अपि भवंति ते चैतत्र इत्याह॥ प्रथमं प्रैषसूक्तं॥ उक्तं द्वितीये॥ यदुक्तं प्रकृतौ वसि

ष्ठादीनां नराशंसः इतरेषां तनूनपादिति। तदप्राकृतेषु प्रैषेष्वपि स्यादित्येवमर्थं सूत्रं॥
अध्वर्युप्रेषितो मैत्रावरुणः प्रेष्यति प्रैषैर्होतारं॥ एवं सति होत्रानाध्वर्योः प्रैष आ
कांक्षणीय इत्यर्थः॥ होता यजत्याप्रीभिः प्रैषसलिंगाभिः। होतृग्रहणं मैत्रावरुणा
धिकारात्प्रैषसलिंगाभिरित्याप्रीष्वपि तनूनपान्नराशंसविवेकः कर्तव्य इत्यर्थः॥ समि
द्धो अग्निरिति शुनकानां जुषस्व नः समिधमिति वसिष्ठानां समिद्धो अद्य चेति सर्वेषां॥ वसिष्ठ
शुनकानामुक्त्वा विधीयमानत्वात्तद्वर्जीनां सर्वेषामिति गम्यते। जामदग्न्यामिदंत्वाप्रीसू
क्तं नागस्त्यं॥ आम्नायक्रमानुगुण्याद्वासिष्ठविध्युत्तरकालिकत्वाच्चास्या विधेः। तत्रा
त्र्यादीनां नाराशंस्येव वासिष्ठ्यामाहर्तव्या प्रैषसलिंगाभिरित्युक्तत्वात्। एवं प्राजापत्ये
पि परेषां वसिष्ठादीनां नाराशंस्येवा यथऋषिवा। यो यस्य ऋषिस्तनुगुण्ये यथऋषिरा

यथर्षिपक्षे विवेकोयं प्राजापत्ये तु जामदग्न्यः सर्वेषां॥ तु शब्देनात्र वसिष्ठशुनकानामि
ति विशेषो लभ्यते॥ दश सूक्ते सु प्रेषितो मैत्रावरुणोग्निर्होतानइति तृचं पर्यग्नयेन्वा
ह॥ कालोपदेशादप्रेषितोपि ब्रूयादिति प्रेषितवचनं मैत्रावरुणग्रहणाग्रहणामु
त्तरार्थं। पर्यग्नय इति पठितः क्रियमाणमग्निमभिधातुमित्यर्थः॥ अग्निर्गवे प्रेष्य होत
रिति वोक्तोजे दग्निरसनद्धाजमिति प्रेषमुक्त्वां तर्वेदिदंडं निदध्यात्॥ मैत्रावरुणग्रहणं द्वि
तीयेपि संप्रैमैत्रावरुण एव ब्रूयादित्येवमर्थं। प्रैषपाठस्तु होतृलिंगाविहितत्वात्॥ पूर्व
स्य तु पाठः परिसंख्याभयात्। प्रैषवचनं प्रेषमित्येकवचनविवक्षार्थं॥ तद्विवक्षया
प्रैषैकसिद्धिद्वारेणानवानमस्य साधितं भवति। इदानीं दंडनिधानानुवचनान्न पूर्वं निधा
तव्य इति गम्यते॥ अग्निर्होता हंनंगानि दैवतं पशुमिति यथार्थं॥ अग्निर्गुरिति देव्याः

शमितार आरभध्वमित्यस्य मंत्रस्य नाम॥ मैत्रावरुणाधिकाराद्धोतृग्रहणं। ऊहन्निवरो
नवचनानि संनमयंनित्यर्थः। अंगानी तिवचनमध्रिगो अंगादीनां प्राप्तौ एवोह्येते नान्ये
बर्हिर्मातृपितृशब्दाद्य इति द्योपनार्थं॥ यथार्थमिति योयस्य शब्दस्यार्थस्तंतथोहन्नूया
दित्यर्थः॥ ऊहन्नित्यनेनैवास्मिन्नर्थे सिद्धे यथार्थमितिवचनं सव्यवहारार्थं यमूहस्यप्र
नार्थं॥ पुंवन्मिथुने॥ मिति स्त्रीपुंसयोः समाहार उच्यते। अस्मिंत्समाहारे पुल्लिंगे नैवो
हः कर्तव्य इति नियम्यते॥ मेधपती॥ अयंशब्दो देवतावाची तस्य स्त्रीप्रत्ययांतस्यापं
निर्देशः कृतः। तेनायमपि पदार्थो देवतावाचिनः स्त्री प्रत्ययसंबंधादस्मिन्त्सूत्रे लभ्य
ते स्त्रीदेवतेति। स च स्त्रीदेवतेति पदार्थोस्मिन्त्सूत्रे पुंवद्वचनस्य विधीयमानत्वात् स्त्री
देवतायामभिधेयायामित्यर्थात्कल्प्यते। मेधपतिशब्द प्रातिपदिकं च पुंवद्वचनस्याविष

यत्वेनेत्येवं संप्रदायाविच्छेदादवगम्यते। अत एवं सूत्रार्थः। स्त्रीदेवतायां मेधपतिशब्दं पुं-
वद्ब्रूयादिति। एवं व्याख्यायमाने स्म ब्राह्मणमनुसृतं भवति॥ अथो खल्वाहुर्यस्यै वा
व कस्यै चेत्यादि॥ मेधायां विकल्पः। मेधपशब्दात्पशुवाचिनः परः स्त्रीप्रत्ययः पूर्व-
वत्स्त्रीपशाविति निगमयति॥ तेन स्त्रीपशौ मेधपशब्दं पुंवद्वा ब्रूयादिति विकल्पोऽत्र विधी-
यते॥ यथार्थमूर्ध्वमध्रिगोरन्यान्मिथुनेभ्यः॥ अध्रिगोरूर्ध्वं यथार्थमूहो भवति। मिथुने-
तु सर्वत्राध्रिगुवदेवैतदुक्तं भवति॥ अध्रिगोरूर्ध्वमङ्गादिशब्दा अन्ये चार्थवशेनोह्यं-
ते न नियमेनाङ्गादिशब्दा एवेति। मिथुनं तु सर्वत्र पुंवदेवाभिधेयमिति॥ सर्वेषु यजुर्नि-
गदेषु॥ न केवलमयं विधिः पशावेवा कथं तर्हि सर्वेषु यजुर्निगदेषु चार्थवशेनोहः का-
र्यः। यजूंष्येवोच्चैः प्रयोगार्हा निगदा उच्यंते॥ प्रकृतौ समर्थनिगमेषु॥ प्रकृतावि ति

यस्मिन्कर्मणि अर्थाभिधानार्थो यो मंत्र उत्पद्यते तत्स्य मंत्रस्य तत्कर्म प्रकृतिः ॥ समर्थो
नाम यथार्थाभिधायी शब्दः ॥ निगमानाम मंत्राः ॥ उत्पत्तिस्थाने ये मंत्राः यथार्थाभिधा
यिशब्दवंतः तेषु विकृतिषूहो भवति । ये तु पुनः प्रकृतावेवायथार्थाभिधायिशब्दवं
तः तेषु विकृतावपि न भवत्यूह इति ॥ प्रकृतावसमर्थनिगमसंभवानुज्ञानान्न प्रकृ
तावूहो विद्यत इति गम्यते । उपपन्नमेवेदं । तदर्थाभिधानार्थमेव तस्य मंत्रस्य प्रत्यक्षा
म्नानात्तत्र लक्षणया गौण्या वाभिधानं कल्पनीयं ॥ तस्याः कल्पनाया विकृतावप्य
विशेषात्तेषां विकृतावप्यनूह एवेति युक्तमुक्तं प्रकृतौ समर्थे निगमे स्थिते । प्रा
कृतास्त्वेवं मंत्राणां शब्दाः ॥ उहे क्रियमाणे मंत्राणां प्राकृता एव शब्दा भवेयुः ॥ एत
दुक्तं भवति । यदि प्रकृतौ छांदसं प्रातिपदिकं स्यात्तदा तस्मादेव विभक्त्यूहः कर्त

ह्येनोच्यते। तथा चाप्रीसूक्तं ग्रहीतव्यं। स्वीयऋषिनामधेयस्यानुगुण्या आप्र्यः कर्तव्या इ
त्यर्थः। तत्र भगवता शौनकेन यथऋषिपक्षे आप्रीविवेकार्थमेव श्लोक उक्तः॥ कण्वां
गिरोगस्त्याः शुनको विश्वामित्रोत्रिरेव च। वसिष्ठः कश्यपो वाध्र्यश्वो जमदग्निरथोत्तमः॥
तत्र दृष्टानां सूक्तानां प्रथमं कण्वानां सुसमिद्धो न आवहेति॥ द्वितीयं तद्वजीनामंगिरसां
समिद्धो अग्न आवहेति। तृतीयमगस्तीनां समिद्धो अद्य राजसीति॥ शुनकानां चतुर्थं
समिद्धो अग्निर्निहितः पृथिव्यामिति॥ विश्वामित्राणां पंचमं समित्समित्सुमना इति।
अत्रीणां षष्ठं सुसमिद्धाय शोचिष इति॥ वसिष्ठानां सप्तमं जुषस्व नः समिधमग्ने अद्ये
ति। अष्टमं कश्यपानां समिद्धो विश्वतस्पतिरिति। वाध्र्यश्वानां नवमं इमां मे अग्ने स
मिधमिति। शुनकवाध्र्यश्ववर्जितानां भृगूणां दशमं समिद्धो अद्य मनुषो दुरोण इति।

श्रौ०सू०
१०९

व्योन प्रातिपदिकदिकसंस्कारइति। तुशब्देन न्यायविरुद्धोयमर्थइतिदर्शयति। ऊहस्यास्मदाय त्तप्रयोगत्वात्भाषिकत्वमेवेतिन्यायविरुद्धमपि। असमर्थेष्वनूहवचनं छांदसस्यापिप्राकृतस्येवशब्दस्यग्रहणमित्युभयंगृहीतव्यमेवेतिएवमर्थं तुशब्दंप्रयुक्तवांस्त्वयमेवाचार्यः॥ प्रतिग्निधिष्वपि॥ प्राकृता एव शब्दा इतिवर्तते। नाभिरूपमामेदोहविरित्यन्तनूह्यानि॥ यथाकथंचित्प्राप्तानां प्रतिषेधोयं। उपमेत्युपमार्थाः। श्येनादयः॥ शब्दानूह्यं॥ दैव्याः शमितार आरभध्वमुत मनुष्या उपनयत मेध्या दुर आशासाना मेधपतिभ्यां मेधं। प्रास्मा अग्निं भरत स्तृणीत बर्हिरन्वेनं माता मन्यतामनु पितानु भ्राता सगर्भ्योनु सखा सयूथ्यः। उदीचीनां अस्य पदो निधत्तात् सूर्यं चक्षुर्गमयतात् वातं प्राणमन्ववसृजतादन्तरिक्षमसुं दिशः श्रोत्रं पृथिवीं शरीरं। एकधास्य त्वचमाछ्यतात्पुरा नाभ्या अ

राम
१०९

पिशसोवपामुत्खिदतादंतरेवोष्मणं वारयध्वात्॥ श्येनमस्य वक्षः कृणुतात् प्रशसा बाहू श
ला दोषणी कश्यपेवांसाच्छिद्रे श्रोणी कवषोरू स्रेकपर्णाष्ठीवंता षड्विंशतिरस्य वंक्रे
यस्ता अनुष्ठ्योच्च्यावयतात् गात्रंगात्रमस्यानूनं कृणुतात्। ऊवध्यगोहं पार्थिवं खनता
त्॥ अस्ना रक्षः संसृजतात्॥ वनिष्ठुमस्य मा राविष्टोरूकं मन्यमाना नेद्वस्तोके तनये र
विता रवच्छमितारः॥ अध्रिगो शमीध्वं सुशमि शमीध्वं शमीध्वमध्रिगा३उ अपाप॥ अयम
ध्रिगुः॥ अत्रोह्यानि पदानि वक्ष्यंते। मेधपतये मेधपतिभ्यां मेधपतिभ्यो मेधं मेधौ मेधान्।
मेधां मेधे मेधाः॥ एवं वा॥ अस्मै आभ्यां एभ्यः॥ अस्यै आभ्यां आभ्यः॥ एनं एनौ एनान्। एनां ए
ने एनाः॥ अस्य अयोः नेषां। अस्याः अनयोः आसां। शरीरे शरीराणि। त्वचं त्वचौ त्वचौ त्व
चः॥ वपां वपे वपाः। वक्षः वक्षसी वक्षांसि। प्रशसः॥ प्रशसः॥ बाहू बाहून्। दोषणी दोषाणि

अध्रि॰ वृ॰
१०६

अंसा अंसान् । अछिद्रे अछिद्राः । श्रोणीः । ऊरू ऊरून् । अष्ठीवंता । अष्ठीवतः । वनिष्ठुं वनिष्ठ
वनिष्ठून् । इत्येवमूह्यं । मेधं । सयूथ्याः । शारीरं । वारयध्यात् । अनूनं कृणुतात् । स जनातु
शमितारः । अधिगाउ अपापा इत्येतान्यवसानानि ॥ तत्र श्लोकः । मेधंसयूथ्यं स्वशारीर
मध्याद नूनं पूर्वं कृणुतान्नताच्च ॥ जतान्मितारोध्रिगाउ अपापए ते ध्रिगो मध्यविराम
देशाः ॥ अस्मारक्तः संस जताच्छमितारोपापेत्युपांशु ॥ एते त्रयः शब्दाः स्वे स्वे स्थाने उपांशु
प्रयोक्तव्याः ॥ शमितार इतीतरस्यां मध्येपाठात् तन्मध्यगत एवोपांशु भवति नान्यः ॥ एक
धाषड्विंशतिरिति द्विर्द्वि बहूनां ॥ द्विबहूनां पशूनां संबंधिनावेतोष्णह्नो द्विर्ब्रूयात् । विभाक्तमू
ह समस्य वचननिवृत्त्यर्थं एकधाषड्विंशतिरावृत्त्याभ्यासो नियम्यते ॥ चुरांतरीतिचै
के ॥ अध्रिग्वादि त्रिरुक्त्वा शमितारो यदत्र सुकृतं यावथास्मासु तद्यद्दुष्कृतमन्यत्रतदिति

राम
१०६

जपित्वा दक्षिणावृदावर्तते। अध्रिगो शमीध्वमित्यादि अपापां तं त्रिरुक्त्वा शमितार इत्या
दि च जपित्वा दक्षिणावृदावर्तते। दक्षिणावृद्वचनं विहारादव्यावृत्तिरिति प्राप्तमनूद्यते॥
एतं मंत्रं जपित्वेदमेव कुर्यात्। नान्यत्किंचित् दक्षिणावृत् इत्येवमर्थं॥ उक्तेन प्रकारेणा
वृत्य पश्चतः कुर्यात्॥ सव्यावृतौ ब्रह्मयजमानौ॥ संज्ञप्ते पशावावर्तेरन्॥ पुनरावर्तनका
लोऽयं। तस्मादेतावंतं कालं परांच एवासीरन्॥३॥ वपायां श्रप्यमाणायां प्रेषित स्तोके
भ्यो न्वाह जुषस्व सप्रथस्तममिमं नो यज्ञमिति। वपायां श्रप्यमाणायामिति वचनं श्र
प्यमाणवपासंबंधि स्तोकाभिधानानुवचनेन वसंस्क्रियत इति ज्ञापनार्थं। प्रेषित व
चनं प्रैष एवास्यानुवचनस्य निमित्तं॥ नावसरविशेष इत्येवमर्थं॥ उक्तमाहापनं स्वा
हाकृतिभ्यः॥ स्वाहाकृत्यर्थमत्रस्रुगादापनं कर्तव्यं॥ तेन माध्यंदिने सवने प्राजापत्ये पुस्ते

कानंतरं स्वाहाकृत्यभावादादापनं न कर्तव्यं भवति। एतदप्यत्रावगम्यते स्रुगादापनं प्रया
जार्थमेवेति। तेनाज्यभागप्रभृतिषु हविराहुतिप्रभृतिषु चैतन्न स्यात्॥ होता यक्षद
ग्निं स्वाहाज्यस्य स्वाहा मेदस इति प्रैष उत्तमा प्रीयाज्या॥ दशसूक्ते स्विति वचनादुत्तमे प्रै
षो वशिष्टः स्वाहाकृत्यर्थः। तदर्थमेवाप्रीचावशिष्टा॥ किमित्यत्रोभयोर्वचनं। आप्रीव
चनस्येदं प्रयोजनं॥ उत्तमैवाप्रीयाज्या नात्र देवतावचना स्वाहामुं स्वाहामुमिति प्राकृता
भिगंतव्येति। प्रैषवचनं विस्पष्टार्थं॥ वपा पुरोळाशो हविरिति पशोः प्रदानानि। प्रदाना
नीति यागा इत्यर्थः॥ पशावेतद्द्रव्यसंबंधिनस्त्रयो यागाः कर्तव्या इत्यर्थः। तेषां प्रदानानीति
संज्ञा। पशावित्यधिकारे पशोर्वचनं पशोः पशोरिति वीप्सार्थं। तेनैकदेवत्येषु पशुषु प्रतिपशु
वपाहविर्भेदवत्पुरोडाशभेदः सिद्धो भवति। तानि पृथग्ज्ञानादेवतेषु। एकस्मिन्नपि

पशौ वपापुरोडाशहविषां प्रैषयाज्यानुवाक्याभेदात्पृथक्भावः सिद्धः परस्परं ॥ तथा
नानादेवतेषु पशुषु वपायागानां पृथग्भावः सिद्धो याज्यानुवाक्याभेदादेव । तथा पुरो
डाशानां हविषामपि इति पृथग्भावस्याविधेयत्वादेकदेवतेषु वपानां सकृद्यागः तथा पुरोडा
शानां हविषामपीति व्यतिरेक एवात्र विधातव्यः ॥ नानेति वचनं योगविभागार्थं तेनैकदेवते
ष्वपि वपादीनां प्रदानत्वं भवति ॥ एकयोगत्वे नानादेवतेष्वेव तेषां पृथक्प्रचारवत्पृथक्प्रदान
त्वमपि स्यात् । योगविभागे सति पूर्वेण सर्वेषां प्रदानत्वमुत्तरेणैकदेवतेषु सहप्रचार इत्यु
क्तं ॥ मनोतां च । अवदीयमानहविरर्थत्वान्मनोताया नानादेवतेषु पृथक्प्रचारे सत्यवदा
नस्य यागव्यवधानात्प्रति पशु मनोतामंत्रमावर्तयेत् ॥ न मनोतावर्त्तेतित्येके ॥ एके आचा
र्या मनोता नावर्तयितव्येत्याहुः ॥ मनोतावेत्येताविकल्पे सिद्धे गुरुसूत्रकरणं न्यायविक

त्योयमितिप्रदर्सनार्थं ॥ तत्रैकेमन्यंते आग्नेयत्वान्मंत्रस्यत्वं त्रस्यत्वेद्दग्नेप्रथमोमनो
तेतिमनोताग्ण्हस्याग्नौप्रवृत्तिदर्शनात् ।अग्निर्वैदेवानांमनोतेतिच श्रुतेः ।संप्रेषेचहृ
विः शब्दस्यमनोताकाळलक्षणार्थत्वेनापिसंभवादनुवचनस्याग्न्यर्थत्वं ॥ अग्न्यर्थ
त्वेचयागावृत्तावप्याहवनीयाख्यस्याग्नेरभेदेनानावृत्तिरेवेति ॥ आचार्यस्तुपशोर्वा आ
लब्धस्यमनोतायेहविषोवदीयमानस्यानुब्रूहीत्याहमनएवास्यावरुंधइतिश्रुतेः ।तस्या
अयमर्थः ॥ शौरालब्धस्यसंज्ञपनकालेजीवोपक्रामतिसएवमनःशब्देनोच्यते ॥ यत्ते
यमंवैवस्वतंमनोजगामदूरकमित्यादिषु जीवेमनःशब्ददर्शनात् ।जीवेग्निशब्दश्चदृश्य
ते ॥ अहंवैश्वानरोभूत्वाप्राणिनांदेहमाश्रितः ।प्राणापानसमायुक्तःपचाम्यन्नंचतु
र्विधमितिभगवद्गीतासुदर्शनात् ।अग्निजीवमनसामेकार्थत्वंचदृश्यते ।अयंहोता

प्रथमः पश्यते मन्ति हृद्वे। अतो वदीयमानं हविषो मनोताया। अनुब्रूहीत्युक्ते अग्निजीवात्म
स्य मनसो हविः संबंधार्थमनुब्रूहीत्युक्तं भवति। अतोग्निं प्रकाशयत् अनुवचनं हविषो
जीवमेव प्रकाशयतीति हविरर्थमेवेति गम्यते। तेन यागावृत्तौ अवदानस्य पदार्थांत
रव्यवधानात्प्रतिहविर्मनोतानुवचनावृत्तिं मन्यते॥ अत्र न काचित्क्षतिरस्तीति तमे
व पक्षं परिगृहीतवानाचार्यः॥ तेषां सलिंगाः प्रैषाः। तेषां प्रधानानां समानलिंगाः प्रैषाः। प्रै
षसमाम्नाय एव पठिताः तदर्थत्वे नैव समानलिंगाः समानदेवता इत्यर्थः॥ तेनैतत्साधि
तं भवति। यद्देवत्यः पशुपुरोडाशो भवतीति तेषामिति वचनं तेषामेव सप्रैषत्वं नाज्यभागयो
रित्येवमर्थी प्रैषसमाम्नायस्य क्रत्वर्थत्वात् तत्राज्यभागयोः संप्रैषस्यानाम्नानात् अ
प्रैषावेवेति मन्यमानस्तेषामित्युक्तवानाचार्यः॥ यद्यध्वर्यवः संप्रैषौ कुर्युः तदा होताप

श्रौ०वृ॰
१०९

क्ष दग्निमाज्यस्य जुषतां हविर्होतर्यज। होता यक्षत्सोममाज्यस्य जुषतां हविर्होतर्यजेत्ये
तौ प्रैषौ भवतः तस्तदाज्यभागयोः॥ तेष्वग्नीषोमयोः स्थाने याया पशुदेवता तेषु प्रदानप्रैषेषु
पश्चात्तरेष्वतिदेशात्प्राप्तेषु यास्तासु विकृतिषु देवतास्तासामेकैकामेवाग्नीषोमयोः स्थाने
निर्दिश्य यष्टव्यं न सर्वा देवताः सकृदेव निर्देष्टव्याः। यावत्यस्तत्र देवतास्तावत्कृत्वः प्रैषो
भ्यसितव्य इत्यर्थः। एतदर्थमेव यायापशुदेवतेति वीप्सावचनमुक्तं॥ अयमर्थोऽस्मिन्सूत्रे
सम्यग्व्युत्पादितो ग्नीषोमयोः स्थान इति ब्रुवता चाग्नीषोमीयः पशूनां प्रकृतिः पाशु
के विध्यते गृह्यमाणा इति॥ छागस्थाने उस्रो गोमेषौ विकोद्वयोश्चोन्वादेशे व्यक्तचोद
ना॥ गोमेषद्वयानामेकैकस्या जाते द्वैशब्द्येनियम्यते नैवैकल्पिकौ। एतदुक्तं भवति। गो
जातिश्चेत्पशुश्छागस्थाने गोशब्दमुस्रशब्दं वा प्रयुंजीत॥ एवमितरयोरप्येतयोरपि जात्योः

राम
१०९

प्रापिकोयंविधिः। कुतः। अन्वादेशेव्यक्तचोदनां। औपदेशिकस्यमंत्रस्यप्रकृतौप्रयो
गः आदेशः। तस्यैवातिदेशः। तस्यैवातिदेशात्तस्यविकृतौप्रयोगोन्वादेशः। व्यक्तचो
दनाप्रकृतिप्राप्तस्यमंत्रस्यविकृतौसंस्कृत्यपुनःपाठः। यथाप्रजापतयेछागस्यनूप
रस्य गोमृगस्येत्येवमादितत्रतामनुसृत्यमंत्राः प्रयोक्तव्याः। एतदुक्तंभवति आतिदे
शिकेमंत्रप्रयोगेयस्याद्विकृत्युपदेशमनुसृत्यैवमंत्रः प्रयोक्तुंयुज्यते। तस्माद्विक
त्युपदेशोसतिसएवभवति। तदभावेगोशब्दः उस्रशब्दोवेत्येवंद्रष्टव्यं॥ एवंवनस्पति
स्विष्टकृत्सूक्तवाकप्रैषेषु। यथाप्रधानप्रैषेषुदेवताशब्दस्यस्थानेपशुशब्दस्यच
स्थानेएकैकंदेवताशब्दंपशुशब्दंचकृत्वाप्रयोगउक्तः। एवंवनस्पतिस्विष्टकृत्सूक्तेवाक
प्रैषेषुप्रयोगः कर्तव्यः॥ तत्रायंविशेषः। नानादेवतेष्वपिपशुषुयत्राग्नेरित्यादिः प्रिया

श्रौ० सू० धामान्यंतस्याऽयाळादेस्तदंतस्यबध्नन्नमुष्मा अमुमित्यस्य चत्रिषु प्रैषेषु अभ्यासो
१०२० नसर्वस्य प्रैषस्येति॥ प्राजापत्येत्वग्निचित्यासंयुक्तेवायव्यं पशुपुरोळाशं॥ एके
वायव्ये प्राजापत्यं॥ तेनपशुदेवतावर्धत इत्याचार्याः पुरोळाशतत्प्रधानत्वात्।
त्वयमभिप्रायः॥ प्रकृतावग्नीषोमीयपशौ समानदेवतत्वात्पुरोळाशस्ययागस्य
पशुदेवताप्रत्यभिज्ञानात्तत्संस्कारद्वारेण तदर्थतायुक्ता। अत्र पुनर्भिन्नदेवतत्वात्त
दर्थतानयुक्ता॥ ततश्चसूक्तवाकप्रैषेपुरोडाशेन पशुदेवताधनमयुक्तमित्याशंका
नेवकर्तव्या। प्राजापत्येपिपशोप्राकृतकार्यार्थतयैव पुरोडाशयागोपिप्राप्त
एव। एवंपशुयागार्थतयाप्राप्तस्यदेवतांतरं विधीयमानंप्राकृतदेवताकार्यक
रयात्वेनैवविधीयते। तत्रपक्षद्वयेभेदादप्रत्यभिज्ञानमाशंक्यतेतदपिनैवार्शकनी रा० १०२०

यां तदर्थं एवायं शब्दः प्रयुक्त इत्यवगम्यते ॥ ऐंद्राग्नमाग्नेयमिति वदुविष्णातीतितेन
पशुदेवतावर्धनेत्याचार्याः पुरोडाशतत्प्रधानत्वादिति वदंतः सूत्रकारकौस्येति ।
अयमेवार्थः श्रुतौ चोद्योत्तरभंग्योपपादितः । तदाहुर्यदन्यदेवत्यउत पशुर्भवती
त्येवमादिना पवमानः प्रजापतिरित्येवं वंशतेन ॥ पुरोलाश निगमेषु पुरोळाशवद्ध
वीष्याज्यवर्ज्येषां तेन समवत्तहोमः ॥ यस्मिन्नने पशुतंत्रे पुरोडाशस्य स्थाने पु
रोडाशश्चवीज्यधानाकरंभपरिवापामिक्षादयो विहिताः तत्र स्विष्टकृतितेषां
समवदायप्रचारो विहितस्तत्र पशुपुरोडाशस्विष्टकृत्प्रैषे सूक्तेवाकप्रैषे च पशु
पुरोडाशेन देवतावर्धनं कर्तव्ये सति प्रकृतौ पुरोडाशस्य पुरोडाशत्वात्तेनैव शब्दे
न वर्धनं कृतं इह तु नानारूपत्वाद्धविषां स्वेन स्वेनैव शब्देनाभिगमनप्राप्ते पुरोडा

प्राशद्वे नैव च र्वादीनां निगमनं विधीयते। सवनीयानां स्विष्टकृत्प्रैषे सौमिके सूक्त
वाकप्रैषे चास्य छ त्रिन्याय स्य दृष्टत्वादेव मुक्तं॥ आज्यतु तत्राभावाद दृष्टः प्रयोग इ
ति तस्य स्वशद्वे नैव निगमनं भवति। आज्यस्य तु पुरोडाशत्व संभावनेवसंदिग्धा। यद्य
संभवः तदाज्यवर्जमिति अयमभावानुवादः यदि संभवति तदा स्वशद्वे नैव निग
मनमाज्य पुरोडाशानामाज्यपुरोडाशैरिति॥ मेधोरभीयानितिपश्वभिधाने॥ मेधो
रभीयानित्येते पदे पश्वभिधाने पशोरभिधायके इत्यर्थः॥ मेधपदस्य विधानं प्रथम
प्रयुक्तत्वादस्मै एवमित्येवमादीनां प्रदर्शनार्थं। रभीयानित्यस्योपमार्थत्वशंकानि
वृत्त्यर्थं। पश्वभिधाने आदद्घ्र सदिति पाठः कर्तव्यः प्रगृह्यत्वादस्य पदस्य॥ आदद्घ्र
सत्कर ज्जुषतामघवद्गनभीद्वीवृधते ति देवतानां॥ एतेषां पाठो द्विवचनांतानामाम्नो

यसिद्धत्वादेकवचनबहुवचनयोरिष्टलकारवरिग्रहार्थं। स्यादन्तु। आदन्त्। घसत्घस
नाः करत्करन्त जुषतां जुषांतां। अघत्घंक्षेसन्। अग्रभीत् अग्रभीषुः। अवीवृधत अ
वीवृधंत॥४॥ कुतायां वपायां सब्रह्मका आश्वात्वाले माजयंते निधाय दंडं मैत्रावरुणः।
अस्मिन्नवसरे चात्वाले मार्जयंते। बहुवचनेनैव सर्वेषां मार्जने सिद्धे सब्रह्मकवच
नमस्मदीयाः सर्वे सिद्धमार्जीयेषुः। न पृथक्पृथगित्येवमर्थं। दंडनिधानवचनं स्तोका
नुवचनार्थमात्तस्य दंडस्यात्रैव निधानं न प्रागित्येवमर्थं॥ इदमापः प्रवहत सुमित्र्या
न आप ओषधयः संतु दुर्मित्र्यास्तस्मै संतु योस्मान्द्वेष्टि यं च वयं द्विष्म इति। इदमापः प्रवहते
त्यनयर्चा यजुषा चोभाभ्यां मार्जनं कर्तव्यं॥ एतावन्मार्जनं नातिदेशिकं कर्तव्यमि
त्यर्थः। पश्वधिकारे पुनः पशाविति वचनं पश्वंगभूतायामिष्टौ आतिदेशिकस्य मार्ज

श्रौ० वृ०
११२

नकस्यप्रवृत्त्यर्थं। तीर्थेन निष्क्रम्यासीतामा पुरोडाशश्रपणात्। अस्मिन्नवसरे नियमेनै
वकर्तव्यं॥ तेनचरित्वा स्विष्टकृताचरेयुः॥ चरित्वेति प्रकृते चरेयुरितिवचनं प्रधानस्वि
ष्टकृतोर्भेदप्रतिपत्त्यर्थं॥ अतोन्वायात्यानां प्रवेशे सति भयोरेवमध्ये प्रवेशः सिद्धो
भवति॥ यदित्वन्वायात्यानि तैरग्रे चरेयुः॥ यद्यस्मिन्नवसरेन्वागतवो यागा उत्पद्यं
तेतैः पशुपुरोळाशस्विष्टकृतोग्रे चरेयुः॥ तेषामन्वायात्यानीति संज्ञा॥ एतदुक्तं भ
वति। यदिपुरोळाशस्विष्टकृतोग्नेयैः कैश्चनयागैश्चरेयुस्तान्यन्वायात्यानीति तेषा
मियंसंज्ञाविधीयते। चरेयुरितिपुनर्वचनं चरणमेवैषां कर्तव्यं नान्यन्निगमनादीति
सूचनार्थं। तदेवोत्तरेपासूत्रेण विस्पष्टयति। न तु तेषां निगमेष्वनुवृत्तिः॥ अन्वाया
त्यदेवतानां हविषां च आवाहनादिषु निगमेष्वनुवृत्तिर्नास्तीत्यर्थः॥ नन्वेषामूर्ध्वमा

राम
११२

वाहनादुत्पन्नानां॥ अन्वायात्येभ्योन्येषामपि आवाहनकाण्डादूर्ध्वं हविरादिसर्वमुत्पद्यते
येषांते येषांतेषामपिनिगमेष्वनुवृत्तिर्नास्तीत्यर्थः॥ इळामग्नेपुरुदंसंसनिंगोर्होतायक्ष
दग्निंपुरोळाशस्यखदस्वहव्यासमिषोदिदीहीतिपुरोळाशस्विष्टकृतः। पुरोळाश
योःपुरोळाशानामितिहविर्भेदेप्रैषमुक्त्वा॥ ऊर्ध्वमिळायाः॥ ५॥ मनोतायैसंप्रेषितत्वं
ह्यग्नेप्रथमइत्यन्वाह॥ अत्रेळासुपहूयमनोतामन्वाह। प्रेषितवचनमुक्तप्रयोजनं॥
हविषाचरंति॥ तेषांसलिंगाः प्रैषाः इतिप्रैषउक्त॥ तत्रप्रैषेकरतएवाग्नीषोमावेव
मित्येतरेयिणः॥ तत्रहविःप्रैषेकरतएवाग्नीषोमावित्याम्नातंतस्यएवशाबृहस्यस्था
नेएवमित्येतरेयिणं आचार्या वक्तव्यमित्याहुः॥ किमविशेषेणनेत्युच्यते॥ त्र्यन्यत्र
द्विदेवतान्मैत्रावरुणदेवते च। अन्यत्रद्विदेवतात्पशोरेकदेवतेबहुदेवते च पशावित्य

र्थः॥ द्विदेवते च मैत्रावरुणदेवते एवमिति वदंति॥ मित्रावरुणौ देवता यस्य पशोः स मैत्रा
वरुणः पशुः। मित्रावरुणौ देवता यस्य स मैत्रावरुणदेवतः पशुः॥ अत्र मैत्रावरुणशब्दस्य मु
ख्यया वृत्त्या देवताप्रतिपादनासंभवाल्लक्षणया प्रतिपादयति॥ अतस्तेन शब्देन व्यंज
नादि द्विदेवत्यः पशुर्लक्ष्यते। तस्मिंश्चेत्यर्थः॥ एतल्लक्षणाग्रहणं शास्त्रांतरदर्शनाल्लभ्य
त इत्युक्तं भाष्यकारेण॥ अत्र कारणमाह॥ तथा दृष्टत्वात्॥ प्रैषेष्वेकदेवतेषु कद्विदेवतेषु च
व्यंजनादि द्विदेवते च तथादर्शनात्तेमन्यंत इत्यर्थः॥ प्रकृत्यागाणगारि॥ तत्र हेतुमा
ह॥ उत्पन्नानां स्मृतत्वात् आम्नायेनर्थभेदे निरर्थो विकारः॥ संप्रदायाविच्छेदेनाभ्यस्यमा
ने आम्नाये दृश्यमानानां पदानामर्थवशेनानुष्ठानां सतां विकारइत्येतस्मिः प्रयोजनमि
त्यर्थः॥ उपन्यासप्रयोजनं एवंविधानां सामान्यतो दृष्टभ्रांतिः क्वचिदपि न कर्तव्येति॥

याज्यायाअंतराईचौविसाहोमआरमेत। वसाहोमार्थंतत्रावसायनोत्तस्माद्दीना
वसानस्यतदर्थत्वात्तस्मिन्कृतेसमापयेत्॥ वनस्पतिनाचरंति। प्रैषमभितोयाज्यानु
वाक्येप्रैषसमाम्नायेयोवनस्पतिप्रैषः। तमभितोऽर्चावाम्नायेतेतेवनस्पतेर्या
ज्यानुवाक्येभवतः॥ प्रैषसमाम्नायपठितापियाज्येतिसमाख्यानत्वह्योत्रैववक्तव्या।
यत्राग्नेराज्यस्यहविषइत्यत्राज्यभागोक्तिर्यते॥ तद्यातयेस्मिन्प्रैषेप्रधानदे
वतावदेतौनिगमयेदित्यर्थः॥ एतंएतौएतान्। एतांएतेएताः। रभीयांसंरभीयांसोरभी
यसः। रभीयसारभीयस्योरभीयसीः॥ अयोऽग्निरग्नेराज्यस्यहविषइतिस्विष्टकृति॥
इळामुपहूयानुयाजैश्चरंति॥ इळामुपहूयेतिवचनमानंतर्यार्थं। तेनप्रकृतिप्राप्तंदक्षिणा
प्रतिग्रहाद्यत्रनास्तीतिगम्यते। तेषांप्रैषास्तत्रीयंप्रैषसूक्तमेकादशोहा॥ द्वह एकादशानु

श्रौ० सू०
११४

स्याजाः॥ नत्रयः॥ प्रागुत्तमाद्वा वान्वयेतदेवो वनस्पतिर्वसुवने वसुधेयस्य वेतु देवं बर्हिर्वा
रितीनां वसुवने वसुधेयस्य वेत्विति॥ एकादशानुयाजा इत्युक्तौ द्वयोरेव पाज्ययोः
पाठात्प्राकृतीभ्योऽन्या वैश्वदेव्या आहर्तव्याः॥ अनवानं प्रेष्यति॥ अनवानं यजति॥ पु
नरनवानग्रहणमुत्तरसूत्रे प्रैषाधिकारनिवृत्त्यर्थं॥ उक्तमुत्तमे॥ यदुक्तमानवा
नं यजतीति प्रकृत्यावेति तद्याज्याया एव न प्रैषस्येत्येवमर्थं। पूर्वसूत्रे पुनरनवानग्र
हणमिति व्याख्यातं॥ सूक्तवाकप्रैषे पूर्वस्मिन्निगमे गृह्णन् नित्यत्रोज्यभागौ॥ निगम
द्वित्वात्पूर्वस्मिन्निति विशेषणं॥ अत्रेति वचनं प्रधानदेवतावदाज्यभागयोरपि
निगमनार्थं॥ गृह्णन्निति बध्नं छ्दस्य प्रत्याम्नायः॥ बध्नन्नमुष्मा अमुं वध्नन्नमु
ष्या अमुमिति पशुं स्वदेवताश्चानानो देवतानानाजातीयपशुके पशुतंत्रे पदत्रयस्या

राम
११५

भ्यासलाभार्थं पठितस्यापि पुनरभ्यासपाठः। देवताश्चैवैकपशुकाः ॥ एकपशुका एकजा
तीयपशुका इत्यर्थः ॥ एकव्यक्तिपशुत्वे देवता इति बहुवचनं नोपपद्यते। देवता देवता
देवतेति तत्रैकशेषः। न ह्येकः पशुर्बह्वीभिर्देवताभिः संबध्यते। ननु वैश्वदेवी मारुत
इत्यादिः पशुरस्ति। सत्यं अस्त्यभिप्रायभेदः। ननु देवताभेदः। एवं तत्र विग्रहः ॥ विश्वेदे
वा देवता यस्य स वैश्वदेव इति। अतो जात्यभिप्रायमेवैकशब्दः। यत्रैकजातीयप
शुका अनेका देवतास्तत्र देवताशब्दभेदे वाभ्यसेत् नवध्नन्पशुशुद्धस्य यावद्द्रव्यं
विभक्त्यूहः कर्तव्यः। वध्नन्नग्नय इन्द्राग्निभ्यां छागाविति ॥ पशूंश्चैवैकदेवतान् ॥
अत्र पशुशब्दानेवावर्तयेत् नान्यौ। यथाश्वधन्प्रजापतयेश्वमजं तूपरं गोमृगामिति
भवति। उभयोरेकजातित्वे वध्नन्प्रजापतये छागानिति न किंचिदभ्यसितव्यं। उत्तर आ

श्रौ० ह० १२५

ज्येनेत्याज्यभागावमुष्मा अमुनेति पूर्वेणोक्तं॥ पुरोडाशं पुरोडाशौ पुरोडाशान्॥ तंतौतान्॥
तां ते ताः॥ पुरोडाशेन पुरोडाशाभ्यां॥ पुरोडाशैः॥ समाप्य शेषमग्नौ दंडमनुप्रहरेदनवभृ
थ इदि तिकर्मणि सूक्तवाक शेषं समाप्यानंतरमेवाहवनीये दंडमनुप्रहरेत्॥ अवभृ
थेक र्मणीत्यर्थः॥ तत्रावभृथेनुप्रहरेदित्यर्थः॥ कृताकृतं वेदस्तरणं॥ तीर्थेन निष्क्रम्या
ग्निपशुकेतनान्यव्यवयंतो हृदयशूलमुपोयमानमनुमंत्रयेरं शुगसि यो स्मान्द्वेष्टि
यं च वयं द्विष्मस्तमभिशोचेति॥ शंस्थाजपात्प्राकृ तीर्थेन निष्क्रम्याग्निपशुकेतनान्यव्यवयं
तो हृदयशूलमुदस्यमानं शुगसीत्यनेन मंत्रेणानुमंत्रयेरं सर्वे कर्तारः॥ तस्योपरि
ष्टाद् पउपस्पृशंति द्वीपे राज्ञो वरुणस्य गृहो मितो हिरण्ययः॥ स नो धृतव्रतो राजा धा
म्नो धाम्न इह मुंचतु॥ धाम्नो धाम्नो राजन्नितो वरुण नो मुंच यदापो अघ्न्या इति वरु

राम १२५

यो।तश्या मद्देततो वरुण्यान्नो मुंच॥ मिवापोमो षधीर्हिंसीरतो विश्वव्यचा भूस्त्वेतो व
रुणनो मुंच॥ सुमित्र्यानआपओषध्यः संत्विचा चश क्ष्ः सुमित्र्यानइत्यस्यग्रहणा
र्थः॥ तस्योदस्य मानस्योपरिष्टादपउपस्पृशंति द्वीपेराज्ञइत्यादिभिर्मंत्रैः॥ अस्पृष्ट्वा
नवेक्षमाणाअसंस्पृशंतः समिधः कुर्वंतेतिस्त्रस्तिस्त्रएकैकः॥ अस्पृष्ट्वा हृदयशूलम
नवेक्षमाणास्तमेवाऽसंस्पृशंतः परस्परं। प्रत्याव्रजंति। प्रत्याव्रजंतः सर्वैतिस्त्रस्ति
स्त्रः समिधोऽग्नौ स्त्रीयुः॥ एकैकइति क्रमेणग्रहणार्थं। तेन सर्वैर्युगपत्प्रक्षेप्तीयुः॥
अग्नेः समिदसि तेजोसि तेजोमेदेहीति प्रथमामेधोस्येधिषीमहीति द्वितीयांसमसिसमेध
षीमहीति तृतीयां॥ प्रथमद्वितीयतृतीयग्रहणानिअभ्याधाने प्रथमग्रहीतां प्रथममभ्या
दध्यात्। एवंद्वितीयांतृतीयामित्येवमर्थानि॥ एत्योपतिष्ठंतआपोअद्यान्वचारिष

मिति॥ ततः समिधोऽभ्यादधाति यथागृहीतमग्नेः समिदसि तेजोऽसि तेजो मे दाः स्वाहा। सोमस्य समिदसि दुरिष्टेर्मा पाहि स्वाहा। पितॄणां समिदसि मृत्योर्मा पाहि स्वाहेति। तत इति सर्वेषामुपस्थाने परिसमाप्ते पश्चादभ्याधानारंभार्थी। यथागृहीतग्रहणं योयः पूर्वं गृहीतः स पूर्वमभ्यादध्यान्न सर्वे युगपदभ्यादध्युरिति॥ ततः संस्थाजपइति पशुतंत्रं॥ पशुमात्रस्यैतत्तंत्रं न पशुविशेषस्येत्यर्थः॥६॥ प्रदानानामुक्ताः प्रैषाः॥ सर्वत्र प्रदानानामुक्ता एव प्रैषा भवंति नान्य इति। अतिदेशप्राप्तानां पुनर्वचनं क्वचित्पशुविशेषे तदर्थं तथा प्रैषाम्नानं याज्यानुवाक्याम्नानं चास्ति तत्रापि प्रदानप्रैषा एते एव गृहीतव्या इत्येवमर्थं॥ तेषां याज्यानुवाक्याः॥ याज्यानुवाक्या इत्येतावतैव प्रदानानामेवेति सिद्धे तेषामिति वचनमसिन्नि पशाव इत्यस्मिन्सूत्रे पशून्विधास्यति तेषां पशूनां याानि

तेषांयाज्यानुवाक्यावक्ष्यंतइत्येवमर्थं॥सर्वेषामग्रेऽनुवाक्यास्ततोयाज्याः।ततोयाज्या
इत्यनेनविनापिशिष्टायाज्याख्वमर्भवतिवचनप्रयोजनंसर्वत्रपूर्वंप्रोक्ताअनुवाक्याः
उत्तरायाज्याइतिज्ञापनार्थं।तत्रयाज्यायाःपूर्वनिपातोल्पाच्तरत्वादित्यवगं
तव्यं॥देवतेनपशुनानात्वं॥याज्यानुवाक्यालिंगितदैवतेनवक्ष्यमाणानांपशू
नांनानात्वमित्यवगंतव्यं॥अग्नेनयसुपथाराये अस्मानितिद्वेयाहिनोअग्नेपायुभि
रजस्रैःप्रवःशुक्रायभानवेभरध्वंयथाविप्रस्यमनुषोहविर्भिःप्रकारवोमननावच्य
मानाः॥अग्नेरेताः॥अथसरस्वत्याः॥एकाचेतत्सरस्वतीनदीनामुतस्यानःसरस्वती
जुषाणासरस्वत्यभिनोनेषिवस्यःप्रक्षोदसाधायसासस्वएषापावीरवीकन्याचित्रायुरस्ते
स्तनःशशयोमयोभूः॥अथसोमस्य॥त्वंसोमप्रचिकितोमनीषेतिद्वेत्वंनःसोमविश्वतोव

श्रौ० सू०
११७

योधायाते धामानि दिवि या पृथिव्यां मधाव्यं पुरुस्पृतना सुपर्व्विं याते धामा निहविषाय जंति ॥ अथ पूष्णः ॥ यास्ते पूषन्नावो अंतः समुद्र इति द्वे पूषेमा आशा अनुवेद सर्वाः शुक्रं ते अन्यद्यजंतते अन्यत्प्रपथे पथामजनि ष्ट पूषा पथस्पथः परि पतिं वचस्या ॥ अथ बृहस्पतेः ॥ बृहस्पते या परमा परावदिति द्वे बृहस्पते अति यदर्यो अर्हा त्तमत्विया उपवाचः सचते सं पंस्तुमोवनमोनमो यं त्येवा पित्रे विश्वदेवाय वृष्णे ॥ अथ विश्वेषां देवानां ॥ विश्वे अद्य मरुतो विश्व ऊत्या नो देवानामुपवेतु शंस आ नो विश्व आस्क्रा गमंतु देवा विश्वे देवाः शृणुतेमं हवं मे ये के च ज्मा महिनो अहिमाया अग्ने याहि दूत्यं मा रिषण्यः ॥ अथेंद्रस्य ॥ इंद्रं नरो नेमधिता हवंत इति तिस्र उरुं नो लोकमनुनेषि विद्वान्त्स्वर्वज्ज्योतिरभयं स्वस्ति ... ससाहिषे पुरुहूत शत्रून् त्वस्त्येवा जिमिश्व अणेतः ॥ अथ मरुतां ॥ शुची वो हव्या मरुतः शु

राम
११७

चीनांनृष्ठिरंमरुतोवीरवंतमावोहोताजोहवीतिसत्तः प्रचित्रमर्कंग्रणतेतुरायाराइवेदच
रमा अहेवयावःशर्मिशशमानायपांति॥ अथेंद्राग्न्योः॥ आवृत्रहणावृहहभिःशुष्मैराभ
रतंशिक्षतंवज्रवाहूउभावामिंद्राग्नीआहुवध्यैरुचिंनुस्तोमंनवजातमगीर्भिर्विप्राःप
मतिमिच्छमानाःअचर्षणिभ्यःपृतनाहवेषु॥ अथसवितुः॥ आदेवोयातुसवितासुरत्नः
सघानोदेवःसवितासहावेतिद्वेउदीरयकवितमंकवीनांभगंधियंवाजयंतः
पुरंधिमितिद्वे॥ अथवरुणस्य॥ अवसिंधुंवरुणोद्यौरिवस्थाद्रप्संसुतुभ्यंवरुणस्व
धावएवावंदस्ववरुणंवृहंतंतत्वायामिब्रह्मणावंदमानइतिद्वे अस्तभ्नाद्यामसुरोवि
श्ववेदाइत्येकादशिनाः॥ अग्नेनयेत्यादयोस्तभ्नाद्यामसुरइत्येवमंताअग्न्यादिदे
वत्याएकादशषडृचाआम्नाताः। तेष्वेकादशपरावोविहिताभवंति॥ तेषांसमाहा

श्रौ० हु० ११८

रुएकादशिनीत्युच्यते। तस्यां भवा ऐकादशिना इत्युक्ताः॥७॥ अग्नीषोमाविमं सु मे शृणुतं वृषणा हवं प्रति सूक्तानि हर्यतं भवतं दाशुषे मयः अग्नीषोमा यो अद्य वामिदं वचः सपर्यति तस्मै धत्तं सुवीर्यं गवां पोषं स्वश्व्यं अग्नीषोमा य आहुतिं यो वां दाशाद्धविष्कृतिं स प्रजया सुवीर्यं विश्वमायुर्व्यश्नवत्

रोचना नीत चावा वां मित्रावरुणा हव्य जुष्टिमायास्ते मित्रावरुणा सुशस्त्या नो मित्राव

रुणा हव्य जुष्टिं सुवं वस्ना णिपीवसा वसा साथे प्रवाहवा सिसृतं जीवसे नो यद्वं हिष्ठं ना

ति विधे सुदानू हिरण्यगर्भः समवर्तताग्र इति षट् प्राजापत्या श्चित्रं देवानामुदगादनी

कमिति पंच शं नो भव चक्षसा शं नो अह्ना वायो भूष शुचिपा उप नः सयाभियां सिदृश्वांस

मच्छा नो नियुद्भिः शतिनीभिरध्वरं पीवो अन्नां रयिवृधः सुमेधा रायेनुयं ज ज्ञतू रोद

सी मे प्रवायुमच्छा बृहती मनीषा तव वायवृतस्पते त्वां हि सुप्सरस्तममिति द्वे कुवि

दंग नमसा ये वृधास ईशानाय प्रहुतिं यस्त आनट् प्र वीरया शुचयो वायुर्स्थ युजं कृणुध्वमुत

त्वामदिते मह्यनेहो नउरुव्रजे दितेर्स्य जमिष्टसुत्रामाणं पृथिवीं द्यामनेहसं महीमू

राम

११८

षुमातरं सुव्रतानामदितिर्द्यौरदितिरंतरिक्षं न ते विष्णो जायमानो न जातस्त्वं विष्णो सुम
तिं विचक्रमे पृथिवीमेष एतां त्रिर्देवः पृथिवीमेष एतां परो मात्रया तन्वा वृधानेराव
ती हि भूत्वं विश्वकर्मन्हविषा वावृधान इति द्वे विश्वकर्मा विमना आद्विहायाः किंस्विदा
सीदधिष्ठानं यो नः पिता जनिता यो विधाता याते धामानि परमाणि यावमा य इमे द्या
वापृथिवी जनित्री तं नस्तुरीपमधपोषयित्नु देवस्त्वष्टा सविता विश्वरूपो देवत्वष्टर्यद्ध
चारुत्वमानड्पिशंगरूपः सुभरो वयोधाः अग्यमभाजं यशसं वयोधां सोमापूषणा जन
नारयीणामिति रूक्तमादित्यानामवसा नूतनेनेमा गिर आदित्येभ्यो घृतस्नूस्त आ
दित्यास उरवो गभीरा इमं स्तोमं सक्रतवो मे अद्यति स्रो भूमीर्द्धीरयं त्रीरुत द्यून्न दक्षि
णा विश्चिकितेन सव्या मही द्यावापृथिवी इह ज्येष्ठे ऋते दिवे तदवी वंपृथिव्या इति द्वे

प्र द्यावा यज्ञैः पृथिवी नमोभिरिति द्वे प्र द्यावा यज्ञैः पृथिवी ऋतावृधा मा नो रुद्रोतत
नो मयस्कृधीति द्वे आ ते पितर्मरुतां सुम्नमेतु प्र बभ्रवे वृषभाय श्वितीचे इति तिस्र आ
पश्चातान्नासत्या रथेनेति च तस्रो हिरण्यत्वङ्मधुवर्णो घृतस्नुरभिक्रत्वेन्द्र भूरध ज्मं
स्त्वमहाँ इन्द्र तुभ्यं ह क्षाः सत्राहणं दाधृषिं तुम्रमिन्द्रं सहसानुं पुरुहूत क्षियन्तं स्तुत इन्द्रो
मघवा यद्ध वृत्रे वा वस्व इन्द्रः सत्यः सम्राडु हा गवर्हत्यविचेतनानि पतंगो वाचं मनसा
बिभर्ति चत्वारि वाक्परिमिता पदानि यज्ञेन वाचः पदवी यमायन्निति द्वे देवीं वाच
मजनयंत देवा जनीयंतो न्वग्रव इति तिस्रो दिव्यं सुपर्णं वायसं बृहंतं सवा वृधेन
यी योषया सुपस्य व्रतं पशवो यंति सर्वे यस्य व्रतमुपतिष्ठंत आपः ॥ यस्य व्रते पुष्टिप
तिर्निविष्टस्तं सरस्वंतमवसे हुवेमेति ॥ अत्राष्टादश षळ्चा आम्नातास्तेष्वाष्टादशवो विदि

ताभवंति॥ तत्रान्यलिंगत्वात्प्राजापत्याइत्युक्तं॥ इतिपशवः॥ इत्येतद्याज्यानुवाक्या
लिंगकल्पितदेवताः पशवोस्मिंतन्त्रे विधीयंते। एते एकोनत्रिंशत्पशवः। निर्मितरोंकृाग्र
इत्यस्मिंश्लोके विधास्यते। तेन च सह त्रिंशत्पशवोस्मिन्नध्याये विहिताः तत्रैकादक्षिन
नांगणात्मकत्वाङ्गणएवाम्नातो नैकैकशः पशुस्तेषामेतदुक्तं भवति। एकादशिनीगणरूपेण
आम्नाता अग्नीषोमीयाद्यश्लोके कश आम्नाताः निरूढश्चाम्नाताः अन्ये च केचनास्मिंस्त
न्त्रे पशव आम्नातास्तेषु सर्वेषु पौर्णमासमेव तंत्रं। असमाम्नाते पृथक्कल्पनीयं तंत्रं॥ सौ
म्याश्च निर्मिताश्च॥ सौम्याः सोमांगभूता इत्यर्थः॥ निर्मिताः स्वतंत्रा इत्यर्थः॥ अस्मिन्खंड
के ये पशव आम्नातास्तेषां केचित्सोमांगभूताः केचित्स्वतंत्रा इत्यर्थः॥ निर्मितैंद्राग्नः॥
ऐंद्राग्नो निरूढो नामपशुः कर्तव्यः॥ अयमपि पशूनां प्रकृतिः॥ तेनांगभूतानामग्नीषो

मीयः प्रकृतिः॥ स्वतंत्राणां निरूढः प्रकृतिरिति। तेष्वेव पश्विष्टिर्नांगभूतेष्वित्येवमर्थं निरू
ढप्रकृतित्वाम्नानं। षाण्मास्यः सांवत्सरो वा॥ सोयं निरूढः षुषाण्मासेषु कर्तव्यः। संवत्स
रे संवत्सरे वा। अतोयं वीप्सावचनान्नित्योयं पशुरिति गम्यते॥ प्राजापत्य उपांशुसावि
त्रसौर्यवैष्णववैश्वकर्मणाश्चैतेषां तत्रोपांशुयाजविकारान्वक्ष्यामः॥ ऐष्टिके यूक्तो वि
कारः पाशुके षुतं त्रेधिदानीं विकार उच्यते। प्रैषादिरागुरस्थाने। आगुरो यत्स्वस्थान
नु स्वैष्टं नाम तत्प्रैषादेरपि भवति। उच्चैरिति कृत्स्नत्वे आगुरस्थान इति वचनमागुः परि
माणो द्विपद एव प्रैषादिशब्दवाच्य इति ज्ञापनार्थं॥ आद्युत्सत्कर इति चैतानि यथास्था
नमुपांशु एतानीति वचनमाद्यद्वादीनां सप्तानां ग्रहणार्थं। यथास्थानवचनं सर्वप्रैषपरिग्रहा
र्थं। चशब्दो विकारसमुच्चयार्थः॥ कस्यचिदुच्चैस्त्वविधानात्कस्यचिदुपांशुत्वविधानादन्यस्य

तंत्रस्वरत्वंभवति। तेनप्रधानो पांशुषुअदहादेरन्यद्दृष्टेर्भवति। तंत्रो पांशुषुप्रैषादेरन्यद्पांशु
भवतीतिसिद्धं॥ चासौत्रामण्यां। सौत्रामणीतिकर्मनाम। तस्यां विधिर्वक्ष्यतइतिसंबंधः॥
आश्विनसारस्वतैंद्राः पशवः॥ बार्हस्पत्यो वा चतुर्थः। ऐंद्रसावित्रवारुणाः पशुपुरोडाशाः॥
आश्विनसारस्वतैंद्राणामेतेऐंद्रादयः पशुपुरोडाशायथासंख्येनभवंति। बार्हस्पत्यस्यतु
स्वदैवतएव। अन्यस्याविधानात्। माजीयित्वापुर्वसुरानम श्विनेतिग्रहाणांपुरोनुवा
क्या। होतायक्षदश्विनासरस्वतीमिंद्रंसुत्रामाणं सोमानांसुराम्णां जुषंतांव्यंतु मदंतु सोमान्सु पिबंतु
राम्णो होतर्यजेति प्रैषाः। पुत्रमिवपितरावश्विनोभेति याज्या॥ मार्जनं चात्वालमार्जनं तत्कृ
त्वाग्रहैः प्रचरेयुः। तेचाश्विनसारस्वतैंद्राः। तेषामेता अनुवाक्याप्रैषायाज्या उक्ताः॥ याज्या
दीनां त्रिदेवतालिंगत्वात्तैः सहप्रचारः॥ अग्नेवीहीत्यनुवषट्कारः सुरासुतस्याग्नेवीहीति

वा॥ नानाहिवांदेवहितंसदस्कृतंमासंसृक्षाथां परमेव्योमनि। सुरात्वमसिशुष्मिणीतिसु
राम वेक्ष्याधोबाहू सोमएषइति सोमं॥ अवेक्षेतेतिशेषः। नानाहिवामितिकुंभीस्थां सुरा
मवेक्ष्य ततोबाहू अधोमुखौकृत्वा ग्रहपात्रस्थां सुरामवेक्षेत सोमएषइत्यनेनमंत्रेणा
क्रयणत्रिरात्रवासनद्रवीकरणपावनअग्रणोर्ध्वपात्रसंबंधात्सुरैवसोमशब्देनोक्ता॥
यदत्ररिप्तंरसिनःसुतस्ययदिंद्रोअपिवच्छचीभिः। इदंतदस्यमनसाशिवेनसोमंराजानमि
ह भक्षयामीतिमक्षजपः। भक्षयेदितिवक्तव्ये भक्षजपइतिवचनं पयोग्रहेष्वपिअस्यमंत्र
स्यप्रापणार्थं॥ प्राणभक्षोत्र॥ अत्रेतिवचनंसुराग्रहेष्वेवप्राणभक्षोभवति। पयोग्रहेषुप्र
त्यक्षभक्षभक्षएवेतिप्रदर्शनार्थं। अस्मिन्कर्मणिकेषांचित्पशुपुरोडाशानसंतिग्रहाएवते
षां पशुपुरोडाशकार्यंभवंतीति। अस्मिन्कर्मणिकेषांचित्पैषानसंतितत्रापिमेत्रावरुण

एवानुवाक्यां ब्रूयात्। यावद्वचनमपोद्यते इतरस्य प्रकृतिप्राप्तमेवावतिष्ठते। आदेशस्तु कर्तव्य एव। प्रैषे सतितत्रैवादेशस्य कृतत्वाद्याज्यायामादेशप्रतिषेधः कृतः॥ असतितस्मिन्याज्यायामादेशः कर्तव्य एव। केकिल्यां तु सौत्रामण्यां प्रयाजादीनां प्रैषाद्याः केचन तदर्थतयैवाम्नाताः॥ तत्रापि यावदाम्नातं तदेव ग्रहीतव्यं इतरत्सर्वं प्रकृतिप्राप्तमेवेति सिद्धं॥ ७॥ विध्यपराधे प्रायश्चित्तिः॥ प्रायश्चित्तिरित्यधिकारोयमाध्यायपरिसमाप्तेः॥ विधिशब्देन विहितमुच्यते॥ अपराधोन्यथाभावः अभावो वा॥ विहितस्याकरणे अन्यथाकरणे च प्रायश्चित्तिः कर्तव्या॥ प्रायो विनाशः॥ चित्तिः संधानं प्रायश्चित्तिरित्युक्तं भवति। विध्यपराधे प्रायश्चित्तिरिति वचनादपराधे सति तदर्थतया विहितमस्ति चेत्तदेव कर्तव्यं तन्नास्ति चेद्व्याहृतिहोमः कर्तव्यः॥ तस्माद्दैवे वयज्ञे प्रायश्चित्तिः क

र्तव्येतिवचनात्॥ विध्यपराध इतिवचनैर्विधिसंपादने प्रायश्चित्तिनीस्ति।यथा यदि वा
स्याग्निहोत्रमुपसंनेदित्यादावंतरागमननिषेधाद्वेषरे यजमानस्यांतरागमनं वि
हितं तस्मिन्नागमन इत्यर्थः॥ कालश्च प्रायश्चित्तानां नैमित्तिकत्वान्निमित्तानंतरं क
र्तव्यानीत्युत्सर्गः॥ शिष्टाभावे प्रतिनिधिः॥ शिष्टं विहितमित्यर्थः। तस्याभावे प्रतिनि
धिरुपादातव्यः॥ अभाव इत्येतावतेव सिद्धे शिष्टग्रहणं यत्कार्यार्थं तयापच्छिष्टं तस्य
स्वरूपसत्तायामपि तत्कार्याशक्तौ प्रतिनिधिरुपादातव्य इत्येवमर्थं॥ अर्थद्रव्यवि
रोधे अर्थो बलीयानित्ययमपि न्यायोर्थादत्रव्युत्पादितो भवति। इदं चापरं कार्य
सामर्थ्ये सति न गुणसंपादनार्थं उपादातव्य इति व्यतिरेकाल्लभ्यते॥ अत्रापि न्यायांत
रं व्युत्पादितं भवति। द्रव्यगुणविरोधे द्रव्यं बलीय इति। प्रतिनिधीयत इति प्रतिनि

धिः। एतदुक्तं भवति। यत्कार्यार्थं तया यद्विहितं तस्य तत्कार्याशक्तौ तस्य यत्प्रतिरूपं त
त्कार्यकरणायोपादातव्यमिति। अनेन प्रकारेण सदृशः प्रतिनिधिरुक्तो भवति।
न्यायादेवायमर्थो लभ्यते शिष्टाभावे प्रतिनिधिरिति वचनस्येदं प्रयोजनं प्रतिनिधि
प्रयोगेपि विहितस्य रूपाप्रचाराद्विध्यपराधशंकानिवृत्त्यर्थं। अतस्तत्र प्रायश्चित्तिर्न
कर्तव्या॥ विधिशक्तिरेव तत्रैवं रूपा विपरिणमते नात्र विध्यपराधोस्तीत्येवमर्थं सूत्र
प्रणयनं॥ अन्वाहिताग्नेः प्रयाणोपपत्तौ पृथगग्नीन येयुः॥ अन्वाहिताः अग्नयो य
स्य सोन्वाहिताग्निः इष्टिमध्यगत इत्यर्थः। तस्य प्रयाणोपपत्तौ पृथक् नयेयुः प्रत्यक्षं
चापृथग्गृहेणाम संसर्गार्थं। उपपत्तिवचनमनात्माधीनगमनसूचनार्थं। चौरव्याघ्रादि
भयात् क्षणमप्यत्र वस्तुमशक्यमिति यदि गमनमापद्येत तदेष्टिमध्येप्यनेन प्रकारेण।

ग्नीन्गृहीत्वा गंतव्यं अन्यथा कर्ममध्येन गंतव्यमित्येवमर्थं वचनं॥ तुभ्यं ता अंगिरस्त
मेति वाज्याहुतिं हुत्वा समारोपयेत्। एतामाहुतिं कृत्वा समारोप्य गंतव्यमित्यर्थः॥ प्रत्य
स्तनयन आहुति होमो नास्ति। समारोपणस्वरूपमाह॥ अयं ते योनिरृत्विय इत्यरणी
गार्हपत्ये प्रतितपेत्॥ पूर्वे एव द्वे अरणी गार्हपत्ये प्रतितपेत्॥ नाग्न्यंतरे। यदि दक्षि
णाग्निर्भिन्नयोनिस्स्यात् तस्यारण्यंतरेऽनेनैव मंत्रेण समारोपणं भवति॥ पाणी वा या ते
अग्ने यज्ञिया तनूस्तयेह्यारोहात्मात्मानमच्छा वसूनि कृण्वन्नस्मे नर्या पुरूणि यज्ञो भूत्वा यज्ञ
मासीद स्वां योनिं जातवेदो भुव आजायमान इति द्वौ पाणी गार्हपत्ये सकृदेव प्रतितपे
त्॥ द्वयोरपि समारोपणं यजमान एव कुर्यात्। पूर्वमंत्रस्य प्रत्यगाशीष्ट्वात्॥ उत्तर
स्य चात्मानमिति लिंगात्॥ कर्त्रंतरविध्यभावाच्च॥ एवमनन्वाहिताग्निः कृत्वा॥ स

मारोप्यगमनप्राप्तौ गच्छेदितिशेषः॥ अतोऽनन्वाहिताग्नेः प्रत्यक्षनयनं नास्ति प्रयाण
काले विहारदेशेपि यत्र क्वापि संचारयितव्ये अनुद्धृता संचारयितव्याः॥ अविहृत
स्य गार्हपत्यस्यैष नियमो विहृतानामपि सर्वेषां युगपन्नयनेपि भवति नैकैकस्य
नयने। अनसा नयमो नास्ति। अनेनैव प्रकारेणाग्नीत्सर्वदा नयेत्। अन्यथा नयनेऽग्नी
नां लौकिकत्वाशंका स्यात्॥ यदि पात्र्योररणी संस्पृश्य मंथयेत् प्रत्यवरोह जातवेदः
पुनस्त्वं देवेभ्यो हव्यं वहनः प्रजानन्। प्रजां पुष्टिं रयिमस्मासु धेह्यथा भव यजमानाय
शंयोरिति। अरण्योर्हस्तयोर्वा समारोपणमुक्तं तत्रावरोहणकाले यजमानः प्रत्यव
रोह जातवेद इत्येतं मंत्रमुक्त्वा मंत्रांते तयोररण्योरग्निं मंथयेत्। स्वयं वा मंथयेत्। एवम
रणीसमारोपणे। यदि हस्तयोः समारोपणं स्यात्तदैतेन मंत्रेणारणी संस्पृश्य मंथयेत्।

श्रौ० द०
१२५

यजमानो मंथनकाले यावदग्नेर्जन्म तावदरणीसंस्पर्शं न्वेवास्ते। मथ्यमानेऽग्नावुपघातो-
द्रनसमर्थः प्रयत्नो निष्फलः स्यात्तदा पुनरारंभावसरे मंत्र आवर्तयितव्यः॥ एवं व्यर्थे
व्यर्थे पुनः पुनरावर्तयेत्। अग्न्येवरोहणार्थं मरणीं मंथयेदित्येकोऽर्थः॥ यद्दिपाण्योः
समारोपणं तदैवमवरोहयेत्। पाणिभ्यामरणी अनेन मंत्रेण संस्पृश्य मंथयेदित्यपरो
र्थः॥ आहवनीयमवदीप्यमानमर्वीक् शम्यापरासादिदंत एकं परऊत एकमिति संव
पेत्। आहवनीयस्यैकशः समस्तो वायद्यायतनादुत्सृप्यार्वीक् शम्यापरासाद्वहिर्गा
छेत्तदात मिदंत एकमित्यायतने संवपेत्। ततः समस्ताभिव्याहृतिभिर्होमः कर्त
व्यः॥ अग्नीनां सर्ववेदसंबंधित्वात्॥ सर्वत्र विनष्टसंधानं द्विविधं। आयतना
दपगतस्य पुनः प्रक्षेपात्मकं द्वितीयं संधानं तत्रैव व्याहृतिभिर्होमाद्यती द्वितीयं॥ अतो

राम
१२५

यत्र यागो होमो जपो दानं दक्षिणारूपं चास्ति तत्रैरे वार्तौ द्रियसंधानांशाः सिध्यति।
यत्र त्वेषामन्यतमो नास्ति तत्र व्याहृतिहोमेनार्तौ द्रियांशसंधानं कर्तव्यं। आहव
नीयग्रहणादग्न्यंतरेनैतत्प्रायश्चित्तं। तत्र तूष्णीं प्रक्षिप्य व्याहृतिहोमः कर्तव्यः।
तस्य च विध्यपराधत्वात् दीप्यमानवचनं यावत्प्रायश्चित्तकालं जीवतरा वैतत्प्रा
यश्चित्तेन विस्फुलिंगमात्रे स्यात्येवमर्थं।। यदि त्वतीयाद्यद्यमावास्यां पौर्णमासीं वा
तीयाद्यदि वान्यस्याग्निषु यजेत यदि वास्यान्योग्निषु यजेत यदि वास्यान्योग्निरग्ना
न्व्यवेयाद्यदि वास्याग्निहोत्र उपस्तन्नेहविषि वा निरुप्ते चक्री व च्छ्वा पुरुषो वा विहार
मंतरियाद्यदि वाध्वेप्रमीयेते षिः।। उत्क्रंशस्या परासद्देशमनतिक्रांतस्य। अतिक्रांतस्ये
त्समुच्यते। यदि त्वतीयाच्छ्म्यापरासद्देशमित्यर्थः। यद्यमावास्यां पौर्णमासीं वा स्वका

च्छेऽकृत्वातीयात्॥ अन्यस्याग्निषु यागं कुर्यात्॥ अस्याग्निषु अन्यो वा यजेत॥ अ
स्याग्नीनन्यो वाग्निर्व्यवेयात्॥ यद्यग्निहोत्रद्रव्ये कुसेषु प्रसादिते दर्शपूर्णमा
सादिषु वाहवि षि निरुप्ते चक्रीवत्‌रथशकटादि श्वावा पुरुषो मनुष्यजातिः स
वाग्नीनां मध्ये नातिक्रामेत्॥ यदि वा यजमानो ध्वनि प्रमीयेत यस्मिन्नग्रामे आस
वे आसते तस्माद्ग्रामांतरे म्रियेते त्यर्थः॥ एतेषु निमित्तेष्विष्टिं कुर्यात्॥ अग्निः प
थिकृत्॥ तस्यामियं देवताग्निः पथिःकृद्गुणः॥ वेश्चा हि वेध्योअध्वन आ देवानाम
पिपंथामगन्मेति॥ अनड्वान्दक्षिणा॥ शकटवहनसमर्थो बलीवर्दोनड्वान्दक्षि
णा॥ व्यवाय्येत्वनग्निना प्राग्गिष्टिर्ग्रामांतरेणातिक्रमयेत्॥ अग्नि चक्रीवच्छ्‌पुरुषै

र्व्यवायेद्विष्टिरुक्तात्र्याग्निवर्जितैरन्यैर्व्यवाये गवातिक्रमणं भस्मराज्युदक

राजिभ्यां संतानमनुगमयित्वा प्रणयनमुपस्थानमिति विशेषः। स्वव्यवायेत्वयम
प्यपरो विशेषः। भस्मना शुनः पदं प्रतिवपेद्। एते पदार्था निमित्तानंतरमेव कर्तव्याः।
ततो वर्तमानं कर्म समाप्येष्टिः कर्तव्या दर्विहोममध्ये एष विधिः इष्टिमध्ये तु तदेवा
त्रमुपजीव्य तत्रैव प्रायश्चित्तं कार्यं। प्रागिष्टेरिति वचनं पूर्वोक्ता यो अपीष्टेः प्रागे
वैते पदार्थाः कार्या इत्येवमर्थं॥ भस्मना शुनः पदं प्रतिवपेदिदं विष्णुर्विचक्रम इति॥
शुनो यानि पदानि तानि भस्मना प्रतिवपेत्॥ पूरयेदित्यर्थः॥ प्रतिपदं मंत्रावृत्तिः॥
गार्हपत्याहवनीययोरंतरं भस्मराज्या उदकराज्या च संतनुयात्तंतुं तन्वन् रजसो
भानुमन्विहीति॥ प्रतिराजि मंत्रावृत्तिः॥ अनुगमयित्वा चाहवनीयं पुनः प्रणीयो
पतिष्ठेत॥ यद्दनेपूर्वं प्रहितं पदं हि ते सूर्यस्य रश्मीनन्वाततान। तत्र रयिष्ठामनुसं

नवैतांसं॥ नः सृजसुमत्यावाजवत्या॥ त्वमग्ने सप्रथा असीति च॥ सान्निध्यां संतानं
कृत्वाहवनीयमनुगमयेत्॥ ततः प्रणीयोपतिष्ठेत॥ यद्ग्ने पूर्वं त्वमग्ने सप्रथा असीति
चद्वाभ्यां च शब्दः पूर्वोक्तेद्वितिकारा भावात्त्वमग्ने सप्रथा असीत्यस्य पूर्वे मंत्रशेषाशंका
निवृत्त्यर्थः॥ इष्टेरपि स एव विहारः प्रायश्चित्तउत्पन्ने पूर्वप्रवृत्ता अग्नयो नापवृज्यंत
इति॥ अस्यार्थस्य साधनार्थमुत्तरं वक्ष्यति॥ अनुगमयित्वा चाहवनीयं पुनः प्रणये
दिति॥ अधिश्रमी तस्याभितस्याभिवान्यवत्सायाः पयसाग्निहोत्रं तूष्णीं सर्वं हुतं जुहु
यु रासमवायात्॥ पथिकृतं कृत्वा तस्मिन्नेव विहारे तूष्णीं धर्मकमग्निहोत्रं ना
मकर्मांतरमनेन विधीयते॥ तत्सर्वमग्निहोत्रवत्कर्तव्यं॥ सर्वहुतत्वं तु विशेषः॥ अतो
नात्र भक्षोस्ति॥ कालश्च सायंप्रातरेव॥ सांगं प्रधानं द्रव्यं धानेप्रजापतिध्यानं कर्तव्यं॥ अभि
तूष्णीं॥

वान्यवत्सानामान्यवत्सो नरोहनीया। अभिवान्यो वत्सो यस्याः सा अभिवान्यवत्सा॥ अ
भिवान्योभियाचनीय इत्यर्थः। आसमवायादिति। आशरीरस्याग्निसंबंधादित्यर्थः॥
यद्याहिताग्निरपरपक्षे म्रियेताहुतिभिरेनं पूर्वपक्षं हरेयुः॥ यद्याहिताग्निरपरपक्षे
मरणाशंका स्यात्तदा तस्यापक्षस्यावशिष्टा आहुतीः पक्षहोमन्यायेन हुत्वा मावास्यां च
कृत्वा कर्मभिरेवमेनं पूर्वपक्षं नयेयुः। आहिताग्निग्रहणमन्याऽप्यनाहिताग्नेरप
रपक्षाश्रिता यानित्याहुतयस्ताः सर्वा होतव्या इत्येवमर्थं। एष पूर्वाधिकृतानां काम्या
पकर्षो विधीयते। ते न जीवत एव मरणाशंकायामेतदिति गम्यते। मृतस्यानधिकारा
त् अत एव पूर्वसूत्रे अग्निहोत्रं नाम कर्मकर्मांतरमित्युक्तं॥ हविषां व्यापत्तावोल्का
सु देवतास्वाज्येनेष्टिं समाप्य पुनरिज्या। आवाहनादूर्ध्वं प्रधानयागादर्वाग्यदि हवि

श्रौ० वृ०
१२०

व्यापद्येत तस्य प्रधानयागादि सर्वमाज्येन समापयेत्। अव्यापन्नानि च यथापूर्वं समापयेत्॥ एवं समाप्यत तो व्यापन्नहविर्मात्रस्यैवाग्न्यन्वाधानादि पुनर्यागः कर्तव्यः॥ एवं द्वयोर्बहूनां व्यापत्तौ कर्तव्यं॥ हविषामिति बहुवचनमविवक्षितं। ब्राह्मणे च सर्वशब्दोऽस्य प्रायश्चित्तस्य सर्वहविःपुरापणार्थः। नैकस्मिं द्वयोर्वा प्रतिषेधार्थः॥ इष्टिग्रहणं प्रधानयागे कृते शेषकार्ये चाकृते हविषि व्यापन्ने आज्येन समापनं कुर्यादित्येवमर्थं। तत्र पुनर्यागो न भवति॥ व्यापन्नानि हवींषि केशनखकीटपतंगैरन्यैर्वा बीभत्सैः। अन्यैर्वा बीभत्सैरिति वचनात्केशादिभिरपि बीभत्सैरेवेति गम्यते। तेनाच्युतकेशनखसंसर्गे न दोषाय भवति। तथा कीटपतंगैरप्यमेध्यानिषासिभिः संसर्गः। अन्यैर्वा बीभत्सैरित्यनेन च वमनादीन्युच्यंते। एतैः संसर्गे हवींषि व्यापन्नानि।

राम
१२०

त्यर्थः॥ वीभत्सेरित्येतावतैवास्मिन्नर्थे सिद्धे केशादीनां पृथग्ग्रहणं केशादिसंसर्गे स्मृत्यु
क्तः शुध्युपायो यः स इह विभिन्नभवतीत्येवमर्थं॥ भिन्नसिक्तानि च॥ भिन्नानि च सिक्तानि
च॥ हवींषि दुष्टानि भवंति। कठिने शुभेदनं द्रवेषु क्षरणमिति॥ अपोभ्यवहरेयुः॥ दुष्टानि
हवींषि अप्सु क्षिपेदित्यर्थः॥ एषैषा प्रतिपत्तिः॥ प्रजापते न त्वदेतान्यन्य इति च वल्मी
कवपायां वा सान्नाय्यं मध्यमेन पलाशपर्णेन जुहुयात्॥ सान्नाय्यं दुष्टं मध्यमेन पला
शपर्णेन प्रजापतेदृत्यृचा स्वाहाकारांतया वल्मीकद्वारे प्रसिंचेत्॥ अप्सु वा तूष्णीमिति वि
कल्पः॥ मध्यमग्रहणं द्विपर्णस्य मा भूदित्येवमर्थं॥ विष्यंदमाने महीद्यौः पृथिवी च न
इत्यंतः परिधिदेशे निर्वपेयुः॥ द्विविधं विष्यंदनं सिक्तमसिक्तं च॥ सिक्तं दुष्टं भवति।
अन्यदुष्टं। यद्विष्यंदमानं कुंभीमतीत्याग्निं पृथिवीं वा प्राप्नुयात्। तत्सिक्तं भवति। दु

ष्टं च। तदेव यत्कुंभ्यां वह्निगमनमात्रेण विष्यंदते तदसिक्तमदुष्टं च। यद्विष्यंदने न दुष्टं तद्देवं
प्रतिपादयेतामहीधेरित्यनयर्चा। ततः परिधिदेशे निर्षिंचेत्। देशग्रहणं परिच्छ्यभावे पित
स्मिं देशे निनयनार्थं॥ अन्यतराद्दोषे व्यासिच्यप्रचरेयुः। अदुष्टेप्यातर्दोहे एतद्भवति। तत्पा
तर्दोहं व्यासिच्य द्वयोः पात्रयोः कृत्वा तयोरन्यतरत् तद्दधिभावायानच्यताभ्यां दधिपयो
भ्यां प्रचरेयुरित्यर्थः। अतएवादुष्टेप्यातर्दोहे इत्युक्तं॥ पुरोडाशं वा तत्स्थाने। पयसि दु
ष्टे एतदेव भवति। पूर्वोक्तस्यासंभवात्। ते न व्यवस्थितविभाषेयं। उभयदोषे ऐंद्राग्नं पं
चशरावमोदनं॥ सान्नाय्यद्वये दुष्टे पंचशरावपरिमितान्व्रीहीन्निर्वपेत्। ऐंद्राग्निदेवत्यो द
नसिध्यर्थं॥ तयोः पृथक्प्रचर्या॥ तयोरिंद्राग्न्योर्हविस्सत्त्वोसहोद्दिष्टयोरपि प्रचार
काले तस्मादेव हविषस्तयोः पृथगेव यागः कर्तव्य इत्यर्थः। तत्राग्निदेवतानां प्रथमं

यजेदिति श्रुतेः॥ अग्निमिष्ट्वेंद्रं यजेत्॥ ऐंद्रमेवेत्येके॥ एके ऐंद्रमेव पंचशरावमुत्साद्य प्र
चारेद् द्व्याग्नेयाः पृथकूप्रचारमाहुः॥ अत्राप्यग्निरेव प्रथमं यष्टव्यः॥ अस्य पक्षस्येयं श्रु
तिर्मूलं॥ यस्योभयं हविरार्तिमार्छेत्॥ ऐंद्रं पंचशरावमोदनं निर्वपेत्॥ अग्निं देवता
नां प्रथमं यजेदिति॥ अस्यां श्रुतावग्नियागस्यानुवादत्वेनापि संभवान्निरूप्य इंद्रा
येव यष्टव्यमिति केचित् सूत्रार्थं वर्णयंति॥ वत्सानां पाने वायवे यवागूं॥ सान्ना
य्यार्थमपाकृतानां वत्सानां पाने वायुदेवत्यां यवागूं निरूप्य तया यष्टव्यमित्यर्थः॥ स
र्वपाने एतस्याप्यश्चित्तं पीतशिष्टमेव हविषः पर्याप्तं चेद्व्याहृति होम एव॥ न यवागूः॥ यवा
ग्वा यागं कृत्वा पुनर्यागः कर्तव्यः॥ अग्निहोत्रमधिश्रितं स्रवदभिमंत्रयेत॥ गर्भं स्रवे
तमगदमकर्माग्निर्होता पृथिव्यंतरिक्षं। यतश्च्युतदग्नावेव तन्न्याभिप्राप्नोति निर्ऋति

परस्तादिति। अधिश्रितमग्निहोत्रं दुग्धं स्थालीमूलेनयदि स्रवति। तदनेनाभिमंत्रयेत्कर्मभिरिति॥१०॥ यस्याग्निहोत्र्युपावसृष्टा दुह्यमानोपविशेत्तामभिमंत्रयेत॥यस्माद्भीषा निषीदसि ततो नो अभयं कृधि। पशून्नः सर्वान्गोपाय नमो रुद्राय मीढुष इति॥उपावसृष्टा दुह्यमाने तु भयं विशेषणं वत्ससंसर्गोद्धा दोहनपरिसमाप्तेरितस्य प्राप्तार्थो यस्येति ब्राह्मणानुवादः॥अथैनामुत्थापयेदुदस्थाद्देव्यदितिरायुर्यज्ञपतावधात्। इंद्राय कृण्वती भागं मित्राय वरुणाय चेति। अथेति संबंधार्थो योऽभिमंत्रयते स एवोत्थापनमपि कुर्यात्। यजमान एवोभयं कुर्यात्। होमकर्तावेत्येवमर्थः॥अथास्या ऊधसि च मुखे चोदपात्रमुपोह्य गां ब्राह्मणं पाययेद्यस्यान्नं नाश्नीयात्तस्याश्नीयाद्वा वर्षं संवत्सरं वा॥ ऊधः स्तनप्रदेशः। अग्निहोत्र्या ऊधसि मुखे च समीप उदपात्रमुह्य

स्यततस्तां दुग्ध्वातत्पयो ब्राह्मणं पाययेत् यस्यान्नेयावज्जीवं न भोक्तव्यमायो भवेत् । यएत
त्पयः पिबति तस्यान्नं यावज्जीवं नाश्नीयादित्यर्थः । संवत्सरं वा नाश्नीयात् ॥ अत्रक
ल्पानां यावज्जीवमित्युक्तवानाचार्यः । संवत्सरं व्रतं नात्येतीति सामान्यानुवादात्संव
त्सरवचनं । अथशब्दः पूर्ववत् ॥ वाश्यमानायेयवसं प्रयच्छेत् त्वं यवसाद्भगवती हि
भूया इति ॥ एतदप्युपावसर्गादिदोहनपर्यंतमेव । वाश्यमानायेशब्दापर्यंत्ये । यवसो भक्ष्यः ।
शोणितं दुग्ध्वं गार्हपत्ये संक्षाप्यान्येन जुहुयात् । अत्रान्यवचनात्पूर्वत्रतां अन्यां वा पु
नर्दुग्ध्वा पयसैव जुहुयात् ॥ तत्रैवं ब्राह्मणं । अथैनां ब्राह्मणाय दद्यादिति । तद्दानं पूर्वसू
त्रोक्तेन पयसः पानेन विकल्प्यते । दानपक्षेन्यामेव दुग्ध्वा जुहुयात् ॥ मिन्त्रसिक्तं वाभिमं
त्रयेत समुद्रं वः प्रहिणोमि स्वां योनिमपिगच्छत । अरिष्टा अस्माकं वीरा मयि गावः संतु

श्रौ॰ सू॰
१३०

गोपताविति। स्थालीभेदेन विक्षिप्तं द्रव्यं भिन्नमित्युच्यते। विक्षेपात तद्दुष्टं भवति। सिक्त
मिति स्कन्नमुच्यते। स्कंदने च यावत्स्कन्नं तावन्मात्रं दुष्टं भवति न पात्रगतं॥ भिन्नसिक्तानि
चेति वचनात्तात द्भिन्नं सिक्तं च समुद्रमित्यनेनाभिमंत्रयेत॥ ततः अपोभ्यवहरेयुः। अपो
भ्यवहरेयुरित्यस्य वचनस्य प्रकरणविशेषाभावाद्व्यापन्नहविर्मात्रमेवास्य विषय इति भे
दने दृष्टामेवास्मिन्प्रकरणे सर्वावस्थे पयसि अन्येषु द्रव्येषु च स्कंदने पुनः पयसि वक्ष्य
माणत्वादिदमभिमंत्रणं द्रव्यांतरेष्वेवेति स्थितं। यस्याग्निहोत्र्युपावसृष्टा दुह्यमा
ना स्यंदेत सा यत्तत्र स्कंदयेत्तदभिमृश्य जपेद्यद्दद्य दुग्धं पृथिवीमसृप्तदोषधीरत्यसृ
पद्यद्वापः। पयो गृहेषु पयो अघ्न्यायां पयो वत्सेषु पयो अस्तु तन्मयीति॥ दोहनावस्था
यां पयसि स्कंने यद्दद्येत्यनेन अभिमृशन् स्कंनमभिमंत्रयेत। समुद्रं व इत्यनेनास्य तुल्य

राम॰
१३०

कार्यत्वात्।अत एव समुद्रं व इत्यत्राप्यभिमर्शनं कर्तव्यं स्कंनमभिमंत्रयेत दोहनावस्थायां
स्कंने एतद्भवतीत्येतावदत्र विवक्षितं। इतरस्तु ब्राह्मणानुवादः पयोलिंगत्वात्पयस्येवे
दं भवति॥ तत्र यत्परिशिष्टं स्यात्तेन जुहुयात्॥ अथ प्राप्तस्य विधानं शेषकार्यस्यापर्या
प्तावपि तेनैव होमः कर्तव्यः। शेषकार्यस्य भक्षादेर्लोपः स्यात्। अप्रयोजकत्वाद्द्रव्यस्ये
ति॥ अन्येन वाभ्यानीय॥ जुहुयादिति शेषः। होमापर्याप्ताविदं भवति॥ एतद्दोहनाद्या
प्राचीनहरणात्।मर्यादायामयमाकारः। उत्तरत्र तत्रेति वचनात्॥ दोहनवचनं पूर्वसूत्रे
स्कंदननिमित्तविशेषस्याविवक्षितत्वसूचनार्थं। आदिग्रहणमधिश्रिते पयसि स्कं
ने एतदेव प्रायश्चित्तं न ब्राह्मणोक्तं। अधिश्रितं स्कंदति वा विष्यंदते वेति। इदं तु द्रव्यांतरेषु
भवति॥ विष्यंदने तु पयस्यपीदमेव भवति॥ विष्यंदने अधिश्रिते अन्याभ्यानाम्नानात्तत्र

यत्परिशिष्टमित्यादिद्रव्यांतरेष्वपि साधारणं। अन्यस्यानाम्नानात्। उन्नीयाहवनीयंप्रतिहरणं प्राचीनहरणमित्युच्यते॥ प्रजापतेर्विश्वभृतितन्वंहुतमसीति तत्र स्कंनाभिमर्शनं। इदमपि पयस्यैव पूर्वैः पासंबंधितु। तत्रेति प्राचीनहरणे इत्यर्थः॥ शेषेण जुहुयात्॥ अंतरेणापि वचनं सर्वस्य वाप्रधानमात्रस्यैव वापर्याप्ते शेषे पौवहोमो युक्तः। उक्तत्वाद्व्यस्य वचनमिदानीं किमर्थं॥ अयमभिप्रायः। अस्ति चेत्शेषः सचहोमद्रव्यस्यापर्याप्तः। तथापि शेषेपौवमात्राहीनेनापि जुहुयादिति वचनं॥ पुनरुन्नीयाशेषे॥ स्रुग्गतस्याशेषे पुनरुन्नीय जुहुयात्। पुनरुन्नयने अयं विशेषः। प्राचीनहरणेपावतिगते स्कंनं भवति तावत्येवाध्वनि उपविश्य स्थालीमन्नेन प्राचीनीत्वा तत्रैव उपविष्ट उन्नयेत्। न स्वयं स्रुग्वाप्रत्यगाच्छेत्॥ आज्यमशेषे॥ स्थाल्यामपि यदा नास्ति

तदाज्यं गृहीत्वा तस्य यथासंभवं संस्कारं कृत्वोन्नीयतेन जुहुयात्॥ एतदाहोमार्थ॥ द्व
योरपि होमयोः प्रधानत्वात्। होमद्वयपर्यंतमेतदेव प्रायश्चित्तं भवति॥ वारुणीं जपि
त्वा वारुण्या जुहुयात्। विशेषाभावाद्येके च न वारुण्यौ भवतः। पूर्वहोमे प्राकृतमं
त्रस्यापवादो वारुणी। अनशनमान्यस्माद्धोमकालात् यजमानस्यैद न होमकर्तुः।
वौरुपी जपो वारुणाहोमो नशन नि त्तिएतत्त्रयं शेषेण जुहुयादित्यत्र मात्रापचारहोमे
पुनरुन्नीयहोमे आज्यहोमे च भवति। पुनर्होमं च गाणगारिः॥ एतेष्वेव त्रिषु पक्षे
षु गाणगारिः पुनर्होमं चेच्छति। आचार्यग्रहणं विकल्पार्थं पुनर्होमे पूर्वसमाप्य पु
नर्विहरणादि सर्वं क्रियते। निमित्तप्रयोगावृत्तिविधानात्॥ अग्निहोत्रं शरायत्समोषो
मुमितिद्वेष्टारमुद्दाहरेत्। अधिश्रितमग्निहोत्रद्रव्यं यदि शीर्य्येत तदा तद्द्रव्यं समोषामु

श्रौ० वृ०
१३२

मितिअभिर्मंत्रयेत॥अमुमित्यस्य स्थाने यजमानदेवदत्तनाम निर्दिशेत्॥अधिश्रितवि
शोषणांतत्रैवास्य संभवाच्छास्त्रांतरदर्शनाच्च॥विष्यंदमानं मही द्यौः पृथिवी चन इत्या
हवनीयस्य भस्मांते निनयेत्॥उद्वासिते विष्यंदिते एतद्भवति।अधिश्रिते तु ब्राह्म
णोक्तमेव॥सांनाय्यवद्धी भक्षो॥प्रजापत इत्यनयाध्यमेन पलाशवेन वल्मीके जु
हुयादित्यर्थः॥अभिवृष्टे मित्रो जनान्यातयति ब्रुवाण इति समिदाधानं॥अधि
केयं समित्।उत्तराहुत्यर्थस्याप्यभिवर्षणासंभवात्॥अतः पूर्वाहुत्याः प्रागपि
अस्मिन्निमित्ते सति निमित्तानंतरं समिदंतरमाधेयमेव॥यत्र वेत्थ वनस्पत इत्युत्त
रस्याआहुत्यास्कंदने समिदाधानमिति शेषः॥११॥प्रदोषांतो होमकालः॥प्रदोषो ना
म रात्रेः पूर्वश्चतुर्थो भागः।प्रदोषस्यांतः प्रदोषांतः।प्रदोषांतोंतो यस्य सः प्रदोषां

राम
१३२

ताः। प्रदोषांतांत इत्यर्थः॥ स सायंहोमस्य कालः॥ केषांचित्पंचमी षष्ठ्यो नाडिके प्रदोष
शब्देनोच्यते॥ तदंतो वा पंहोमकालः॥ संगवांतः प्रातः॥ यस्मिन्काले गावो वत्सैः सह
आसते स संगवः कालः। तावत्पर्यंतं प्रातर्होमस्य समयः। केचिदह्नस्तृतीयो भागः संग
व इत्याहुः। तदंतः संगवांतः। दशनाडिका इत्यर्थः। अस्तमित उदिते च विहितो होम
एतावति काले क्रियमाणो तीतकालो न भवतीति पुनः कालविधिः॥ तमतिनीय
चतुर्गृहीतमाज्यं जुहुयात्॥ कस्मिन्काले केन मंत्रेणेत्यत आह॥ यदि सायं
दोषावस्तर्नमः स्वाहेति। यदि प्रातः प्रातर्वस्तर्नमः स्वाहेति। अग्निहोत्रमुपसाद्य भूर्भु
वः स्वरिति जपित्वा वरं दत्वा जुहुयाम्॥ उपसादनवचनं क्रमार्थं। उपसाद्य जपं वरद
नं च कृत्वा समिदाधानादि पूर्ववत्। वरदानं यजमानं। वरशब्देन गौ जातिरुच्यते। तं वरं द

त्वा जुहुयादिति पूर्वकालतामात्रं विवक्षितं। नात्र व्यवधानं कर्तव्यं चाग्निष्टिश्च वारुणी क
र्तव्येत्यर्थः॥ समाप्तेऽग्निहोत्रहोमे तेष्वेवाग्निष्विष्टिः कार्या॥ उत्तरत्रानुगमनविधाना
त्॥ कृत्वा प्रातर्वरदानं प्रातःकालातिपत्तौ विशेषो वक्ष्यते। होमोत्तरकालं दूर्ध्वं ते
वरदानं कर्तव्यं॥ अनुगमयित्वा चाहवनीयं पुनः प्रणयेद्दिदिहि वक्ष्येम्य एधि माप्रहा
सीरमुं मामुष्यायणामिति॥ समाप्तेऽग्निहोमे आहवनीयस्यानुगमनं कृत्वा पु
नस्तमेवोद्धरेद्दिदिहि वक्षेम्य इति मंत्रेण माप्रहासीरमुं मामुष्यायणामिति पाठः क
र्तव्यः॥ अमुमित्यस्य स्थाने यजमाननाम द्वितीयया निर्दिशेत्। आमुष्यायणशब्द
स्य स्थाने गोत्रनाम॥ माप्रहासीर्देवदत्तं भारद्वाजमिति। पित्रादौ जीवति भार
द्वाजायनमिति वदेत्। दक्षिणाग्निश्चाग्निहोत्रिक एव। आहवनीयस्यानुगमनविधा

नात्॥ इदमनुगमनं कस्याहवनीयस्येति न विद्मः॥ आग्निहोत्रिकस्येति चेत् न। समाप्तेग्निहोत्रे तस्य लौकिकत्वादनाहवनीयत्वं। होमे कृते असमाप्ते च प्रयोगे अनुगमनमिति चेत्। तथा सति पुनः प्रणयनमदृष्टार्थं स्यात्। अथायमभिप्रायः। इष्ट्यर्थं विहतस्येति। तदा पुनः प्रणयेत्ततइष्टिरिति समन्वयो नोपपद्यते। अथायमभिप्रायः। समाप्तेग्निहोत्रे लौकिकस्य सतोनुगमनमेव कर्तव्यं नायतनाद्द्धिस्वाग इति

ति

तदाहवनीयामंश्रा ह्यो नोपपद्यते। अत एवं वदतः सूत्रकारस्यायमभिप्राय इति वर्णनीयं। यस्य चित्कर्मणोर्थाय विहृते ष्वग्निषु पात्किं चिदग्निसाध्यं नैमित्तिकमुत्पद्यते तस्य नैमित्तिकसहितस्य तएवाग्नयोमवेयुः। न पुनर्विहर्तव्य इति॥ ततइष्टिर्मित्रः सूर्यः। एते देवते। अभियोमहिना दिवं प्रसमित्रमतौ अस्तु प्रयस्वानिति। संस्थितायां

श्रौ०वृ० पत्न्यासह वाग्यतोग्नीञ्ज्वलतो हरन्नग्नीनुपासीत। समाप्तायामिष्टौ पत्नीयमौ जेमानौ य
१३४ त वाचौ भूत्वा ताने वाग्नीञ्ज्वलयन्तावनश्नन्तावहः शेषमुपासीयाताम्। उपासीत॥ पत्न्या
सहैवं कुर्वन्नग्नीनां समीप आसीतेत्यर्थः॥ द्वयोर्दुग्धेन वासेग्निहोत्रं जुहुयात्॥
वासो रात्रेः पूर्वश्च तुर्थो भागः द्वयोर्गवोर्दुग्धेन पयसा सायमग्निहोत्रे स्वकाले जुहुया
दित्यर्थः॥ अधिश्रिते न्यस्मिंद्वितीयमवनयेत्॥ अयमत्र विशेषः। एकस्या गोर्दु
ग्धं पयो धिश्रित्य तस्मिन्नेव पयसि द्वितीयं गोर्दुग्धमवनयेत्। तेन पयसा होमः
। ततो न्यो रूपवर्गः। प्रातरिष्टिः॥ ततः श्वोभूते पूर्वोक्ता इष्टिः कार्या॥ इयमपि प्रातःकाला
तिपत्तिनिमित्तेवा प्रातरिति कालविधानात् प्रयोगभेदः। ततो विहरणभेदो परान्न्या
रपि भवति॥ अग्निर्व्रतभृतो व्रतभृद्गुणोग्निर्देवतात्वमग्ने व्रतभृच्छुचिरग्ने देवां इहावह। राम
१३४

उपयज्ञं हविश्च नः॥व्रतानि बिभ्रद्व्रतपा अदब्धो यजा नो देवाँ अजरः सुवीरः॥ दधद्रत्ना
नि सुमृळीको अग्ने गोपाय नो जीवसे जीवसे जातवेद इति॥ एतत्प्रायश्चित्तं स्वस्वकाळे ए
व प्रणीतेष्वग्निषु होमकाळातिपत्तावस्यं तापदि अनुद्धृतप्रायश्चित्तं कृत्वा होमं कु
र्यात्॥ अनापदि मनस्वती होमेनानुद्धृतप्रायश्चित्तेन च सहितो होमः कार्यः॥ विहृतेष्वे
वाग्निषु अहुतेषु होमान्तरकाळप्राप्तावुपक्रान्तमेव होमं काळातिपत्तिप्रायश्चित्त
सहितं कृत्वा वर्तमानकाळीनमनुद्धृत्य प्रायश्चित्तसहितं कुर्यात्॥ अविहृतेषु काळा
न्तरप्राप्तौ मनस्वती होमं कृत्वातिपन्नस्य प्रतिहोमं च कृत्वा अनुद्धृत्य प्रायश्चित्तादि
पूर्ववत्॥ एवमनेककाळातिपत्तावपि द्रष्टव्यं॥ विहृतेष्वविहृतेषु चानेककाळातिपत्तौ
मनस्वती होमं प्रतिहोमं चावश्यं कुर्यात्॥ विहृतेष्वेवाग्निषु अविहृतेषु तु मनस्वत्यादि

श्रौ॰सू॰
१३६

दाघेवव्रातभृतीष्टंतंभवति॥ न त्विहाग्निरनुगम्यः। न त्विहाग्निरनुगम्यः। प्रातःका
लेऽयं विशेषः। अनुगमयित्वा चाहवनीयमित्येतंन भवति। तेनाग्निहोत्रार्थे
ष्वेवाग्निषु सायंहोमातं भवति॥ आहवनीये चेद्ध्रियमाणे गार्हपत्योनुगच्छे
त्स्वेभ्य एनमवक्षामेभ्यो मंथेयुरनुगमये त्वितरं॥ विद्यमान आहवनीये गार्ह
पत्यो यद्यनुगच्छेत्तदा स्वेभ्यो वक्षामेभ्य एनं गार्हपत्यं मंथेयुः। ततइतरमनुगमये
त्॥ आहवनीयं इत्यर्थः। गार्हपत्यशब्दादेव गार्हपत्यस्य सिद्धे नत्वस्यार्थमेन
मिति वचनं सर्वावस्थस्य गार्हपत्यस्यानुगमने मंथनेनैवोत्पत्तिः। एवं रूपाच्च से
ति ज्ञापनार्थो। नुशब्दाद्व्यसमर्थो घोत्पते। गार्हपत्यमनुगतं मंथनेनैवोत्पादयेत्॥
ध्रियमाण आहवनीयेयं विशेषः। तेनानुगमयेदिति। अवक्षामाभावे मंथनसमर्थो

राम
१३६

र्निकाष्ठानि। क्षामा भा वेभस्मना रणी संस्पृश्य मंथये दिती जज्ञेप्रथममेभ्योयोनिभ्यो

अधि जातवेदाः। सगायत्र्या त्रिष्टुभा जगत्या नुष्टुभा चदेवेभ्यो हव्यंवहतु नः प्रजान

न्निति। मंथनसमर्थक्षामा भा वेभस्मनारणी संस्पृश्य लेपयित्वा ततो मंथयेत्।

इतो जज्ञइति मंत्रेणा मंथयेदितिणिच्प्रयोगात्प्रकृते कर्मणि याक् तीसएवमंत्रं ब्रू

यात्। येकेचनसमथयेयुरित्येवमवगम्यते। अरणी मंथन एवायंमंत्रोनावक्षा

मसंथने। यद्युभयोरभिप्रेतःस्यात्पूर्वत्रैवमंत्रंब्रूयात्। अनुगमयेत्वितरमितिवत्।

तथा चनकृतं। तेपूर्वस्मिन्मंथने मंत्रोनास्तीति सिद्धं। अवरोहणमंत्रस्तूभयोरपि

भवति। अरणीगणस्थापितस्मिन्नेवसूत्रे विधातुमिष्टत्वात्॥ मथित्वाप्रणीयाह

वनीयमुपतिष्ठेताग्नेसम्राळभिषेराय एरमस्वसहसेद्युम्नायोर्जेपत्यायच। सम्राळ

श्रौ० सू०
१३७

सिस्वराळ सिस्वारस्वतौल्वोत्सौप्रावतामन्नादंत्वांनपत्यायादध्यइतिमथित्वेत्तिवच
नंद्रतो जह्नद्दत्तस्यप्रणयनमंत्रत्वशंकानिवृत्त्यर्थं ॥ अतएवैकेप्रणयंत्यन्वाहृत्यदक्षि
णं ॥ अत्रैव विषयेऽयंद्वितीयः कल्पः ॥ ध्रियमाणआहवनीयेगार्हपत्यानुगमने सति
अतएवाहवनीयाद्गार्हपत्यभूतादन्यमाहवनीयंप्रणयंत्येके । तथा सतिदक्षिणा
ग्निरप्यनुहर्तव्यः ॥ सहभस्मानं वागार्हपत्यायतनेनिधायाथप्रांचमाहवनीयमु
द्धरेत् ॥ इदमपिकल्पांतरं आहवनीयमुद्धरेदित्येतावतैवसिद्धेप्रांचमितिवचनंआ
हवनीयात्प्रत्यंचंगार्हपत्यंप्रणीयापिविहारसिद्धिरितिइदमपिकल्पांतरमितिज्ञापना
र्थं । एतेचत्वारः पक्षाः ब्राह्मणेसमुद्दिष्टाः तत्रनिंदाविध्यंतरस्तुत्यर्था । अतः सर्वेषां
कचिछारवांतरेविधानमस्तीतितांत्सर्वानुकर्तव्यतयासूचितवानाचार्यः ॥ सहभ

राम
१३७

स्मानमित्यस्मिन्पक्षे दक्षिणेन विहारं नीत्वा गार्हपत्यायतने निधानं। ततः इष्टिरग्निस्त

पस्वांजनद्वान्पावकवान्। एकात्र देवता। सेचाग्निस्त्रिभिर्गुणैर्युक्तः।। आयाहित

पसा जनेष्वग्ने पावको अर्चिषा। उपेमां सुष्टुतिं मम। आनो याहि तपसा जनेष्वग्ने पा

वक दीद्यत्। हव्यादेवेषुनोदधदिति। प्रणीतेनुगते प्राग्घोमात् इष्टिः। अग्निहोत्रार्थं प्रणी

त आहवनीयानुगते प्रायश्चित्तत्वेनेयमिष्टिः कर्तव्या प्राक्पूर्णाहुतिपक्षे पादेषैवेष्टिः

प्रायश्चित्तिर्भवति। उत्पत्तिस्तु ब्राह्मणोक्ता भवति। तदाहुर्यस्याग्निमनुद्धृतमादित्यो

भ्युदियाद्वाभ्यस्तमियादित्यादिष्टिरग्नयेपुरस्तात्यसापमुद्धरेद्धृतमन्वर्थ्यप्रात

रुद्धरेदित्युक्ता इयमेवोत्पत्तिरस्मिन्नवसरे।। प्रणीतो वा प्राग्घोमादुपशाम्येदि

तिवचनात्। अग्नावनुगते तराहुती इति वक्ष्येति।। उत्तराहुत्यां हुतायामनुगत्या तेः

प्रयोजनं नास्ति ॥ एवमग्निहोत्रेणिर्वाह इत्यस्मत्सूत्रानुसारेणमन्यामहे ॥ अग्निज्योतिष्मान्वरुणः द्विदेवते ज्योतिष्मानित्यग्नेर्गुणः ॥ उदग्ने शुचयस्तवाग्ने वृहन्नुषसामूर्ध्वो अस्थादिति । सर्वेष्वेदनुगतानादित्योऽभ्युदियादभ्यस्तमियाद्वाग्न्याधेयं पुनराधेयं वा । यदि सर्वेष्वग्निष्वनुगतेषु आदित्योऽस्तमुदयं वा गच्छेत्तदाग्न्याधेयं पुनराधेयं वा प्रायश्चित्तं भवेत् । अनयोरेव कालयोः शास्त्रान्तरे गार्हपत्याहवनीययोः द्वयोरेवानुगतावेतत्प्रायश्चित्तमुक्तं । तस्मिन्शास्त्रे दक्षिणाग्निर्भिन्नयोनिः । अत एवं विनिवेशः । एकयोनित्वे सर्वानुगमने भवति भिन्नयोनित्वे द्वयोरेवानुगमनेऽपीति । अत्राग्न्याधेयपुनराधेयाभ्यां सेष्टिके ते गृह्येते । अग्न्युत्पादकत्वसामान्यात् । एतदर्थमेवाधानाद्द्वादशरात्रमित्यत्र सेष्टिकेऽग्न्याधाने आधानशब्दप्रयोगः संव्यवहारार्थं

कृतः। तस्मिन्काले सर्वदा सर्वदा सर्व एवाग्नयो विहृता एव प्रायेणासते। तत्र केवल
गार्हपत्यानुगमनेमंथनेनोत्पाद्य तदपस्तीकार्येत्युक्तं। दक्षिणाग्न्यनुगमनेपि स्व
योनितो विहृत्य सेवेष्टिः कार्या॥ आहवनीयमनुगमनेपि प्रायश्चित्तविशेष उक्तः।
द्वयोर्द्वयोरनुगमनेताम्येव यथासंभवं कर्तव्यानि। अतः सर्वानुगमनं इदं मवशि
ष्यते। अतः सर्वशब्दा विवक्षया मा पिनैमित्तिकस्य स्वभावर्यो पिलोचनया सर्वानुग
तावेवैतद्भवतीति मंतव्यं। एकयोनित्वेभिन्नयोनित्व उक्तो विनिवेशः। उभयोर
नुगनेपि विधीयमानस्याग्न्याधेयस्य सर्वोत्पादकस्वभावात्यागात्तद्विधान
सामर्थ्याद्देवानष्टोपि दक्षिणाग्निर्नष्ट इति गम्यते। विहृतेष्वेवं भवति। अविहृ
तेष्वपि किं गार्हपत्यानुगमने सर्वानुगमोस्ति न वा अस्तीति ब्रूयात्। तत्र हि स

श्रौ० वृ०
१३९

वेंग्नयः समवेता इति गम्यते ॥ ततो विहरणादर्शनात् । कथं तत्र समवायः ॥ अंगारस
मवायस्तावं नास्ति । कर्मार्थं ह्यकृतानां कर्मसमाप्तौ तत्रैवानुगमनदर्शनात् ।
अयथायमभिप्रायः । अंगाराश्च ये ये दक्षिणाग्न्याहवनीयाख्याः । शास्त्रगम्याः
सकर्मसमाप्तौ गार्हपत्यांगारानानुप्रविशति । अन्यथा तत उद्धरणविधानं नोप
पद्यते । तत्संसर्गे संसर्गदोषश्च नास्ति । अंगारसंसर्गो हि सः । तथा च शास्त्रांतरेव च
नं । यदि पूर्वोनुगतः स्यं चर्यपश्चाद्विसतार्हिगत इति । एवमपि न युज्यते । अविहृता
वस्थायां गार्हपत्ये गार्हपत्यं प्रज्वल्येति सूत्रयोगात् । तथा च शास्त्रांतरे सूत्रका
रप्रयोगो मंत्रवर्णप्रयोगो दृश्यते । गार्हपत्यमभिमंत्रयते सु गार्हपत्य इति । तेना
व गम्यते तत्रानुप्रवेशोऽग्न्यंतरस्य नास्तीति । यत्तु नः पश्चाद्विसतार्हिगत इति । तद

राम
१३९

प्यन्यपरं यदि हि सर्वदानुगतस्याहवनीयस्य गार्हपत्यात्प्रणयनेनैवोत्पत्तिः स्या
त्तदैवैतल्लिंगमनुप्रवेशस्य। तत्र हि शास्त्रे मंथनादप्युत्पत्तिरुक्ता। अतोस्यायम
र्थः। यस्मिन्ननुगमने गार्हपत्यात्प्रणयनेनोत्पत्तिरुक्ता तदानुगतेंतरा संचरणम
विरुद्धं मंथनोत्पत्त्याद्यनुगतेप्यंतरा न संचरितव्यमिति। अतोन्यपरत्वादेवास्य वा
क्यस्यानुप्रवेशे लिंगं न भवितुमर्हति। अतस्तत्र समवायः प्रत्यक्षेण शास्त्रेण वा
लक्षयितुं न शक्यते। कथं तर्हि तत्र उद्धृत आहवनीयादिर्भवति। वचनगम्यो हि
सः। वचनमेवं भवति गार्हपत्यं प्रज्वल्य दक्षिणाग्निमुद्धृत्य गार्हपत्यादाहवनीयं ज्व
लंतमुद्धरेदिति। तेनाधिकृतेन पुरुषेण तं नियुक्तेन वाग्निहोत्राद्यर्थं स्वकाले यथो
क्तेन विधिना य उद्ध्रियते स एवाहवनीयादिर्भवति। नान्यथा। अन्यथा

चेदुध्रियते तदा समोप्यतमग्निं विक्षेपणायश्चित्तं कर्त्तव्यं नान्यत्। अभ्युदितेष्टौ तु
वचनान्मध्योद्धृतोप्याहवनीयादिर्भवति॥ एवं तर्हि किमंतराळकाळे क्वासौ तिष्ठति।
वयमपि न जानीमः। क्वासौ तिष्ठतीति। एतावद्ज्ञावगंतुं शक्यते। सर्वेक मथिमन्न
य आहिताः तत्र गार्हपत्यो यावज्जीवं धार्यते वचनात्। इतरौ तु कर्मणि कर्म
ण्युद्ध्रियेते। गतश्रियः सर्वे धार्यंते वचनादेव। नान्यदितो वगंतुं शक्यते। एवं सति
कर्मापूर्वं वर्त्तिष्ठति। तथाग्न्यागादि जनितान्यपूर्वाणि यावत्फलभोगसंबंधं तिष्ठं
ति तथाहवनीयादिरपि तिष्ठतीति। अतो नुद्धृतेषु गार्हपत्यानुगमने सर्वानुम
गनं नास्तीति त्राग्न्याधेयं पुनराधेयं वा न कर्तव्यमिति सिद्धं॥ समारूढेषु चा
रणीनाशे॥ अग्निष्वरण्योः समारूढेषु सत्सु अरण्योर्नाशे अग्न्याधेयं पुनरा

धेयं वा कर्तव्यं। अन्यतरारणीनाशेपि भवत्येतत्प्रायश्चित्तं। तयोरेकैकस्याएवका
र्यविशेषे नियमाज्ज्यापातिसंस्तुतत्वाच्च। नन्वरणीनाश इति शब्द एकस्यामप्य
नष्टायां प्रवर्तत इति। सत्यमसौ शब्दो न प्रवर्तते तथापि मंथन पदार्थो नैकयासंपा
दितुं शक्य इति। अनष्टापि नष्टैवेति कृत्वोक्तं। यदि परमनष्टामेव द्विधा कृत्वा मंथ
नसिद्धिरिति॥ तथापि नैव वक्तुं शक्यते। उपादानकाळे अरणी आहरेदिति द्व
योरुपादानमदृष्टार्थं स्यात् इति युक्तं कार्ये भेददर्शनादिति। एवं सति उर्वशी पुरूरवः सं
स्तुतिरधरोत्तरयोररण्योः श्रूयमाणा चोपपन्ना भवतीति युक्तं॥ १२॥ अथाग्नेय्य इ
ष्टयः। अथानंतरं या वक्ष्यंते ता अग्निदेवत्या इष्टय इति वेदितव्यमित्यस्य सूत्र
स्यार्थः॥ यान्यत्र चतुर्थ्यंतानि पदानि तान्यग्नेर्गुणवाचकानीत्यर्थः। एतेनावग

म्यते सर्वत्र चोदितेवद्देवताचोदनायां सत्यां असत्यां तु चोदनायां याज्यानुवाक्या
लिंगादवगंतव्या देवता॥ गुणस्तु चोदनात एवावगंतव्यः। कथं तर्हि वैश्वानरपार्ज
न्यायां वैश्वानरस्याग्नेर्गुणः। तयोरेव याज्यानुवाक्ययोस्तत्प्रवेशात्। अत्र हि
वैश्वानरस्यैवाग्निगुणत्वं चोदितमेवेति॥ व्रतानि पत्तौ व्रतपतये॥ यस्मिन्क
र्मणि यानि चोद्यंते व्रतशब्देन धर्मशब्देन वा तत्र तेषामतिपत्तौ एषेष्टिः कार्या॥
साग्ना वग्निप्रणयने ग्निवतो। निवृत्तिकर्मणा अनिवृत्तकर्मणा वा विनाः सहिते आ
हवनीयायतने यद्यन्यो ग्निराहवनीयार्थं उद्ध्रियते तमग्निमनिधायैव स्मरति
चेदायतनस्थमुद्धृत्य इदानीमुद्धृतं निदध्यात्। तथा सतीष्टिर्न भवति। एतस्मिन्नपि
पक्षे यद्यनपवृत्तकर्मोद्धृत्येत तदाव्याहृतिहोमः कर्तव्यः। अपवृत्तकर्मा चेन्न किंचि

दपि प्रायश्चित्तं विद्यते। अथ यस्मात्त्येव तस्मिन्पूर्वप्रणीते निदध्यात्तदा इयमिष्टिः का

र्या ॥ क्षामाय पावकाय दाहे शुचये संसर्जनेऽग्निनान्येन ॥ अन्य इति शवाग्निरुच्यते। मिथश्च

द्विविचये ॥ गार्हपत्यदक्षिणा ग्न्योः संवेद्धौ द्वौ वा परस्परं य दि संसृज्येरन्तदा विविचय इष्टिः का

र्याः ॥ गार्हपत्याहवनीययोर्विहृतये ॥ पूर्वस्या यमपवादः ॥ ग्राम्येण संवर्गीय। ग्राम्यः पच

नाग्निः। वैद्युतेनाप्सुमते विश्वानरा यविमतानामंनभोजने। विमता विमनस्काः श त्रु

वद्वृत्त्यर्थः। द्विषदन्नं यद्याहिताग्निर्भुंजीत तदा वैश्वानरी येष्टिः कार्या। एषैव कपाले

नष्टे नुद्वासिते ॥ केषांचिदध्वर्यूणां पुरोडाश श्रपणानंतरमेव कपालोद्वासनं वि

हितं। केषांचित्कर्मसमाप्तौ। केषांचिदनुद्वासनमेव। तत्र पूर्वपक्षयोरनुद्वासि

ते नष्टे एषेष्टिर्भवति। अनुद्वासनपक्षेऽपि प्रयोगमध्ये भवति। प्रयोगसमाप्तौ नभ

श्रौ०वृ०
१४२

वतिविध्ययरा धामा वा त्। त्रम्याश्चाविते वा ॥ येषांम्प्रयाणानंतरमुद्वासनं
तेषामनुद्वासिते कपाले सत्याश्चावणेकृते येखेष्टिः कर्तव्या ॥ सुरभय एव
यस्मिंजीवे मृतशब्दः। यस्मिन्नाहिताग्नौ जीवमृत इति यदि शब्दः संजायेत तदा
इयमिष्टिः कार्या। एवशब्दो गुणानियमार्थः। सुरभय एव न सुरभिमत इति ॥ तेनान्यत्र गुणा
तरसंबंधोऽप्यभ्युपगतो भवति। यथाश्यामायशाम वर्तेवत्येवमादि ॥ त्वमग्ने व्रतपा अ
सि यद्वोवयं प्रमिनाम व्रतान्यग्निनाग्निः समिध्यते त्वं ह्यग्ने अग्निना अग्ने त्वमस्म युयोध्य
मीवा अक्रंदग्निः स्तनयन्निव द्यौर्वृति विष्वग्वात जूतासो अग्ने त्वामग्ने मानुषीरीळ
ते विशो गत्र आया हि वीतये यो अग्निं देववीतये कुवित्सु नो गविष्टये मा नो अस्मिन्म
हाधनेष्व ग्ने सप्तिष्ट वषट्कृते दिविजा अस्य ग्निर्हंतान्यसी दघ जीयां स्ताधीमक

राम
१४२

दैववीर्तिनो अंघेति ॥ यस्य भार्या गौर्वा यमौ जनयेदिमौ द्विसीतः । मरुतो स्यमिष्टौ देवता ॥
सान्नाय्य पुरस्ताच्चंद्रमसाभ्युदिते ग्निर्दोतैद्रः । अग्ना ताविष्णुः शिपिविष्टः ॥ सान्नाय्य प्र
त्वेनामावास्यं कर्मोच्यते । तस्मिन्नारब्धे सति चंद्रमा यद्धि पुरस्तादभ्युदियात् एतामि
ष्टिं कुर्यात् । अस्यां अमावास्याविवारत्वात् आयष्छित्तेष्टी नायो धर्म उपांशुत्वं वार्चघ्ना
ज्यभागता च न भवति । एकदेशविकृतमनन्यवद्भवतीति । वृधन्वंतावित्यादयो मावास्या
धर्मा एव भवंति ॥ अकाले मावास्या कर्मण्यारब्धे सत्यकालो यमिति ज्ञाते तामेवामावास्यां
देवताभिर्विकृतां समापयेत् । अत्र काले प्राप्ते पुनर्योगो स्ति नास्तीति अत्राध्वर्युभिः सहति
श्चर्यः । दाताग्नेर्गुणाः ॥ प्रदातेंद्रस्य शिपिविष्टौ ॥ अग्ने दाता शुबेरा यंस्तर्यं ताविप्र एवं बा
दीघिस्ते अस्त्वंकुशो भद्रा तेहस्तासु कृतो तपाणी बध्दे विष्ण वास आ कृणो मि प्रतत्ते अ

श्रौ॰ वृ॰
१४३

च्छिष्टिविशिष्टनामेति॥ अपिवा प्रायश्चित्तेष्टीनां स्थाने तस्यै तस्यै देवतायै पूर्णाहुतिं जु
हुयादिति विज्ञायते॥ प्रायश्चित्तप्रकरणे याइष्टयः दृष्टा आदितेनैव चोदितेयाश्च ब्राह्मणोक्ता
स्तासामयं वैकल्पिको विधिरुच्यते। यास्तासामिष्टीनां देवतास्तासामेकैकस्यै देवतायै ए
कैकां पूर्णाहुतिं जुहुयात्। द्वादशगृहीतेन स्रुचं पूरयित्वा यद्धूयते सा पूर्णाहुतिरु
च्यते। अयं पुनरुपक्रमः तद्दर्शपूर्णमासयोर्भवति। दर्विहोमेष्वेव च॥ नान्यत्र भवति॥
हविषां स्कन्नमभिमृशेत् देवाञ्जनमगन्यज्ञस्ततस्य मा अशीरवतु वर्द्धतां। भूतिर्घृतेन
मुंचतु यज्ञो यज्ञपतिमंहसः भूपतये स्वाहा भुवनपतये स्वाहा भूतानां पतये स्वाहा॥ य
ज्ञस्य त्वा प्रमयोन्मयाभिमयाप्रतिमया पाहि स्वस्कन्दमिति॥ देवाञ्जनमित्यादिना स्कन्दे
त्यन्तेन स्कन्नमेद्रुविरभिमृशेत्। आहुतिश्चेद्धविष्परिध्याग्नी धारणां जुहुयात्। या

राम
१४३

हिकूयमानाद्हुतिर्वर्हिष्यरिधिस्कंदेत्तदातस्यास्कंनाभिमर्शनेकृते तत आग्नीध्रस्तामा
दायतत्स्त्रीवैमेजुहुयात् । हुतवते पूर्णपात्रं दद्यात् । होमं कृतवते । आग्नीध्रायतत्स्थानी
मेवयेनकेनचिद्द्राव्यरसादिनापूर्णपात्रं दद्यात । देवते अनुवाक्ये याज्ये वा विपरिह्य
त्याज्ये अवदाने हविषी वा ॥ यद्वो देवा अतिपातयानि वाचा च प्रयुती देव हेळनं । अ
रायो अस्मां अभि दुछुनायते न्यत्रास्मन्मरुत स्तांनि धेतन स्वाहे त्याज्याहुतिं हुत्वा
मुख्यं धनं दद्यात् । देवताविपर्यास आवाहनादिषु व्युत्क्रमः । अनुवाक्याविपर्यासो न्य
दीयामन्यस्यानुब्रूयात् । एवं याज्याविपर्यासः । आज्यविपर्यासो जौहवौपभृतयोरि
त्यादि । अवदानविपर्यासः पूर्वार्द्धात्पूर्वमित्यादि । हविर्विपर्यासो निर्वपणादिषु व्यु
त्क्रमः । यागे चान्यदीये नान्यस्य यागः । एतेषु सर्वेषु यद्वो देवा इत्याहुतिं कृत्वा स्वगृहेष्य

श्रौ० द्व
१५४

त्प्रधानभूतं द्रव्यं तद्धोमकर्तृब्राह्मणेदद्यात्प्रजमावः ॥ हुत्वेत्यत्रमानकर्तृत्वम विवक्षितं । याज्यानुवाक्ययोस्तु तस्मिन्कर्मण्यविहितयोस्तद्देवत्ययोरन्यदेवत्ययोर्वा विपर्यासे सति यागात्प्रागेवभ्रेषज्ञाने सति प्रायश्चित्तं कृत्वा पुनर्विहिते एवानूच्य यष्टव्यं । कृते तु यागे अनुवाक्याविपर्यासज्ञाने प्रायश्चित्तमेव न पुनर्यागाभ्यासः ॥ याज्यायामप्यविहितायां तद्देवत्यायां विहितदेशं कृत्वा विहितामेव देवतां ध्यायन्न्यग्द्विवषट्कुर्यात्तदापि नाभ्यासः ॥ अन्यदेवत्यायामपि आदेशध्याने विहितविषये स्यातां चेत्तदापि नाभ्यासः अतोन्यथा चेद्यागावृत्तिः कार्या । यागविषयेपि हविर्विपर्यासे यागावृत्तिशंका नैव कर्तव्या । कृतत्वाद्यागस्य एतद्विलक्षणं यागस्य देवतोद्देशेन स्वद्रव्यत्यागो यागइति देवताता वद्विहितैवास्मिन्कर्मणि द्रव्यमपि स्वमेव । अथायम

देर

राम०
१५५

भिप्रायः। अन्यस्यै संकल्पितत्वात्तत्त्वमपगच्छतीति। एवं चेत्तस्या अपि देवतायै यष्टुं न शक्य
ते स्वत्वाभावात्। अथ संकल्पनकाल एव यागः क्रियते इति। सुतरां विपर्यासे यागो नावर्त
यितव्यः। यागस्य वैगुण्यात्। तस्माद्यथा संकल्पकरणमेवात्रापराधो न यागासि
द्धिरिति। यदि पुनराग्नेयनाग्नीषोमीययागे कृते ऽग्रे सोत्साये तदाग्नीषोमीयेणाग्नेयः
कर्तव्यः। संनिहितत्वात्तस्य द्रव्यस्य कार्यस्य चाभावात्। तस्मिंस्तु संनिहिते सति स्वद्रव्ये
द्रव्यांतरोपानमशक्यमिति। तस्मादेवं कृत्वा प्रायश्चित्तमेकुर्यात्। अत्र व्याहृतिहोम
श्च कार्यः॥ एतद्विपर्यासे तत्रितद्रत्नत्रे त्तं। स्थानिनीमनावाह्य देवतामुपोस्थाप्यावाहये
त्। यस्मिन् कस्मिंश्चित्कर्मणि यष्टव्या देवतामनावाह्येवोत्तरं कर्म कुर्यात्तदा यावति ग
ते स्मरति तद्देवोत्थाप्यावाहयेत्। वर्तमानावधिस्वरेण नमं द्रेणाय दिमं द्रेणैव स्याद्दुपो।

औ॰कृ
१५८

स्थानंनविरुध्यात।तस्याप्यावाहनधर्मित्वत्तस्मादुपोत्थानविध्यानान्नमंदूत्वनियमः।
अवधिस्वरएवेतिसिद्धं॥मनसेत्येके॥आज्येनास्थानिनींयजेत्॥यद्यस्थानिनीप्र
मादादावाहयेत।तदातस्मिन्नेवक्रमेतांयजेत्॥निगमेषुचानिगमयेत्।यजेदिति
वचनंतद्देवत्योयागएवायंनाहुतिहोमइत्येवमर्थं॥१३॥हविषिकुःष्टेतेचतुःशरा
वमोदनंब्राह्मणा।न्भोजयेत्।यदाहविरपक्कंभवतितदातेनैवहविषातत्कर्मस
मीप्यचतुःशरावपरिमितव्रीहिभिरोदनंपक्त्वाचतुरोब्राह्मणान्भोजयेत्॥क्षा
मेशिष्टेनेष्ट्वापुनर्यजेत॥एकदेशक्षामस्याशक्यपरिहारत्वात्प्रायश्चित्तंनभवति।
यदापुनरदग्धंकिंचिदस्त्यवदानेभ्योनपर्याप्तंचतदेतत्प्रायश्चित्तंभवति॥अशेषे
पुनरावृत्तिः।हविष्यपशेषेदग्धेपुनरावृत्तिःकार्या।पुनर्यागपुनरावृत्त्योरयंविशे

राम
१५८

षः॥ वर्तमानं प्रयोगं समाप्य पुनरभ्यादितएवारभ्यांतात्क्रिया पुनर्योगः। पुनरावृत्ति
स्तु वर्तमान एव प्रयोगे नष्टस्य हविषः पुनरुत्पादनमिति। पुनरावृत्तौ तु पुनरुत्पादि
तेन हविषा स एव प्रयोगः समापयितव्यः। अयमनयोर्विशेषः॥ प्रागावाहनाच्च दोषे॥
पुनरावृत्तिप्रसंगात् सूत्रत्रयमारभ्यते। आवाहनात्प्राग्घविर्दोषे सति पुनरावृत्तिरे
व। अप्यत्यंतं गुणभूतानां॥ गुणभूतानामत्यंतमपि पुनरावृत्तिरेव। अत्यंत
मित्याकर्मपरिसमाप्तेरित्यर्थः॥ प्राकृस्विष्टकृत उक्तं प्रधानभूतानां॥ यत्तु नह
विषां व्यापत्तावित्युक्तं तत्प्रधानहविषामेव स्विष्टकृतश्च प्रागेवेति चोभयमनेननि
यम्यते। तेनात्राप्यंगानां पुनरावृत्तिरेव॥ अवदानदोषे पुनरापतनाद्वदानं॥ प्रसक्ता
नुप्रसक्तमिदं॥ मध्यात्पूर्वार्धाद्गृहीतस्यावदानस्य दोषे सति तस्य हविषो मध्या

श्रौ० सू०
१४६

पूर्वार्धाभावात्तद्द्रव्यसदेवेतिमन्यमानः प्रधानहविषश्चैदात्येनेष्टि मित्यादि कर्त
व्यं। अंगहविःष्वेत्सु नरा वृत्तिरेव। मध्यपूर्वार्धयोरेवसाधनत्वेनोपसंहारादितियो व्य
वतिष्ठते। तस्योत्तरमिदं सूत्रं। ऽध्यवदानदौषेषु नरध्यवदानापतना। मध्यात्पू
र्वार्धाद्वेवावदातव्यं आपेक्षितत्वात्तयोः शब्दयोरिति। चतुर्मुष्ट्यादिभिर्वृहिभिः सं
पादितं हविः सर्वयागार्थमेव। तत्रध्यवदानेन यागसिद्धौ सत्यां तादर्थ्यं तत्रोपसंहृ
तं भवेत्। यत्कार्यार्थं यदुपादीयते तस्य तत्कार्यीकरणे तत्प्रतितादर्थ्यं नापैति।
अतस्तादर्थ्यानपायात्तैनैव हविषा यष्टव्यमिति सिद्धं॥ द्वेष्टे त्विह दक्षिणां दद्यात॥
प्रकृतमनुसृतं। क्षामेष्टेर्णिनेष्टत्वे तस्मिन्प्रयोगे या दक्षिणा सा द्वेष्टदातव्या॥ न त्विंगम्य
इत्यर्थः॥ दक्षिणादानउर्वरां दद्यात॥ सर्वार्थमिदं सूत्रं॥ सर्वेषु कर्मसु विहितदक्षिणा

दानेउर्वरांदद्यात्। सस्यसंपन्ना भूमिरुर्वरेत्युच्यते॥ कपालं भिन्नमनपवृत्तकर्मगा
यत्र्यात्वाशताक्षरया संदधामीति संधायाप्स्ववहरेयुरभिन्नो घर्मोजीरदानुर्यत
आर्तस्तद्गन्तु नः। इध्मो वेदिः परिधयश्च सर्वे यज्ञस्यायुरनुसंतरंतु। त्रयस्त्रिंशत्तं
तवो या न वितन्वत इमं यज्ञं स्वधया ये यजंते। तेभिश्छिद्रमपि दध्मो यजत्र स्वाहा य
ज्ञो अप्येतु देवानिति। अनपवृत्तकर्मवचनात्पुरोडाशश्रपणादूर्ध्वेन प्रायश्चित्त
मिति गम्यते॥ एवमवलीढाभिः क्षिप्तेषु॥ अवलीढानि श्वादिभिरभिक्षिप्तानि त
दशनादिभिः। अन्यथा वाऽशुचिसंबंधीनि कपालान्यभिन्नान्यप्येवं कुर्यात्। भे
दाभावात्संधानमर्थलुप्तं तेनाभिन्न इत्यादिना अप्स्वोभ्यवहरेयुः। अपरा वान्याभि
न्नमयानि भूमिर्भूमिमगान्माता मातरमप्यगात्। भूयास्म पुत्रैः पशुभिर्यो नो द्वेष्टि

श्रौ० वृ०
१४७

सभिघतामिति। कपालेन्यो न्यानि मृन्मयानि भिन्नान्यभिंनानि च भूमिर्भूमिमिति मंत्रे
ण अप एवाभ्यवहरेत्। नसेदध्यादित्यर्थः॥ यदि पुरोडाशः स्फुटेद्वोत्पतेत वा बर्हि
ष्येनं निधायाभिमंत्रयेत किमुत्पतसि किमुत्प्रोष्ठाः शांतः शांत इहागहि। अघोरो
यज्ञियो भूत्वासीद सदनं स्वमासीद सदनं स्वमिति मा हिंसीर्देव प्रेरित आज्येन तेजसा
ज्यस्वमानः किंचन रीरिषः। योगक्षेमस्य शांत्या अस्मिन्नासीद बर्हिषीति। स्फुटेत् भिं
द्यादित्यर्थः। उत्पतेत् उत्पतेदित्यर्थः॥ पूर्वे निधानमंत्र उत्तरोभिर्मंत्रणार्थः॥ आ
नंतर्येयो गात्॥ अग्निहोत्रायकाले ग्नावजायमाने अन्यमानीय जुहुयुः। अग्नि
होत्रहोमार्थे प्रणयनकाले समारूढोऽग्निर्मथ्यमानो यदि न जायेत तदा न्यं लौ
किकमग्निमानीय प्रणीयत त्रैव होमः कार्यः। एतदनुगते न भवति। अनुगते तु

राम
१४७

मंथनादितपस्वती स्यंतंतत्र प्रायश्चित्तं॥ तत्राग्निसंधानमिवमंथनप्रवृत्तोनिमित्तंनाग्निहो
त्रहोमः समारूढे तु नैमितिकस्याभावात्। अग्निहोत्राद्येवमंथनस्यनिमित्तंनान्य
त्। अतः समारूढ एवेतियुक्तंमुक्तां तेनानुगतावजायमानेपियावज्जन्मतावन्मं
थितव्यमिति। ततस्तपस्वतीष्टिः। तत्राग्निहोत्रहोमोनुष्ठितप्रायश्चित्तेनसह्यप
द्दिहोकालो तिपन्नस्तदामनस्वतीहोमस्यकार्यः। अप्यन्यमिति अन्यशब्दोल्लौकि
कमग्निमानीयजुहुयुः। अपिशब्दाद्ब्राह्मणपाण्यादिवक्ष्यमाणमपिगम्यते
॥ पूर्वालाभ उत्तरोत्तरं॥ अग्न्यादीनांपठितव्यंतानांपूर्वपूर्वालाभे उत्तरोत्तरंग्र
ह्णीयुः। पूर्वालाभ इति अलाभवचनात्॥ अलभेवचनांतरविधिरयंनप्रति
निधिनियम इति अध्यवसीयते। तेन दृष्टार्थानामंगानांमध्येयस्यकार्यमस्ति

तदेवकार्यंनान्यत्॥ब्राह्मणपाण्यजकर्णदर्भस्तंवाप्सुकाष्ठेषु॥पृथिव्यां॥अ
ग्नौसर्वसंभवात्।तस्यपृथग्योगभाव:।पाण्यादीनांचतुर्णांइंधनादिस्र
प्रणादिवर्जयित्वान्यत्सर्वंसंभवतीतिपृथग्भाव:।काष्ठानामभावेविधानादु
दककार्याण्यपिकाष्ठेषुनस्युरितितेषांपृथग्भाव:।पाण्यादिषुपंचसुआ
हुतिधारणार्थासमिद्भवति।इंधनार्थास्तुनभवंत्येवसमिध:।पृथिव्यांतुधा
रणार्थापिसमिन्नभवति।काष्ठाभावेतस्यविधानात्॥एवमन्यदपिविचार्य
कर्तव्यं।कृत्वात्वपिमंथनंहोमंकृत्वानंतरमेवमंथनंभवति।अपिराह्नात्का
लांतरेपिभवतिमंथनं।अत्रविनिवेश:।यदाप्रयाणकालेप्रयाणंपरिसमाप्त

तदाहोमानंतरमेवमंथनंभवति।यदाहस्यपरिसमाप्तंप्रयाणंतदापुनरपिहोम

काष्ठ एव मंथनमिति॥ तुशब्दो वधारणार्थः॥ हुत्वा मंथनमेव भवति न पुनर्होम इ
ति॥ पाणौ चेद्धासेन व्वरोध्यः॥ यदि पाणौ जुहुयात्तदा ब्राह्मणस्य वसार्थिनो नाव
रोधः कार्यः॥ कर्णे चेन्मांसवर्जनं॥ अत्राजमांसवर्जनं भवति॥ स्तंबे चेत्नाधिश
यीत॥ अत्र दर्भाणामनधिशयनं॥ अप्सु चेद्विवेकः॥ अत्रा विवेको पांइमा भो ज
नीया इमा अभोजनीया इत्येवंरूपः॥ एतत्संवत्सरं व्रतं॥ यावज्जीविकं वा॥ पूर्वव
द्विकल्पप्रतिभासहेतुर्द्रष्टव्यः॥ अग्नावनुगते तत्राहुतौ हिरण्य उत्तरां जुहुया
द्धिरण्याभावे उत्तरां जुहुयात्॥ आहुत्योरंतरा अग्नावनुगते सति हिरण्यं निधाय तस्मिं
द्वितीयामाहुतिं जुहुयात्॥ हिरण्य एव यथासंभवं शेषकार्याणि जुहुयात् न पुनर
ग्निरुद्धर्तव्यः॥ अभ्यासोऽध्यायपरिसमाप्त्यर्थः॥ २४॥ इत्याश्वलायनसूत्रवृत्तौ ना

रायणीयायां तृतीयोऽध्यायः ॥ ॥ ॐ ॥ दर्शपूर्णमासाभ्यामिष्ट्वेष्टिपशुचातुर्मास्यैरथ
सोमेन ॥ उक्ता हविर्यज्ञास्तेषु च प्रायश्चित्तमुक्तं । इदानीं सर्वसोमानां प्रकृतिभूतं ज्यो
तिष्टोमं वक्तुकामस्तदधिकारिविशेषणार्थं केषांचित्कर्मणामनुष्ठानक्रममुक्तवा
नाचार्यः । इष्टिराग्रयणेष्टिः । पशुर्निरूढः । आधानानंतरं दर्शपूर्णमासयोरारंभ
उक्तः ॥ तदारंभोत्तरकाले इष्टिपशुचातुर्मास्यैरिष्ट्वा सोमेन यष्टव्यं । अथशब्दः सोमेन
संबध्यते ॥ स चाधिकारार्थः । सोमगुणकं कर्म सोम इत्युच्यते । तत्र ज्योतिष्टोमा
ख्यं ॥ एतदुक्तं भवति ॥ अग्न्याधेयानंतरमनेन क्रमेण दर्शपूर्णमासादिभिरिष्ट्वा ज्यो
तिष्टोमाख्येन सोमेन यष्टव्यं । इत उत्तरमाषष्ठाध्यायपरिसमाप्तेस्तमेवाधिकृत्य स
र्वमुच्यत इति ॥ ऊर्ध्वं दर्शपूर्णमासाभ्यां यथोपपत्त्येके । प्रागपि सोमेनैके । सोमेन

आ०सू०
१५०

यस्यमाणाद्गृत्यस्मिंत्सूत्रेवसंतादिकाळेभ्यःकाळांतरविशिष्टाधानविधिपरत्वात्को
सोमाधानयोरानंतर्यमप्युक्तंभवति।अतस्तस्यार्थस्याशक्तत्वादिदमन्यदानंतर्यमि
त्यवगम्यते।तच्चाधानंकृत्वाग्निहोत्रहोमंकुर्वतःप्रागेवदर्शपूर्णमासयोरारंभा
त्सोमेनयष्टुंयजघुपपद्यते।तदातस्मिन्नपिकाळेयष्टव्यमितिसूत्रार्थः।तस्यर्त्वि
जः॥वक्ष्यंतइतिशेषः।ऋत्विजःकर्तारइत्यर्थः।तएव्यरूपाइत्याह॥चत्वारस्त्वि
पुरुषाः।त्रयःपुरुषायेषांतेत्रिपुरुषाः।तेष्वृत्विक्षुचत्वारःपुरुषवंतः।तेभ्यश्चतु
र्भ्योन्येतेषांचतुर्णामेवपुरुषाइतिवेदितव्याः॥अनेनप्रकारेणचतुर्णांमुख्यत्वं
इतरेषाममुख्यत्वमित्यवगतंभवति॥एतेमुख्याएतेतेषांपुरुषाइत्याह॥तस्यत
स्योत्तरेत्रयः॥अस्मिन्नृत्विजः॥ ॥ ॥ छ छ छ छ छ छ छ छ॥॥

राम
१५०

अइति आश्वलायनश्रौतसूत्रवृत्ति
इति श्रौतसूत्रवृत्ति अध्याय ३ संपूर्ण

[OrderDescription]
,CREATED=21.09.20 14:03
,TRANSFERRED=2020/09/21 at 14:27:03
,PAGES=298
,TYPE=STD
,NAME=S0003636
,Book Name=M-876-AASHWALAYAN SHROTSUTRAVRILLAVI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF

FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF

FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF

FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF

FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF

FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF

FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF
,FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF

FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
,FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
,FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF
,FILE216=00000216.TIF
,FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF
,FILE220=00000220.TIF
,FILE221=00000221.TIF
,FILE222=00000222.TIF
,FILE223=00000223.TIF

FILE224=00000224.TIF
,FILE225=00000225.TIF
,FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,FILE229=00000229.TIF
,FILE230=00000230.TIF
,FILE231=00000231.TIF
,FILE232=00000232.TIF
,FILE233=00000233.TIF
,FILE234=00000234.TIF
,FILE235=00000235.TIF
,FILE236=00000236.TIF
,FILE237=00000237.TIF
,FILE238=00000238.TIF
,FILE239=00000239.TIF
,FILE240=00000240.TIF
,FILE241=00000241.TIF
,FILE242=00000242.TIF
,FILE243=00000243.TIF
,FILE244=00000244.TIF
,FILE245=00000245.TIF
,FILE246=00000246.TIF
,FILE247=00000247.TIF
,FILE248=00000248.TIF
,FILE249=00000249.TIF
,FILE250=00000250.TIF
,FILE251=00000251.TIF
,FILE252=00000252.TIF

FILE253=00000253.TIF
,FILE254=00000254.TIF
,FILE255=00000255.TIF
,FILE256=00000256.TIF
,FILE257=00000257.TIF
,FILE258=00000258.TIF
,FILE259=00000259.TIF
,FILE260=00000260.TIF
,FILE261=00000261.TIF
,FILE262=00000262.TIF
,FILE263=00000263.TIF
,FILE264=00000264.TIF
,FILE265=00000265.TIF
,FILE266=00000266.TIF
,FILE267=00000267.TIF
,FILE268=00000268.TIF
,FILE269=00000269.TIF
,FILE270=00000270.TIF
,FILE271=00000271.TIF
,FILE272=00000272.TIF
,FILE273=00000273.TIF
,FILE274=00000274.TIF
,FILE275=00000275.TIF
,FILE276=00000276.TIF
,FILE277=00000277.TIF
,FILE278=00000278.TIF
,FILE279=00000279.TIF
,FILE280=00000280.TIF
,FILE281=00000281.TIF

FILE282=00000282.TIF
,FILE283=00000283.TIF
,FILE284=00000284.TIF
,FILE285=00000285.TIF
,FILE286=00000286.TIF
,FILE287=00000287.TIF
,FILE288=00000288.TIF
,FILE289=00000289.TIF
,FILE290=00000290.TIF
,FILE291=00000291.TIF
,FILE292=00000292.TIF
,FILE293=00000293.TIF
,FILE294=00000294.TIF
,FILE295=00000295.TIF
,FILE296=00000296.TIF
,FILE297=00000297.TIF
,FILE298=00000298.TIF
,